Digitized by Arya Samaj Foundation Chennai and eGangotri

SANSKRIT SAHITYA PARISHAT
VOL 36 1954

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

085537

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080537

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. N

080537

Vol. XXXVI. January 1954

No. 9 १८७५-शकीये

३६श-वर्षस्य पौषे

९म-संख्या मासे

भारतेभ्यः भारती

संस्कृत-साहित्य-परिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकौ

श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः

श्रीरामधनशास्त्री काव्य-व्याकरण-पुराणतीर्थश्च

संस्कृत-साहित्य-परिषत्
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—रूप्यकषट्कम् ६।
Foreign price—1-4s

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्किञ्चिदावेदनम्

प्रियपाठकमहाभागाः !

जानन्त्येव भवन्तो यत् परिषदियं कियतः कालात् प्रागात्मप्रतिष्ठायै कलिकाता-पौरसभादत्तं किञ्चित् स्थानमधिगत्य तत्रात्मनो वासगृहं रचयितुमारभ्यापि किञ्चिन्मात्रं निर्मायैव महासमरसम्भूतदौर्मूल्यादिभिः कारणैरर्थाभावेन च महता नारब्धं समापयितुं समर्थेति ।

तत् प्रियतमामिमां परिषदं यदि श्रीमन्तः प्रतिष्ठावतीं प्राणवतीञ्च द्रष्टुमिच्छन्ति, तदा सदयं प्रेषयन्तु यथाशक्ति साहाय्यं वक्ष्यमाणसङ्केतेन परिषत्-प्रणयिन्याः कल्पितप्रासादनिर्माणपरिसमाप्त्यर्थमिति ।

सङ्केतः—संस्कृत-साहित्य-परिषत्-सम्पादकः,
१६८।१, राजा-दीनेन्द्रष्ट्रीट्, कलिकाता-४

Sanskrit Sahitya Parishat Series

(Revised up to April, 1951)

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (out of Stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1-4 ; Re. I. (for members):

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshinacharan Bhattacharya. (out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kalipada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. 2 (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshinacharan Bhattacharya. Rs. 2-8 ; out of stock.

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satishchandra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinath Sahityashastri. As. 4.

(Cont. to Cover 3rd Page)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

Vol. XXXVI. No. 9. | १८७५-शकीये पौषे ३६श-वर्षस्य ९म-संख्या | January 1954.

मतिमञ्जरी

[निबन्धकः—श्रीयादवेन्द्रनाथ-राय-न्यायतर्कतीर्थः]

कलिकातानगर्य्यां भारतराष्ट्रस्य प्रधानमन्त्रिमहोदयाः ।

भारतयुक्तराष्ट्रस्य प्रधानकर्णधाराः पण्डित-श्रीजहरलालनेहेरु-महाभागा अस्मिन्नेव मासे कलिकातानगरीं शुभागमनेन प्रीणितवन्तः । न हि कार्य्यगुरुत्वं विना तेषां कुत्रापि गमनं सम्भवति । कार्यगुरुत्वञ्चेदानीं परराष्ट्रमधिकृत्य । ये तावद् महम्मदीया अस्माकमङ्गभूता आसन्, त एव पाकीस्थानरूपेण कल्पितमंशविशेषं भारतभूखण्डाद् विच्छिद्य तत्रापि शान्तिमलभमाना गूढस्य कस्यापि समीहितस्य संसाधनाय आमेरिकायुक्तराष्ट्रेण सह केनाप्यतिरहस्येन सन्धिना सम्भूय भारतराष्ट्रस्य तथा प्राच्यभूखण्डस्य शान्तिविनाशाय प्रयतन्ते । अत्र देशवासिनोऽस्मान् विशेषेण सचेतनीकर्तुं महात्मनां पण्डितमहाभागानां शुभसमागमो जातः । यद्यपि भारते साम्यवादादिविविधवादविवादपरायणा भारतीयाः परिलक्ष्यन्ते तथाप्यधुना एवम्भूते संकटे सर्वैरेकमत्येन भारतस्य कल्याणं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साधयितव्यमित्याशाऽस्माकम्। पण्डितवर्य्यैर्निरपेक्षरूपेणात्रत्यकंग्रेसाख्य-राजनीतिपरिषदो दुर्बलता गणतन्त्रीयजनचित्तैः सहैकेषां वैमत्यञ्च न हितायेत्युद्घोषितम्। यथा जनचित्ताहरणाय ते प्रभवेयुस्तथोपदेशोऽपि दत्त इति पण्डितवर्य्याणां दूरदृष्टिमुद्दिश्य तान् वयमभिनन्दामः। यस्मिन् भारते वर्षे समानं चित्तं समानं मनः समाना आकूतिरित्यादयः प्रार्थनीया आसन् तत्रैवैत्थं विपर्यासो जात इति सचेतसां चेतांसि नितरां दूयन्ते। यथा यथास्माकं गणतन्त्रराष्ट्रस्य कल्याणं भवेत् तथा तथाऽस्माभिः क्षुद्रं स्वार्थं विहाय देशकल्याणकामिभिर्देशस्य जनसाधारणस्य मङ्गलाय महते स्वार्थाय च मनो देयमिति तेऽपि सविनयं विज्ञाप्यन्ते। स्मर्त्तव्यमेतत् यदेतद् भारतं वर्षमार्षानुशासनशिष्टं तत्र भोगराज्यानां पाश्चात्त्यदेशानामुदाहरणं नानुकरणीयं, न वा भोगराज्यरूपेण परिणमयितव्यमित्यत्र शास्त्रदृष्टिः सर्वथाकृष्यते विदुषामिति।

सर्वे सचेतसः सन्तु क्षुद्रस्वार्थपराङ्मुखाः।
मङ्गलाय च देशस्य सर्वेशं प्रार्थयामहे॥

वार्षिकोत्सवविवरणम्

] लेखकः—श्रीरामधनशास्त्री]

व्यतीतसौराश्विनस्य षोड़शदिवसे सुसम्पन्नः परिषदः अष्टत्रिंशवार्षिकमहोत्सवो महामहोपाध्याध्यानां विद्वद्वरेण्यानां प्रख्यातयशसां निखिलविद्यापारदृश्वनां श्रीमतां विधुशेखरशास्त्रिपादानां साभापत्येन। तत्रोद्बोधनसङ्गीत-सभापतिवरणादीनां प्राथमिकानां कार्याणामनुष्ठाना-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दनन्तरं परिषदोऽन्यतमसम्पादकैः श्रीमद्भिर्विष्णुपदभट्टाचार्य्यैः काव्यतीर्थैः एम्-ए महाभागैर्वाचितं संस्कृतभाषामयं परिषदो विगतवार्षिकमहोत्सव-विवरणं सहैव परिषदुद्देश्यजातेन समुद्घोषितानि चागामिवर्षीयाणां कार्यपरिचालकादीनां नामानि। अथ कलिकाताविश्वविद्यालयाध्यापक-डाक्तर-श्रीश्रीकुमारवन्द्योपाध्याय-कलिकातासंस्कृतमहाविद्यालयवेदान्ताध्या-पकश्रीवेङ्कटरमणवेदान्ततीर्थप्रमुखा विविधविद्याविशारदाः संस्कृप्रणयिनो विद्वांसः संस्कृतभाषायाः समुन्नतिं रक्षां चाधिकृत्य व्याख्यानेन सर्वान् प्रीणितवन्तः। ततः सभापतिमहाभागा जराजीर्णतयात्मनो लिखितम-प्यभिभाषणं सभापतिपदोचितं वाचयितुमसमर्था अतिदुःखिता मर्माहता इव सभासद्भ्यः स्वीयमसामर्थ्यं विज्ञाप्य तदीयमभिभाषणं परिषत्पत्रिकायां प्राकाश्यमधिगतं द्रष्टव्यमवबोद्धव्यञ्चेति निर्दिश्य व्यरमन। अथ सभा-पतिभ्यः साधुवादप्रदानात् परमवसिते सभाकार्ये परिषत्सदस्यैरतीतवर्ष-वदेषमोऽपि सामाजिकानां सन्तोषायाभिनीतं 'कपालकुण्डला' नाम किम-प्यभिनवं संस्कृतभाषामयं रूपकम्। यद्धि नवीनकविभिः परिषदोऽन्यतम-सम्पादकैः श्रीमद्भिर्विष्णुपदभट्टाचार्यैर्महाभागैस्तदीयस्य पितुः प्रख्यात-यशसः पण्डितकुलरत्नभूतस्य स्वारूढस्य वाशिष्ठस्य हरिचरणविद्यारत्नस्य संस्कृतभाषामयमनुवादं कपालकुण्डलाया वङ्किमचन्द्रविरचिताया वङ्गभाषा-मय्याः समवलम्ब्य विरचितम्। रूपककारैर्हि यथा यथात्र रूपके रस-समावेशोऽकारि अभिनयदक्षैः परिषत्पक्षीयैरभिनेतृभिरपि तथा तथैव सामाजिकेषु रसपरिवेशो व्यधायि। किं बहुना, रसपिपासवो बोद्धारः सामाजिकवर्य्या रूपकस्यास्याभिनयमालोक्य सर्वे चित्रार्पिता इवावस्थिता-स्तदानीं यावदवासनमादित इति शम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्यपरिषदः अष्टत्रिंशवर्षीय-कार्यविवरणम्

परमपूजनीयाः सभापतिमहाभागाः ! माननीयाः प्रधानातिथिमहोदयाः ! सदयं समुपागताः सारस्वतसहोदराः ! सावित्रीप्रतिमाश्च महिलाः ! अद्य खलु संस्कृतसाहित्यपरिषदः शुभे अष्टत्रिंशवार्षिकमहोत्सववासरे भवतः समवाप्य परिषदियं भवद्भ्यः स्वागतं व्याहरन्ती अननुभूतपूर्वं प्रमोदविशेषं प्रयाति पुष्णाति च मनसि भाविनि वर्षे भवतामेवमेव असकृत् समागमवासनाम् ।

कार्यविवरणस्योपस्थापनात् प्राक् देशवरेण्यानां जननायकानां डक्टरश्यामाप्रसादमुखोपाध्यायमहोदयानां, वाग्मिप्रवराणां पण्डितप्रकाण्डानां लक्ष्मीकान्तमैत्र एम् पि महाभागानां, नैयायिककेशरिणां पण्डितप्रवराणां चण्डीचरणतर्कतीर्थमहाशयानां, स्मार्तशिरोमणीनां पण्डितमुख्यानां निवारणचन्द्रतर्कस्मृतितीर्थमहोदयानां, निपीतनिखिलवैष्णवागमरसानां गौरसुन्दरभागवतदर्शनाचार्याणां, वेदान्तविशारदानां पण्डितप्रवराणां सुरेन्द्रमोहनवेदान्ततीर्थानां, विबुधवरेण्यानां रामचन्द्रशास्त्रिसांख्यवेदान्ततीर्थानाञ्च परलोकप्रयाणेन अप्रतीकारां क्षतिं संस्मरन्ती शोकविह्वलेयं परिषत् तेषां महात्मनां परिजनानां सविधे गम्भीरां समवेदनां ज्ञापयति ।

प्रहवाणनेत्रचन्द्रमितस्य वङ्गाब्दस्य भाद्रमासस्य विंशेऽहनि इउनिभारसिटि-इन्स्टिटिउटभवने परमपूज्यपादानां ৺तारकेश्वरमठाधीशानां साष्टैकादशशतश्रीसंयुतानां श्रीमद्दण्डिस्वामि-हृषीकेशाश्रममहोदयानां मोहान्तमहाराजानां साभापत्येन परिषदः सप्तत्रिंशवार्षिकमहोत्सवः सञ्जातः । माननीयाः शिक्षामन्त्रिणः श्रीमन्तः पान्नालालवसुमहाशयास्तत्र प्रधानातिथिरूपेण समुपस्थिता आसन् । समागतानां विपश्चितां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रमोदविधानाय परिषत्सदस्यैः सभावसाने महामहोपाध्याय-श्रीकाली-पदतर्काचार्यमहोदयविनिर्मितस्य नलदमयन्तीयनाटकस्याभिनयः कृतः ।

संस्कृतभाषायाः संस्कृतसाहित्यस्य प्रसारसाधनाय केश्चित् संस्कृतानुरागिभिः दहनपञ्चनेत्रचन्द्रमिते वङ्गाब्दे स्थापितेयं परिषत् संस्कृत-भाषामयमौलिकग्रन्थप्रबन्धादिनिर्माणपाठसमालोचनाभिश्चतुष्पाठीस्थापनेन, मुद्रितामुद्रितसंस्कृतग्रन्थसंग्रहसंरक्षणादिभिः, अप्रकाशितसंस्कृतग्रन्थानां प्रकाशनेन, संस्कृतभाषामयमासिकपत्रप्रचारेण, संस्कृतरूपकाभिनयेन, शास्त्र-व्याख्यानेन च स्वं सदुद्देश्यं साधयन्ती साम्प्रतं सर्वथा विबुधचित्तान्या-कर्षन्ती वर्तत इति तु नः परमं प्रमोदस्थानम् ।

एतस्मिन् वर्षे "प्रवेशिकायां परीक्षायां संस्कृतमवश्यपाठ्यत्वेन स्थानं लभेत" इति विषयमधिकृत्य माननीयानां विचारपतीनां श्रीमतां रमाप्रसाद-मुखोपाध्यायमहोदयानां साभापत्येन काचिन महती सभा सञ्जाता । अन्यासु च साधारणसभासु पण्डितप्रवराः श्रीमद्यादवेन्द्रनाथरायन्याय-तर्कतीर्थाः पण्डितप्रवराः श्रीमन्निरञ्जनस्वरूपब्रह्मचारिन्यायवेदान्ताचार्य-तर्कवेदान्तसांख्यन्यायषड्दर्शनतीर्थाश्च सुललितैः प्रबन्धैः सदस्यानां चित्ततोषं सम्पादितवन्तः ।

साम्प्रतं परिषद्ग्रन्थागारे बाणग्रहनेत्रवसुमिता मुद्रितग्रन्थाः वेद-व्योमाकाशसागरमिताश्च हस्तलिखितग्रन्था वर्तन्ते । पञ्चाशदधिक-सहस्रमुद्राप्रदानेन कलिकातापौरसभया अस्य ग्रन्थागारस्य यो नाम उपकारः साधितः तदर्थं तस्यै साधुवादाः प्रदीयन्ते ।

परिषदो हस्तलिखितग्रन्थानां विवरणात्मिका सूची कापि निर्मीयमाणा वर्तते । शासकगोष्ठीसकाशात् लभ्यते चेत् यथोपयुक्तं साहाय्यं तदा नातिचिरादेव सा नूनं पूर्णतां गमिष्यति । ग्रन्थागारप्रतिष्ठादिवसादारभ्य श्रीमद्भिर्जानकीनाथशास्त्रिभिर्यादृशो यत्न उत्साहश्च प्रदर्शितः तदर्थं तद्गुण-मुग्धेयं परिषत् ततसविधे आन्तरिकीं कृतज्ञतां ज्ञापयति ।

वर्षेऽस्मिन् ये नाम महात्मानः यानि वा प्रतिष्ठानानि परिषद्ग्रन्थागारे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकादिकं प्रदाय ग्रन्थागारस्य समुन्नतिमसाधयन, तेभ्यः साधुवादाः प्रदीयन्ते।

एतावता कालेन परिषदा प्रकाशिताः पञ्चविंशतिः ग्रन्थाः। अर्थाभावादेव आशानुरूपं न जातं सर्वम्। साम्प्रतं हलायुधनिर्मितस्य ब्राह्मणसर्वस्वस्य मुद्रणं चलति, मन्ये नातिचिरादेव स ग्रन्थः प्रकाशितो भविष्यति।

महामहोपाध्याय-श्रीकालीपदतर्काचार्याणां सम्पादनया तत्सहकारिणाञ्च श्रीरामधनशास्त्रिकाव्यव्याकरणपुराणतीर्थ-श्रीयादवेन्द्रनाथरायन्यायतर्कतीर्थानां प्रयत्नातिशयेन यथायथं प्रचलति पत्रिकाप्रकाशकार्यम्।

वर्षेऽस्मिन् पण्डितप्रवरा श्रीरामरतनसांख्यशास्त्रि-श्रीचारुकृष्णदर्शनाचार्य—श्रीविभासप्रकाशगङ्गोपाध्याय एम्-ए —श्रीअमृतनाथमुखोपाध्याय-सांख्य-वेदान्त-वैष्णव-दर्शनतीर्थ—श्रीनिरञ्जन-स्वरूपब्रह्मचारितर्क-वेदान्तसांख्यन्याय षड्दर्शनतीर्थमहोदया भागवतव्याख्यानेन सदस्यानां मनसस्तृप्तिमपूर्वां समुत्पादितवन्त इति तेषां सविधे परिषदियं कृतज्ञा वर्तते।

वर्षेऽस्मिन् पण्डितप्रकाण्डैः श्रीजानकीनाथशास्त्रिभिः श्रीरामधनभट्टाचार्यशास्त्रिकाव्यव्याकरणपुराणतीर्थैश्च यथारीति परिचालितं अध्यापनकार्यम्। चतुष्पाठीपरिचालने यावद् द्रविणं समपेक्ष्यते तावत् तु नास्माभिर्लभ्यते इति कृत्वा एतद्विषये जनप्रियायाः शासकगोष्ठ्याः कृपाकटाक्षमपेक्षमाणा वर्तामहे।

संस्कृतभाषायां जनानामनुरागमुत्पादयितुमेवास्ते परिषदोऽभिनयविभागः। वङ्गेषु तथा काणपुर-हरिद्वार-काशी-पाटलिपुत्रप्रभृतिप्रदेशेषु रूपकाण्यभिनीय परिषदा समर्जितं विमलं यशः। यत्कृते श्रीयुक्तजगन्मोहनज्योतिर्विनोद—श्रीयुक्तकार्तिकचन्द्रचक्रवर्ति—श्रीयुक्तरवीन्द्रनाथठाकुराणाम् अक्लान्तपरिश्रम एव प्रशंसनीयः।

नासीद् वङ्गेषु वेदचर्चा इत्येव या मतिर्भारतीयानां चेतोविलग्ना वर्तते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तामेव दूरीकर्तुं श्रीदुर्गामोहनभट्टाचार्य-एम्ए-काव्यसांख्यपुराणतीर्थ-महोदयैः प्राचीनयुगे मध्ययुगे वा वङ्गेषु वेदचर्चा आसीन्न वेति विषयमुरीकृत्य गवेषणाकार्यमारब्धम्। तत्फलस्वरूपमेव साम्प्रतं प्रकाश्यते परिषदा हलायुधस्य ब्राह्मणसर्वस्वम्। एतदर्थं बहुधनं समपेक्षितं स्यात्। पश्चिमवङ्गशासकगोष्ठ्या एतदर्थं द्विसहस्ररूप्यकाणि दत्तानि। एतेन कृतज्ञेयं परिषत् तस्याः सविधे। परम् एतान्यपि न पर्याप्तानि। मन्ये एतद्विषये शासकगोष्ठ्याः कृपादृष्टिर्नातिचिरादेव पतिष्यति।

देशस्यार्थिकावस्था सङ्कटापन्नेति कृत्वा कतिचित् वत्सरान् यावत् परिषद् आयो ह्रस्वतामेव गाहते। तेन च परिषदः कर्मोद्यमः सङ्कुचित एव वर्तते। आशास्महे आगामिनि वर्षे साहाय्यरूपेण शासकगोष्ठी परिषदे त्रिसहस्ररूप्यकाणि दत्त्वा कार्यपरिचालनं सुकरं करिष्यतीति।

वर्षेऽस्मिन् आसनादिक्रयार्थं सार्द्धचतुःशताधिकद्विसहस्ररूप्यकाणि शासकगोष्ठ्या परिषदे प्रदत्तानि इति कृतज्ञेयं दीना परिषत्। वर्तमाने वर्षे यैर्महात्मभिः परिषदे अर्थादिकं दत्तं तेभ्यः परिषदियं आन्तरिकीं कृतज्ञतां ज्ञापयति।

परिषदः द्वितलस्य निर्माणकार्यं प्रायेण सम्पूर्णमेव। एतत्कृते परिषदा यो नाम ऋणभारो गृहीतः स तु नोपेक्षणीयः। साम्प्रतं दशसहस्ररूप्यकाणां प्रयोजनं वर्तते। आशास्महे विद्यानुरागिणः सज्जनाः विधृतसंस्कृतसंरक्षणैकव्रतां परिषदमिमां ऋणभारात् अचिरान्मोचयिष्यन्तीति।

परिशेषे च वृत्तप्रकाशादिना द्रव्यादिदानादिना वा यैः केश्चित् परिषदियं सदयम् उपकृता तेभ्यः साधुवादान् प्रदाय परिषदः अष्टत्रिंशवार्षिककार्यविवरणं परिसमाप्यते। इति—

विनीताः
श्रीचपलाकान्तभट्टाचार्यः
श्रीप्रकाशचन्द्रवन्द्योपाध्यायः
श्रीविष्णुपदभट्टाचार्याः
सम्पादकाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीचैतन्यचरितामृतसंस्कृतानुवादः

(पूर्वतोऽनुवृत्तः)

अनुवादकः—श्रीभास्करानन्दस्वामी ।

श्रीश्रीचैतन्यचरितामृत आदिलीलायां

चतुर्थः परिच्छेदः

कृष्णस्याजनयल्लोभं भोगार्थं कृष्णमाधुरी ।
कृष्णोऽविन्दन्मनःक्षोभं सम्यग्भोक्तुमपारयन् ॥
द्वितीयं कारणञ्चैतन्निःशेषं विवृतं मया ।
तृतीयश्चावतारस्य कारणं श्रूयतामथ ॥
अयं स रससिद्धान्तनिगूढः परमो मतः ।
एकः स्वरूपगोस्वामी केवलं वेत्ति सर्वथा ॥
यद्यन्यः कोऽपि जानाति स तस्मादेव नान्यतः ।
यतश्चैतन्यदेवस्य स एव मर्मवित्तमः ॥
प्रेमा गोपीगणस्यैव रूढभावाभिधानकः ।
स प्रेमा निर्मलः शुद्धो न जातु काम इत्ययम् ॥

"तथाहि श्रीभक्तिरसामृतसिन्धौ पूर्वविभागे साधनभक्तिलहर्यां त्रयश्चत्वारिंशदधिकशताङ्कधृतं गौतमीयतन्त्रवचनम्—

प्रेमैव गोपरामाणां काम इत्यगमत् प्रथाम् ।
इत्युद्धवादयोऽप्येतं वाञ्छन्ति भगवत्प्रियाः ॥२५॥"

विभिन्नलक्षणौ कामः प्रेमा च लौहहेमवत् ।
तयोः परस्परं ज्ञेयं वैलक्षण्यं स्वरूपतः ॥
स्वेन्द्रियप्रीतये वाञ्छा काम इत्युच्यते बुधैः ।
श्रीकृष्णस्येन्द्रियप्रीत्यै वाञ्छैव प्रेम कथ्यते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवेत् कामस्य तात्पर्यं स्वसम्भोगे हि केवलम् ।
श्रीकृष्णसुखतात्पर्यं प्रेम्नो महाबलस्य च ॥
लोक-वेद-तनूधर्मान् कर्माणि निखिलान्यपि ।
लज्जां धैर्यं तनूसौख्यं सुखममाणि चात्मनः ॥
आर्यमार्गान् सुदुस्त्याज्यान् परिवारांस्तथात्मनः ।
स्वजनांस्तत्कृतं सर्वं ताडनाभर्त्सनादिकम् ॥
तांश्चाशेषान् विहायैव श्रीकृष्णं भजते सदा ।
करोति सेवनं प्रेम्नः श्रीकृष्णसुखहेतवे ॥
कृष्णे दृढोऽनुरागोऽयं स प्रेमेत्यभिधीयते ।
न तत्र मलिना रेखा धौते वस्त्रे शुचाविव ॥
कामप्रेम्नोरतो ज्ञेयः प्रभेदः सुमहत्तमः ।
घनान्धतमसं कामः प्रेमा निर्मलभास्करः ॥
अतो गोपीगणस्यैव कामगन्धो न विद्यते ।
सम्बन्धो यस्तु कृष्णेन स तस्यैव सुखार्थकः ॥

"तथाहि श्रीमद्भागवते दशमस्कन्ध एकत्रिंशाध्याय ऊनविंशश्लोके श्रीकृष्णं प्रति गोपीवाक्यम्—

यत्ते सुजात चरणाम्बुरुहं स्तनेषु
भीताः शनैः प्रिय दधीमहि कर्कशेषु ।
तेनाटवीमटसि तद्व्यथते न किं स्वित्
कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः ॥२६॥"

आत्मनः सुखदुःखानि गणयन्ति न गोपिकाः ।
सर्वं व्यवहरन्त्येव कृष्णस्य सुखहेतवे ॥
श्रीकृष्णस्य कृते सर्वपरित्यागपुरःसरम् ।
शुद्धानुरागं कुर्वन्ति तस्यैव प्रीतिकाम्यया ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे द्वात्रिंशाध्याये विंशश्लोके गोपीः प्रति श्रीकृष्णवाक्यम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं मदर्थोज्झितलोकवेद-
स्वानां हि वो मय्यनुवृत्तयेऽबलाः ।
मया परोक्षं भजता तिरोहितं
मासूयितुं मार्हथ तत्प्रियं प्रियाः ॥२७॥"
पुरैव भगवान् कृष्णः प्रतिज्ञां कृतवान् दृढाम् ।
यो यथा भजते कृष्णं स भजत्येव तं तथा ।

"तथाहि श्रीमद्भगवद्गीतायां चतुर्थाध्याय एकादशश्लोकेऽर्जुनं प्रति श्रीकृष्णवाक्यम्—

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ सर्वशः ॥२८॥"
प्रतिज्ञा साऽपि भग्नाभूद् गोपीनां प्रेमसेवया ।
प्रमाणं तत्र कृष्णस्य श्रीमुखामृतभाषणम् ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे द्वाविंशाध्याये एकविंशश्लोके गोपीः प्रति श्रीकृष्णवाक्यम्—

न पारयेऽहं निरवद्य संयुजां स्वसाधुकृत्यं विबुधायुषापि वः ।
या माभजन् दुर्जयगेहशृङ्खलाः संवृश्च्य तद्वः प्रतियातु साधुना ॥२९॥"
तथापि निजदेहे या गोपीनां प्रीतिरीक्ष्यते ।
कृते तस्यैव कृष्णस्य सापीति ज्ञायतां खलु ॥
मया समर्पितं तावत् कृष्णायेदं कलेवरम् ।
तस्यैवेदं धनं स्वीयं तथा सम्भोगसाधनम् ॥
कृष्णस्य दर्शन-स्पर्श-सम्भाषार्थमिदं वपुः ।
इति कुर्वन्ति ता गोप्योऽङ्गानां मार्जनभूषणे ॥

"तथाहि लघुभागवतामृते उत्तरखण्डे गोपीप्रेमामृते षट्त्रिंशांकधृतादि पुराणीयेऽर्जुनं प्रति श्रीकृष्णवाक्यम्—

"निजाङ्गमपि या गोप्यो ममेति समुपासते ।
ताभ्यः परं न मे पार्थ निगूढप्रेमभाजनम् ॥३०॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोपीभावस्य चान्योऽस्ति स्वभावः परमाद्भुतः।
प्रभावो यस्य तीक्ष्णाया अपि बुद्धेर्न गोचरः ॥
सुखवाञ्छामकृत्वैव कृष्णं पश्यन्ति गोपिकाः ।
तासां तथापि गोपीनां भवेत् कोटिगुणं सुखम् ॥
आनन्दं लभते कृष्णो यावन्तं गोपिकेक्षणात् ।
तत्कोटिगुणमानन्दं गोप्य आस्वादयन्ति तु ॥
स्वसुखस्यानुसन्धानं तासां नास्त्येव लेशतः ।
सुखवृद्धिस्तथापीति विरोधे कः समन्वयः ? ॥
एकमात्रं विरोधेऽस्मिन् समाधानं विलोक्यते ।
गोपिकानां सुखं कृष्णसुखे परिसमाप्यते ॥
कृष्णस्य वर्द्धते गोपीदर्शनाद्या प्रफुल्लता ।
तथैव तस्य माधुर्यमतुलं परिवर्द्धते ॥
मम सन्दर्शनात् कृष्ण एतावत् सुखमाप्तवान् ।
इति सौख्येन गोपीनामाननाङ्गं प्रफुल्लति ॥
गोपीशोभेक्षया शोभेधते कृष्णस्य यावती ।
तावती वर्द्धते शोभा गोपीनाञ्च तदीक्षणात् ॥
इत्थं तद्द्वयमन्योन्यमाकर्षति विकर्षति ।
अपराजयमानं तदन्योन्यं प्रतिवर्द्धते ॥
गोपीनां गुणरूपैस्तु कृष्णस्य वर्द्धते सुखम् ।
सुखवृद्धिर्भवेत्तासां तत् सुखेनैव केवलम् ॥
अत एव सुखं तासां कृष्णस्य सुखपोषकम् ।
तस्मात् प्रेमणि गोपीनां कामदोषो न वर्त्तते ॥

"यथोक्तं श्रीरूपगोस्वामिना स्तवमालायां केशवाष्टके अष्टमश्लोके—

"उपेत्य पथि सुन्दरीततिभिराभिरभ्यर्चितं
स्मिताङ्कुरकरम्बितैर्नटदपाङ्गभङ्गीशतैः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तनस्तवकसञ्चरन्नयनचञ्चरीकाञ्चलं
व्रजे विजयिनं भजे विपिनदेशतः केशवम् ॥३५॥
अन्यत् स्वाभाविकं चिह्नं गोपीप्रेम्णोऽस्य विद्यते ।
यथायं भवति प्रेमा कामगन्धविवर्जितः ॥
पुष्णाति कृष्णमाधुर्यं गोपीप्रेमा स्वभावतः ।
वर्द्धयत्यपि सन्तुष्टः स्वयं कृष्णस्य माधुरीम् ॥
प्रेम्णो हि विषयानन्दादानन्दः स्यात्तदाश्रये ।
तस्मिन्नात्म-सुखाकाङ्क्षासम्बन्धो नास्ति लेशतः ॥
प्रेमा निरुपधिर्यत्र तत्रायं नियमः स्वतः ।
प्रेम्णो विषयसौख्येन सौख्यं वर्त्तत आश्रये ॥
हन्त्यात्मप्रेम-हर्षश्चेत् कृष्णानन्दार्थसेवनम् ।
तस्मै हर्षाय कुप्यन्ति तद्भक्ताः खिन्नमानसाः ॥

"तथाहि भक्तिरसामृतसिन्धौ पश्चिमविभागे प्रीतिभक्तिलहर्यां त्रयोविंशश्लोकः—

"अङ्कस्तम्भारम्भमुत्तुङ्गयन्तं प्रेमानन्दं दारुको नाभ्यनन्दत् ।
कंसारातेर्वीजने येन साक्षादक्षोदीयानन्तरायो व्यधायि ॥३२॥

तथाहि तत्रैव दक्षिणविभागे सात्त्विकभावलहर्यां एकोनत्रिंशश्लोके—

"गोविन्दप्रेक्षणाक्षेपि वाष्पपूराभिवर्षणम् ।
उच्चैरनिन्ददानन्दमरविन्द-विलोचना ॥३३॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

०४०५३२

ग्रन्थविमर्शमर्शनम्

(पूर्वानुवृत्ति)

[निबन्धकः—श्रीनिरञ्जनस्वरूपब्रह्मचारी अष्टतीर्थ-न्यायवेदान्ताचार्यः]

एकोऽहं बहु स्यामित्यादिश्रुतिरिन्द्रजालं विना ऐन्द्रजालिकस्येन्द्रजालिक-नानावस्तूपादानत्वमिवैकस्यैव ब्रह्मणो नानाद्वैतप्रपञ्चोपादानत्वं मायां विना नोपपद्यत इति तामेवार्थापत्तिं सूचयन्ती युक्त्यर्थापत्त्यादिप्रमाणा-न्तरसिद्धानिर्वचनीयाविद्यासत्तानुवादेन मायासत्तां समर्थयति। यथा खलु 'आदित्यो यूपः' 'यजमानः प्रस्तरः' इत्यादिश्रुतयः प्रमाणान्तरसिद्ध-भिन्नसत्ताकयोरादित्ययूपयोः प्रस्तरयजमानयोश्चैक्यं प्रतिषेद्धुमक्षमाः सत्यः प्रशंसार्थवादतां भजन्ते, नादित्याभिन्नयूपसत्तां प्रस्तराभिन्नयजमानसत्तां वा प्रमाणयन्ति यूपादित्यादितदैक्यानां प्रमाणान्तरसिद्धत्वात्, न तथा "नेह नानास्ति किञ्चने"त्यादिश्रुतिः प्रमाणान्तरसिद्धसत्ताकं द्वैतमनूद्य तन्निषेधे कुण्ठिता भवति; अपि तु तस्य स्वतात्पर्यविषयीभूतां पारमार्थिकसत्तां निषेधत्येव, द्वैतस्य पारमार्थिकसत्ताया अनुमानादिप्रमाणान्तरागम्यत्वात्, व्यवहारतः प्रतीयमानसत्ताया एव व्यावहारिकप्रमाणादिगम्यत्वसम्भवात्। "नेह नानेत्यादि" श्रुतेर्ब्रह्मप्रतियोगिकभेदविशिष्टप्रपञ्चनिषेधपरत्वस्वीकारे-ऽपि प्रपञ्चस्यार्थतो मिथ्यात्वमेव स्वीकृतं स्यान्नतु सत्यत्वमिति तु नैव चिन्तितमाक्षेपकृता। तथाहि तन्मते विशिष्टनिषेधं विशेषणमात्रनिषेधपर-त्वेन सङ्गमयितुं प्रयतमानेनापि तस्मिन् प्रपञ्चस्य भेदासहिष्णुतादात्म्यमेव स्वीकृतं स्यात्, तच्चात्यन्ताभेदरूपम्, तच्च चिज्जडयोरेकमिथ्यात्वं विना न सम्भवतीत्यर्थापत्त्यैव जगतो मिथ्यात्वमेवायातं, न सत्यत्वम्। ब्रह्मणः पारमार्थिकत्वस्य तु श्रुत्यैव शतशः प्रतिपादितत्वात्। जगतः सत्यत्वा-ग्रहरक्षणाय ब्रह्मणो मिथ्यात्वाङ्गीकारे श्रुतिरेवोल्लङ्घिता स्यात्, तथाच

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वस्याप्यास्तिकत्वहानेनाक्षेपकस्यापि दुर्ग्रहैव व्यवस्थाप्येतेति महद-निष्ठमापद्यते। 'माया वयुनं ज्ञान'मिति निघण्टुप्रदर्शितं मायाया ज्ञानार्थकत्वमपि न परमार्थसद्द्वैतवादविरोधि, चित्तवृत्तिरूपस्य ज्ञान-स्यापि मायापरिणामरूपत्वात्, ततपरिणामस्य च चित्तानतिरिक्तत्वात्, चित्तस्य तु मायापरिणामीभूतापञ्चीकृतपञ्चमहाभूतानां मिलितसात्वि-कांशपरिणामरूपत्वेन मायापरिणामत्वमर्थायातम्। किञ्चानादिव्यवहारतो मायाशब्दस्य मिथ्योपादानभूते सदसद्भ्यां चानिर्वचनीये शक्तिविशेषे एव शक्तिविशेषावधारणाज् ज्ञाने तत्पदप्रयोगस्तु लक्षणयैव भविष्यतीति लक्ष्यार्थ एव ज्ञानम्। दृश्यते च पौरुषेयस्मृतीतिहासपुराणेष्वपि बहुशो मायाशब्दस्य अतथाभूतवस्तुनस्तथाभूतरूपेण प्रकाशनेऽघटनघटने च समर्थायां विलक्षणशक्तावेव प्रयोग आसुरराक्षसादिमायावर्णनावसरे अमरकोषादौ च तथैव शक्तिग्राहकत्वदर्शनाच्च। श्रौतशब्दशक्तिविशेषसन्देहे तन्निर्णयार्थं तदनुकूलस्मृतीनां लौकिकव्यवहाराणाञ्चासति बाधकेऽनुग्राहकत्वस्य मीमांसा-दर्शने स्वीकृतत्वात्तथैव युक्तत्वाच्च। तथाच व्यवहारस्मृतीनामनुग्रहेणानिर्वच-नीयशक्तिविशेष एव मायापदस्य शक्तिरवधारणीया, अन्यत्र तु लक्षणैव। निघण्टोः श्रौतार्थशक्तिनिश्चये प्रामाण्यविशेषाभ्युपगमेऽपि तादृशार्थविशेषे शक्तिनिषेधस्याप्यदर्शनात्, वैदिकपरम्परायाञ्च तादृशशक्तिविशेषे शक्ति-निश्चयस्यैव दर्शनाच्च तत्रैव मायापदस्य शक्तिः स्वीकरणीया। निघण्टोः स्वतःप्रामाण्याभावात्, ततप्रामाण्यस्य वैदिकपरम्पराधीनत्वेन परम्परा-नुमापकत्वेऽपि प्रत्यक्षानुमितपरम्परयोः प्रत्यक्षानुमितश्रुतिवाक्ययोरिव प्रत्यक्षपरम्पराया एव बलवत्त्वात्, तदनुसारेण मायाशब्दस्य तत्रैव शक्त्य-वधारणस्यैव युक्तत्वम्। तथाचानिर्वचनीयशक्तिविशेषे शक्त्यभावस्तद-न्यार्थे शक्तिश्च कथञ्चिदप्यवधारयितुं न शक्यते प्रामाणिकैः।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषदः ३६श वार्षिकमहोत्सवे
सभापतेः महामहोपाध्याय-श्रीयुतविधुशेखरशास्त्रि-महोदयानाम्

अभिभाषणम्

नमः सुहृद्भ्यश्च सदस्येभ्यश्च सर्वेभ्यः संस्कृतसाहित्यपरिषदः। शृण्वोत्वियं परिषन्निरावाधा विजयन्तां चैते पारिषद्याः। नूनमतिमहान् प्रसादः प्रणयश्च तेषां मयि। अन्यथा कामयमानोऽपि नत्वहमिहाभविष्यम्। सर्वथा साधुवादास्तेभ्यः परःसहस्राः। प्रत्यासन्नः सांवत्सरिक उत्सवोऽस्याः परिषदः। तत्र च सत्स्वप्येतावत्सु सुविश्रुतेषु विद्वत्सु किमित्ययमेवास्मिन्कर्मण्यामन्त्रित इति। न वेद्मि, किं मया कर्तव्यं वक्तव्यं वा, यद्रोचेत भवद्भ्यस्तदपि न मनागवगच्छामि। अथवा कृतं ममैतया विचारणया। प्रसीदतु भगवानन्तर्यामी। कारयतु च स मया यत्तस्य चेतसि।

नूनं काम्यः सर्वेषां स्निग्धजनसमागमः। ईदृशे चावकाशे निसर्गादेव कुशलोदन्तः पृच्छ्यते। अहमपि तदेव चिकीर्षामि। कथयन्तु कथयन्तु भवन्तः करुणया कच्चिद्वर्धतेऽस्माकं जीवातुभूता भगवती संस्कृतसरस्वती। कुशलिनो वा तेऽस्माकं सखायो ये किल कुलक्रमेण तदुपासनैकपरायणाः कथञ्चिज्जीवन्तोऽप्यनशनैकव्रतमेवोपयन्ति।

किं भोः! किं भवन्तस्तूष्णीमासते? अथवा कृतं प्रत्युत्तरेण। किं नु स्वस्त्युत्तरयितव्यम्। अनुक्तमपि ह्यवगम्यते सर्वम्। तथाप्यहं वक्ष्यामि यद्यनुमन्यन्ते भवन्तः। कच्चिद् वर्धते संस्कृतमित्येष नः प्रश्नः पुरतः। नायं पुनरेकान्तवचनीयः। विभज्य वचनीयस्तु भवन भवेत्। वर्धते संस्कृतं बहिर्भूतेषु भूभागेषु भारतात्। भारते तु हन्त हीयत एव प्रतिपदम्। किं कारणम्? अनेकं च तद्विचित्रं च। अशक्यं च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्व्याकर्तुमेकपदे । को वा तद्व्याकुर्यात् । व्याकृतं वा शृणुयान साम्प्रतम् ।

द्वया ह्यद्यत्वे संस्कृतविद्वांसः । प्राच्याश्च पाश्चात्याश्च । तत्र प्राच्या ज्यायांसः । पाश्चात्यास्तु कनीयांसः । न पुनस्तावतैव केचिदुत्कृष्यन्ते अपकृष्यन्ते वा । ज्यायांसोऽपि क्वचिन्नोत्कृष्यन्ते कनीयांसोऽपि चान्यत्रोत्कृष्यन्ते । न च शक्यं दृष्टमपह्नोतुम् । न च द्वेषात् । किञ्चिद्धित मधिगम्यते । तदुभयेप्येते मिथो वर्धन्ताम् । तथैव हि वृद्धिः संस्कृतस्य ।

इदं किञ्चिदवश्यवक्तव्यमिव प्रतिभाति । तद्भवन्त आकर्णयितुमर्हन्ति । नेश्वर आज्ञापयति । न वा धर्मसूत्रकाराः पठन्ति सर्वेऽप्येकेनैवाध्वना गच्छेयुरिति । नासीत्पूर्वमीदृशो विमान इति नैतेनापि कश्चित्कचिद् गच्छेत् । अथ स्यादयमेव निर्बन्धो नूनं भ्रश्येम वयमर्थाद् ऋच्छेम चानर्थं महान्तम् । इदमपि च किञ्चिद् वक्तव्यम् । अस्ति तदस्माकमनेकं यच्छक्यमकर्त्तुम् अन्यथा कर्त्तुमुपाकर्त्तुं वा सर्वथापि । सुविदितं सर्वेषामस्ति नः पश्यत्यादिपदम् । तच्च दृशेर्धातोः पश्यादेशादित्युपदिशन्ति न आचार्याः । नायं पुनस्तत्त्वोपदेशो भवति । न हि कदाचिदीश्वरोऽप्यादिशन घटं पटयितुमीष्टे । वस्तुतस्तु दर्शनार्थकस्य स्पशतेर्धातो लंटि पश्यति । लिटि पस्पशे । लुङि अस्पष्ट । प्रेरणायां स्पाशयतीत्यादि वैदिकेप्रयोगे । स्पष्टमिति चरार्थकश्च स्पश रति लौकिकेऽपि संस्कृते सर्वैर्ज्ञायते । महाभाष्यविदश्च पस्पशामविदित्वा न वैयाकरणा भवन्ति ।१

(क्रमशः)

---

१ । अयं चास्माकं स्पशिः Lat. spec.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

9. **Introduction to the Rigveda of Sayanacharya**—Edited by Dr. Pashupatinath Shastri, M.A. B.L. Ph. D. Re. 1-8 ; Re. 1-4 (for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. As.14; As. 10 (for members).

11. **Prabhakara-vijayam** of Nandishvara—Edited by Mahamahopadhyaya Anantakrishna Shastri Vedantavisharad and Pt. Ramanath Shastri. Rs. 2-8 ; Rs. 2 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya—Edited by Pt. Bamacharan Kavyatirtha. As 12 ; As 10 (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Prof. Chintaharan Chakravarti, M. A. Re 1-8 ; Re. 1-4 (for members).

14. **Nala-damayantiyam** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2-8 ; Rs. 2 (for members).

15. **Prashastapada-bhashyam**—Edited by MM. Kalipada Tarkacharya. Rs. 4 ; Rs. 3. (for members).

16 **Yatratattvam** of Raghunandana Bhattacharya—Edited by Pt. Dwarikanath Nyayashastri. Rs. 2. ; Re. 1-8 (for members).

17. **Rik-pratishakhyam**—Ed. by Dr. Pashupatinath Shastri, M.A., B.L., Ph.D with the assistance of Prof. Chintaharan Chakravarti, M.A. Rs. 5 ; Rs. 4 (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Prof Akshayakumar Shastri. Re. 2 8 ; Rs. 2 (for members).

19. **Chhandogyamantrabhashyam** of Gunavishnu—Ed. by Prof. Durgamohan Bhattacharya, M. A. Rs. 7-8 ; Rs. 6 (for members). [out of stock]

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by MM. Kalipada-Tarkacharya. Rs. 7. ; Rs. 6 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Prof. Chintaharan Chakravarti, M.A. Re. 1-4 ; Re. 1 (for members).

22. **Prasanta-ratnakaram** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2 ; Re. 1-8 (for members).

23. **Devisatakam** of Mahamahopadhyaya Krishnanath Sarvabhauma —Ed. by Pt. Janakinath Shastri. As. 12 ; As. 10 (for members).

24. **Sataranja Kutuhalam**:—Ed. by Prof Chintaharan Chakravarti Kavyatirtha M.A., As. 8

25. **Satyanubhavam**:—(a new MahaKavya) of MM. Kalipada Tarkacharya, Rs. 5 ; Rs. 4-8 (for members).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



विशेषतो द्रष्टव्यम्

अयि परिषत्प्रणयिनो ग्राहकमहोदयाः !

वर्षस्यास्य वार्षिकं देयं यैर्नाद्यापि परिशोधितं तैरवश्यं सत्वरं तत् (annual subscription) संप्रेष्य परिषत्कार्यालयस्य सौकर्यं विधातव्यमिति सविनयं विज्ञाप्यते

परिषत्-सम्पादकैरिति

Printed by Bishnupada Bhattacharya M. A Kabyatirtha. at Calcutta Oriental Press, Ltd., 9, Panchanan Ghose Lane, Calcutta and Published by the same from Sanskrit Sahitya Parishad, 168/1 Raja Dinenda Street, Shyambazar, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C 1073

Vol. XXXVI. | Fabruary 1954

No. 10 | १८७५-शकीये

३६श-वर्षस्य | माघे

१०म संख्या | मासे

संस्कृत साहित्य परिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकौ

श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः

श्रीरामधनशास्त्री काव्य-व्याकरण-पुराणतीर्थश्च

संस्कृत-साहित्य-परिषत्
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—रूप्यकषट्कम् ६।
Foreign price—1-4s

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्किञ्चिदावेदनम्

प्रियपाठकमहाभागाः !

जानन्त्येव भवन्तो यत् परिषदियं कियतः कालात् प्रागात्मप्रतिष्ठायै कलिकाता-पौरसभादत्तं किञ्चित् स्थानमधिगत्य तत्रात्मनो वासगृहं रचयितुमारभ्यापि किञ्चिन्मात्रं निर्मायैव महासमरसम्भूतदौर्मूल्यादिभिः कारणैरर्थाभावेन च महता नारब्धं समापयितुं समर्थेति ।

तत् प्रियतमामिमां परिषदं यदि श्रीमन्तः प्रतिष्ठावतीं प्राणवतीञ्च द्रष्टुमिच्छन्ति, तदा सदयं प्रेषयन्तु यथाशक्ति साहाय्यं वक्ष्यमाणसङ्केतेन परिषत्-प्रणयिन्याः कल्पितप्रासादनिर्माणपरिसमाप्त्यर्थमिति ।

सङ्केतः—संस्कृत-साहित्य-परिषत्-सम्पादकः,

१६८।१, राजा-दीनेन्द्रष्ट्रीट्, कलिकाता-४

Sanskrit Sahitya Parishat Series

(Revised up to April, 1951)

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (out of Stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1-4 ; Re. I. (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshinacharan Bhattacharya. (out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kalipada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. 2 (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshina charan Bhattacharya. Rs. 2-8 ; out of stock.

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satish handra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinath Sahityashastri. As. 4.

(Cont. to Cover 3rd Page)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषत्-पत्रिका

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

Vol. XXXVI. No. 10. | १८७५-शकीये माघे ३६श-वर्षस्य १०म-संख्या | Fabruary 1954.

मतिमञ्जरी

कल्याणी वाणी

[निबन्धकः—श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः]

मासेऽस्मिन् वङ्गप्रान्ते कलिकातामहानगर्य्या उपकण्ठ एव कल्याणीति-कृतनामधेयायां नगर्य्यां निखिलभारतीयजातीयपरिषदः सगौरवं महा-सम्मेलनं जातम् । तत्र राष्ट्रप्रधानसचिवानां पण्डित-श्रीनेहेरुमहोदयानां सभापतिरूपेण सुभाषिता वाणी सर्वथा कल्याणजननी जनचित्तप्रसादिनी च । वाणी प्रायः कल्याणी भवति विचक्षणानां किन्तु तामेवानुसरन्तो जना यदि कल्याणपरम्परां समधिगच्छेयुस्तदैव तस्याः कल्याणजननीत्वं—नान्यथा । गणतन्त्रीये राष्ट्रे गणैः सह राष्ट्रस्य सम्बन्धः सविशेष-मपेक्षितः । स च सम्बन्धः साम्प्रतं पराधीनकालवदेवास्त इति महादुःख-कारणं दुनोति सन्ततं सचेतसां चेतांसि । इदं तावदाशास्थानं यदेतै र्महाभागैर्देशस्य समाजस्य च परिस्थितिं सम्यगवबुध्य तत्र तत्र समुत्पन्नानां दोषराशीनां समुन्मूलनाय प्रयत्यते, समाकृष्यते च दृष्टिर्जातीयपरिषदः सदस्यानाम् । यदीयं परिषत् लोकसेवायां महात्मना गान्धीमहोदयेन प्रवर्तितां तामेव जनचित्तप्रसादिनीं नीतिं नानुगच्छेत् तदा कुतः कल्याणम् ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
कुतो वा समाश्वासः ? परामर्य पारषत् क्रमशः क्षीणक्षीणा कृत्यसम्पादनाक्षमा भवितेति नास्ति सन्देहावसरः। अद्यत्वे समग्रा पृथिवी शान्तिलाभाय भारतराष्ट्रस्य वैशिष्ट्यं जानतीव तन्मुखापेक्षिणी वर्तते, तत्र यदि भारतीया आत्मकलहव्यापृताः स्युस्तदा का वाशाऽस्माकं सम्मानलाभस्य गौरवार्ज्जनस्य गुरुपदाधिष्ठानस्य च। देशमातृकाया मर्य्यादा यदि रक्षिता न भवेत तदास्माभिः कुपुत्रप्रायैर्भारवत्येव भारतजननी त्युभयत्र व्रीड़ास्पदैर्भवितव्यम्। अप्यस्त्यस्माकं काचन लज्जा ? अपि वयं साक्षात्तत्त्वद्रष्टॄणां परोपकृतये तुच्छीकृतप्राणानामृषीणां वंशजाताः ? यथा पाश्चात्त्यसभ्यतयाऽस्माकं चित्तं दूषितं तथैव किमस्माकं शोणितमपि दूषितं—येन वयमकार्य्यं प्रवर्तामहे।

अतः "शृण्वन्तु" "अमृतस्य पुत्राः" "त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्" "क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ" परेषामन्तः शत्रूणां वहिःशत्रूणाञ्च पीड़नेन "परन्तपो" भवेति परमेशसमीपे प्रार्थ्यते। स एव सर्वेभ्यः सद्बुद्धिं प्रदाय सर्वान् योग्यान् मनुष्यपदवाच्यान् विदधातु।

वानराष्टकम्

[संग्राहकः—श्रीदुर्गादासगोस्वामी एम. ए. काव्यव्याकरणतीर्थः]

सुजीर्ण-मूर्ख-माधुर्य्यं शास्त्रवृक्षश्च पञ्चमम्।
वैद्यं विपत्तथारोग्यं वानराष्टमिदं क्रमात् ॥

सुजीर्णमन्नं, सुविचक्षणः सुतः, सुशासिता स्त्री, नृपतिः सुसेवितः।
सुचिन्त्य चोक्तं, सुविचार्य्य यत् कृतं, सुदीर्घकाले न च याति विक्रियाम् ॥
मूर्खो द्विजातिः, स्थविरो गृहस्थो, मानी दरिद्रो, धनवाँस्तपस्वी।
वेश्या कुरूपा, नृपतिः कदर्य्यो, लोके षड़ेतानि विड़म्बितानि ॥२॥

माधुर्य्यं प्रमदाजनेषु ललितं, दाक्षिण्यमार्य्ये जने,
शौर्य्यं शत्रुषु, मार्दवं गुरुजने, धर्म्मिष्ठता साधुषु।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्म्मज्ञेष्वनुवर्त्तनं, बहुविधो मानो जने पण्डिते,
शाठ्यं पापजने, जनस्य कथिताः पर्य्याप्तयेऽष्टौ गुणाः ॥३॥
वृक्षं त्यक्तफलं त्यजन्ति विहगाः शुष्कं सरः सारसाः
पुष्पं पर्य्युषितं त्यजन्ति मधुपा दग्धं वनान्तं मृगाः ।
निर्द्रव्यं पुरुषं त्यजन्ति गणिका दुर्म्मन्त्रिणं.....ः
सर्व्वे कार्य्यवशात् त्यजन्ति सकलं कः कस्य वा वल्लभः ॥
शुष्केन्धने वह्निमुपैति (वह्निरुपैति ?) वृद्धिं
बालेषु शोकश्चपलेषु रोगः ।
कान्तासु कामो निपुणेषु वृत्ति—
र्हया दयावत्सु महत्सु धैर्य्यम् ॥६॥
जवो हि सप्तेः परमं विभूषणं त्रपाङ्गनायाः कृशता तपस्विनः ।
द्विजस्य विद्यैव मुनेरपि क्षमा पराक्रमः शस्त्रबलोपजीविनः ॥७॥
दुर्म्मन्त्रिणं कमुपयान्ति न नीतिदोषाः सन्तापयन्ति कमपथ्यभुजं न रोगाः ।
कं श्रीर्न दर्पयति कं न निहन्ति मृत्युः कं स्त्रीकृता न विषयाः परितापयन्ति ॥८॥

इति वानराष्टकं समाप्तम् ॥

अस्मिन् खलु वानराष्टके प्रारब्धे "सुजीर्णमूर्खं"त्तादिना श्लोकेन यः क्रमो निर्दिष्टः, स तु षष्ठसप्तमाष्टमेषु न दृश्यते, चतुर्थः श्लोकोऽपि नोपलभ्यते। "वृक्षं त्यक्तफल"मित्यादिः श्लोको यद्यपि प्राप्तक्रमानुसारेण पञ्चम इति गम्यते, तथापि आदर्शे तत्र श्लोकाङ्को न लक्ष्यते । इति संग्राहकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थविमर्शदर्शनम्

(पूर्वानुवृत्ति)

[निबन्धकः—श्रीनिरञ्जनस्वरूपब्रह्मचारी अष्टतीर्थ-न्यायवेदान्ताचार्यः]

किञ्च, मा सन्तु प्रत्यक्षश्रुतिषु मायापदानि तदर्थकानि, तथाप्यनुमितश्रुतय एव मायापदस्य तदर्थकत्वं ग्राहयिष्यन्तीति किमनुपपन्नं भवेत्। प्रायशः श्रीमद्भागवतदेवीभागवतब्रह्मवैवर्त्तपुराणादिषु सर्वेष्वेवाद्वैततत्त्वप्रतिपादनात्, तैस्तैः स्मृतिवचनैश्च तादृशार्थतात्पर्यकश्रुतीरनुमाय तत्प्रतिपाद्यत्वं तादृशमायायाः सुखमेवावधारयितुं शक्यत इति किमनुपपन्नं भविष्यति। न हि सर्वा एव श्रुतयोऽधुना लभ्यन्ते, नाप्येतावन्त एव श्रुतिमन्त्रा इत्यप्यवधारयितुं शक्यते। भट्टपादैरपि तन्त्रवार्तिकग्रन्थे स्मृत्यादिपादेष्वसकृद् बह्वीनां श्रुतीनामनुपलब्धत्वमुक्तम्, किमु वक्तव्यमिदानीं तासामनुपलभ्यमानत्वे। न वा सामवेदस्य सहस्रशाखीयसंहितारण्यकोपनिषदो वेदान्तराणाञ्च तास्ताः परिगणिता इदानीमुपलभ्यन्ते, अष्टोत्तरशतोपनिषदां कतिपयसंहितारण्यकानामेवोलभ्यमानत्वादिति तैस्तैरेव तावच्छाखीयवाक्यशतैः सदसद्विलक्षणा माया प्रतिपादिता भविष्यतीति, तस्याः श्रुत्यसिद्धत्वप्रतिपादनं विमर्शकस्याविचारितरमणीयम्।

वस्तुतस्तु—'इन्द्रो मायाभिः पुरुरूप ईयते' "मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्" 'भूयश्चान्ते विश्वमायानिवृत्तिः' 'न सती नासती न सदसती' इत्यादिप्रत्यक्षश्रुतयोऽपि प्रमाणान्तरसिद्धसत्ताकां मायामनूद्य तस्या अनिर्वचनीयत्वमप्यनुवादेन समर्थयन्त्यः सदसद्विलक्षणत्वलक्षणानिर्वचनीयत्वानुमाने प्रयोजकीभूय तदीयहेतुमसत्प्रतिपक्षीकुर्वन्ति। यथैक एवैन्द्रजालिक इन्द्रजालं विना नानारूपेण प्रतीयमानो न भवितुमर्हति, तथैवैकस्यैवेन्द्रस्य परमेश्वराभिन्नस्य नानारूपेण प्रतीयमानत्वमिन्द्रजालसदृशमायां विना न सम्भवति, वस्तुस्वरूपावरणपूर्वकतदन्यथारूपप्रत्यायकत्वरूपमिन्द्रजालसादृश्यं मायायाः प्रदर्श्यानिर्वचनीयशक्तयात्म-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
कत्वं प्रतिपादयति श्रुतिः। न ह्येकस्यैव नानारूपत्वं वास्तविकं भवितुमर्हति, नापि तदनुकूलशक्तेरपि वास्तविकत्वम्। एवं तत्त्वसाक्षात्कारेण मायानिवृत्तिप्रतिपादनेन तस्या अविद्यात्वं, मायात्मिकाया अविद्यायाः स्वरूपे आशङ्कानिवृत्त्यर्थं तस्याः सदसद्विलक्षणानिर्वचनीयत्वं, तस्या एव जगदुपादानकारणीभूतप्रकृतित्वं च प्रतिपादयन्त्यः श्रुतयो जगन्माययोरुभयोरेव मिथ्यात्वमवधारयन्ति। न हि क्वचित् कर्मपरतायाम् उपलभ्यमानायामविद्याशब्दस्य स एव शक्यार्थ इत्यवधारयति कश्चित्, अपि तु तात्पर्यबाधाल्लक्षणयैव तमर्थं बुध्यते, न हि व्युत्पन्नः कश्चिदप्यविद्येत्युक्ते कर्मेति प्रतिपद्यते। अनादिव्यवहारेण श्रुत्यनुकूलशास्त्रीयवचनशतैश्च विद्याविरोधिनि भावरूपे वस्तुन्येव तस्य समुदाय शक्त्यवधारणाद् ज्ञानाभावोऽपि योगार्थ एव न योगरूढः, सम्भवति योगरूढेऽर्थे न योगार्थो ग्राह्य इति प्रथमतो योगरूढ एव तस्यार्थो ग्रहीतव्यः; तेन तात्पर्यानुपपत्तौ योगार्थो लाक्षणिकार्थो वा ग्रहीतुं शक्यते, न तु स्वेच्छया। कर्मापि न साक्षाद्विद्याविरोधि, तस्य वैयधिकरण्यात्, तस्मिन् तज्ज्ञाने वा विद्यमानेऽपि तदाश्रयस्य तत्त्वसाक्षात्कारदर्शनात्, यच्च श्रुतिप्राप्तं विद्यायाः कर्मनाशकत्वं तदपि तन्मूलीभूताविद्यानाशद्वारेति न्यायमूलकमेव, न तु वाचनिकम्। 'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः' इत्यादिभगवद्वचनेनाज्ञानस्य ज्ञानावरकत्वमोहजनकत्वयोः प्रतिपादनात्। मोहस्य च विपरीतज्ञानजनकत्वस्य चार्जुनविषादेन प्रतिपादनात्। एतेनाविद्यार्थकाज्ञानस्य वस्तुस्वरूपावरणपूर्वकविपर्ययजनकत्वं प्रतिपादितं भवति। तदेव श्रुतिष्वपि प्रतिपादितमिति सुसिद्धं खलु भवत्यविद्यायाः श्रुतिसिद्धत्वम्। अतो विमर्शकाभिप्रायः कथं सिध्येदिति सुधीभिरेव विभावनीयम्। यासां किल श्रुतीनां तेन स्वमनीषानुरूपोऽर्थो गृहीतस्तासां सर्वेषामेवाद्वैतवादानुकूलव्याख्यानमाचार्यशङ्करचरणैः कृतमेव वरीवर्ति, अतः कृतं नो व्यर्थश्रमेण। विमर्शकस्य सर्वस्यैव व्याख्यानस्यापव्याख्यानत्वं प्रतिपादयितुं शक्तेनापि मया प्रबन्धविस्तरभयान्न वितन्यते। यावत्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
द्वचसामपव्याख्यानत्वं प्रदर्शितं मया, तेनवावशिष्टानामपि तथात्वं सुधीभिरवधारयिष्यत एवेत्याशासे। द्वैतप्रतिपादिकानामपि श्रुतीनां, न द्वैते तात्पर्यमवसीयते, अपि त्वद्वैत एवेति तु प्रागेव समाहितमिति 'ग्रन्थ-विमर्शस्य' मर्शनादत्रैव विरमाम इति शम्।

शङ्करेतिहासविवेकविमर्शः।

शङ्करेतिहासविवेके विमर्शकवरेण नारदस्य हिरण्यगर्भादिलोकगमनादिशिवप्रवेशान्तस्य शङ्करेतिहासस्य कल्पनाजालत्वप्रतिपादने लोकशास्त्रप्राप्तत्वान्यतराभावो हेतुत्वेनोपदर्शितः। तादृशान्यतराभावस्य कल्पनाजालत्वव्याप्यत्वस्वीकारे शास्त्राप्राप्तातीतविषयकस्य सर्वस्यैवेतिहासस्याधुनिकलोकप्राप्तत्वाभावादप्रामाण्यं प्रसज्यते। न हि तत्तद्देशप्रसिद्धनानककबीरतुलसीदासत्रैलङ्गस्वामिभास्कराचार्यलोकनाथब्रह्मचारिरामकृष्णविजय-कृष्ण-श्रीकृष्णचैतन्यमहाप्रभुप्रभृतीनां शास्त्रप्राप्तत्वमस्ति, न वा लोकतोऽपि प्राप्तत्वं, येन तदितिहासानां प्रामाण्यं स्यात्। लोकप्राप्तत्वं यदि लोकमात्रोक्तत्वं, न त्वधुनातनकालेऽपि वर्त्तमानत्वं, तदा लोकमात्रोक्तो यः कश्चिदप्रामाणिकोऽपीतिहासः प्रमाणं स्यात्। इष्टापत्तौ कोऽपीतिहासः अप्रमाणं न तिष्ठेदिति किमपराद्धं शङ्करेतिहासेन, येन स प्रमाणं न भवेत्? यदि किल प्रामाणिकलोकप्राप्तत्वं तत्, तदा श्रीकृष्णचैतन्यमहाप्रभुप्रभृतीनामस्तित्वमपि न निर्णीयेत। यैर्लोकैस्तदितिहासो लिखितस्तेषां प्रामाणिकत्वस्याद्याप्यनिरूपणात्। यथैकसम्प्रदायगतेतिहासलेखकानामनन्तानन्दानामप्रामाण्यमन्यान् प्रति, तदा तेषामप्यन्यान् प्रति प्रामाण्यं न सेत्स्यतीति कः सन्देहः। न हि किञ्चिल्लेखनमेव प्रमाणं. प्रामाण्यप्रयोजकं वा, लेखनस्य स्वरूपतः प्रामाण्याभावात्, आप्तोक्तत्वेनैव प्रामाण्यात्, आप्तत्वञ्च तेषां विवादास्पदम्, अतो वेदविदुक्तत्वेनाप्तोक्तत्वं निश्चित्य तदुक्तेतिहासानां प्रामाण्यमास्थेयम्; तद् यदि श्रीजीवसनातनगोस्वामिपादानां स्यात्, किमपराद्धमनन्तानन्दादीनां तत्त्वेन। वरं शङ्करेतिहासलेखका अनन्तानन्दमाधवाचार्याः प्रमाणमेव, तेषां वैदिकत्वे सन्देहविरहात्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीकृष्णचैतन्यमहाप्रभुप्रभृतीनामपि हस्तलिखितानामस्तु वैदिकत्वे किमप्यस्ति प्रमाणमिति तेषामेवाप्रामाण्यमस्तु ; वैदिकानामेव वचनाचारयोः प्रामाण्यस्य मनुनोक्तत्वादिति विमर्शकधौरेयः स्वखात एव सलिले स्वयमेव निमज्जति ; ततखण्डनस्यापि सर्वस्याप्रामाण्येनाफलत्वमेवेत्यहो दुरुद्धरणं विमर्शकस्योत्पश्यामः । पुनरप्यधिकं ततपाण्डित्यं प्रकटीभवति शास्त्राप्राप्तत्वस्याप्रामाण्यहेतुतयोपवर्णनेन । न हि शास्त्राप्राप्तत्वमात्रमप्रामाण्ये प्रयोजकमपि तु शास्त्रविरुद्धत्वम् । अन्यथा विमर्शकानां तद्बन्धूनाञ्च जन्मकर्मनिवासानां दृष्टानामपि प्रामाण्यं न स्यात् शास्त्राप्राप्तत्वात् । अहो पाण्डित्यं विमर्शकस्य यद् व्यभिचारिणापि हेतुना प्रामाण्यं प्रतिपादयितुमिष्यते, समाटोपस्तु प्रकाश्यते । महत्तरञ्चैतदपरं दुःसाहसं प्रदर्श्यते, यदेतच्छङ्करावतारकथायाः प्रक्षिप्तत्ववर्णनम् । यदि किल शिवपुराणान्तर्गताया अपि श्रीशङ्करावतारकथायाः प्रक्षिप्तत्ववर्णनं क्रियेत, तदा काशङ्का सर्वपुराणबहिर्गतानां श्रीकृष्णचैतन्यमहाप्रभुप्रभृतीनां प्रक्षिप्तत्वाप्रमाणत्वविषये ; किन्तु तत्र तत्राप्रामाण्यप्रक्षिप्तत्वयोराशङ्का विमर्शकहृदयं नाकुलीकरोतीत्याश्चर्यमिव प्रतिभाति, यतः साम्प्रदायिकेतिहासमात्रस्योक्तयुक्त्या तादृशशङ्काकुलत्वात् । अतो विमर्शकः स्वखात एव गर्त्ते स्वयमेव पतन्नपि नावबुध्यत इति चित्रम् ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीचैतन्यचरितामृतसंस्कृतानुवादः

(पूर्वतोऽनुवृत्तः)

अनुवादकः—श्रीभास्करानन्दस्वामी ।

श्रीश्रीचैतन्यचरितामृत आदिलीलायां

चतुर्थः परिच्छेदः

कृष्णस्य प्रेमसेवाया ऋते नाददते क्वचित् ।
सालोक्यादि स्वसौख्यार्थं तद्भक्ताः शुद्धचेतसः ॥

"तथाहि श्रीमद्भागवते ३।२९ शाध्याये देवहूतिं प्रति कपिलवाक्यम्—

"मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये ।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ ॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् ।
अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ॥३४॥"
सालोक्य-सार्ष्टि-सामीप्य-सारूप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥३५॥"

"तथाहि तत्रैव ९।४थाध्याये दुर्वाससं प्रति श्रीभगवद्वाक्यम्—

"मत्सेवया प्रतीतं ते सालोक्यादि चतुष्टयम् ।
नेच्छन्ति सेवया पूर्णाः कुतोऽन्यत् कालविप्लुतम् ॥३६॥"
विहीनः कामगन्धेन गोपीप्रेमा स्वभावजः ।
निर्मलः प्रोज्ज्वलः शुद्धो दग्धजाम्बूनदोपमः ॥
सहाया गुरवः सख्यः प्रेयस्यो बान्धवाः प्रियाः ।
गोप्यो भवन्ति कृष्णस्य दास्यः शिष्याश्च सर्वथा ॥

"तथाहि लघुभागवतामृते उत्तरखण्डे गोपीप्रेमामृते ३२ शाङ्खधृतादि-पुराणे श्रीकृष्णवाक्यम्—

"सहाया गुरवः शिष्या भुजिष्या बान्धवाः स्त्रियः ।
सत्यं वदामि ते पार्थ गोप्यः किं मे भवन्ति न ॥३७॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोपिका एव कृष्णस्य मनसो वाञ्छितं विदुः ।
प्रेमसेवनपर्यायं तस्य चाभीष्टमीहितम् ॥

"तथाहि लघुभागवतामृते उत्तरखण्डे गोपीप्रेमामृते ३५ शाङ्कधृतादि-पुराणे श्रीकृष्णवाक्यम्—

"मन्माहात्म्यं मत्सपर्यां मच्छ्रद्धां मन्मनोगतम् ।
जानन्ति गोपिकाः पार्थ नान्ये जानन्ति तत्त्वतः ॥३८॥"
तासु सर्वासु गोपीषु श्रेष्ठा राधैव चाधिका ।
सौभाग्येन च रूपेण प्रेम्णा च गुणसम्पदा ॥

"तथाहि लघुभागवतामृत उत्तरखण्डे भक्तामृते ४१ शाङ्कधृत-पद्म-पुराणम्—

"यथा राधा प्रिया विष्णोस्तस्याः कुण्डं प्रियं तथा ।
सर्वगोपीषु सैवैका विष्णोरत्यन्तवल्लभा ॥३९॥"

"तथाहि लघुभागवतामृते उत्तरखण्डे गोपीप्रेमामृते ४३ शाङ्कधृतादि-पुराणेऽर्जुनं प्रति श्रीकृष्णवाक्यम्—

"त्रैलोक्ये पृथिवी धन्या यत्र वृन्दावनं पुरी ।
तत्रापि गोपिकाः पार्थ यत्र राधाभिधा मम ॥४०॥"
श्रीराधया सह क्रीड़ा रसवर्द्धनकारणम् ।
अन्या या गोपिकाः सर्वा रसोपकरणानि ताः ॥
कृष्णस्य वल्लभा राधा कृष्णप्राणधनानि सा ।
तां विना गोपिकाः सर्वा न तस्य सुखहेतवः ॥

"तथाहि श्रीगीतगोविन्दे ३।१म श्लोके जयदेववाक्यम् ।

"कंसारिरपि संसारवासनाबद्धशृङ्खलाम् ।
राधामाधाय हृदये तत्याज व्रजसुन्दरीः ॥४१॥"
तद्राधाभावमादाय चैतन्योऽवातरत् प्रभुः ।
युगधर्मं तथा नामप्रेमाणौ पर्यशिक्षयत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राधाभावेन वाञ्छाः स्वास्तिस्रोऽपि पर्यपूरयत् ।
ता वाञ्छा अवतारस्य प्रधानतमकारणम् ॥
कृष्णचैतन्यदेवो हि व्रजेन्द्रनन्दनः स्वयम् ।
कृष्णो रसमयाकारः शृङ्गारो मूर्त्तिमानसौ ॥
तद्रसास्वादनायैव स्वावतारं चकार सः ।
तत्र रससमूहानां प्रचारोक्तानुषङ्गिकः ॥

"तथाहि श्रीगीतगोविन्दे १।११श श्लोकः—

"विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवर-
श्रेणीश्यामलकोमलैरुपनयन्नङ्गैरनङ्गोत्सवम् ।
सच्छन्दं व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः
शृङ्गारः सखि मूर्त्तिमानिव मधौ मुग्धो हरिः क्रीड़ति ॥४२॥"

कृष्णचैतन्यगोस्वामी रसानामेक आश्रयः ।
अशेषेण विशेषेण स्वादयन्निखिलान् रसान् ॥
प्रावर्त्तयत्तया द्वारा युगधर्मान् कलौ युगे ।
एतानि सर्वमर्माणि विदुश्चैतन्यकिङ्कराः ॥
प्रभुरद्वैत आचार्यो नित्यानन्दप्रभुः स्वयम् ।
दामोदरो मुरारिश्च श्रीनिवासो गदाधरः ॥
हरिदासश्च ये भक्ताश्चैतन्यस्यापरे जनाः ।
तेषां चरणपद्मानि भक्त्या गृह्णामि मूर्द्धनि ॥
अर्थः श्लोकस्य षष्ठस्य साभासो विवृतो मया ।
अर्थः प्रकाश्यते मूलश्लोकस्य श्रूयतामयम् ॥

"तथाहि श्रीरूपगोस्वामि-कड़चोद्धृतः श्लोकः—

"श्रीराधायाः प्रणयमहिमा कीदृशो वानयैवा-
स्वाद्यो येनाद्भुतमधुरिमा कीदृशो वा मदीयः ।
सौख्यञ्चास्या मदनुभवतः कीदृशं वेति लोभा-
त्तद्भावाढ्यः समजनि शचीगर्भसिन्धौ हरीन्दुः ॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिद्धान्तानां समूहोऽयं गूढो वक्तुं न युज्यते ।
न मात्रामप्यनुक्तस्य प्रष्टुं शक्नोति कश्चन ॥
अतो निगूढभावेन कथयिष्यामि किञ्चन ।
वेत्स्यन्ति रसिका भक्ता न तु मूढाः कथञ्चन ॥
येषां चेतसि चैतन्यनित्यानन्दौ विराजतः ।
एतैः सर्वैश्च सिद्धान्तैर्विन्दन्त्यानन्दमेव ते ॥
ते सिद्धान्तरसा एते सहकारस्य पल्लवाः ।
भक्तकोकिलसङ्घस्य सर्वदा वल्लभा मताः ॥
एषां गन्धो न लभ्येत यद्यभक्तक्रमेलकैः ।
तदा चित्ते ममानन्दः स ज्ञायेत विशेषतः ॥
यस्मै प्रकाशनाद्भीतिर्यदि जानाति नैव सः । ॥४२॥
इत्यतोऽन्यत् परं सौख्यं विद्यते किं जगत्त्रये ॥
अतो भक्तजनान् सर्वान् नमस्कृत्य पुनः पुनः ।
निःशङ्कं कथयिष्यामि सर्वमस्तु चमत्कृतम् ॥
अन्तर्हृदयमध्यास्ते कृष्णस्यैका विचारणा ।
पूर्णानन्दं तथा पूर्णरसरूपञ्च मां विदुः ॥
प्राप्नुवन्ति त्रयो लोका आनन्दं मत्त एव ते ।
यो दद्यान्मह्यमानन्दं तादृशः को जनो भुवि ॥
यस्यानन्दो ममानन्दाद्वर्त्तते शतशो गुणः ।
मम चित्तं स एवैक आह्लादयितुमर्हति ॥
न सम्भवति लोकेषु यो मत्तो गुणवत्तरः ।
स जनो राधिका नूनमेकैवेति मतं मम ॥
अपि चेन्मामकं रूपं कोटिकामपराजयि ।
यस्यासमोर्द्ध्वमाधुर्यं राधारूपं तदेव तु ॥
आप्याययति मद्रूपं यद्यप्येतां जगत्त्रयीम् ।
श्रीराधादर्शनेनैव तृप्यतो नयने मम ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेणुस्वरेण गीतश्च मयैवाकृष्यते जगत् ।
राधिकावचनेनैव ह्रियेते श्रवणे मम ॥
जगत् सौरभितं सर्वं मम गन्धेन यद्यपि ।
राधाया अङ्गगन्धो मे चेतो घ्राणे च कर्षति ॥
ममैव रसमादाय त्रिलोकी सरसापि चेत् ।
राधाधररसेनैव सर्वदास्मि वशीकृतः ॥
यद्यप्ययं मम स्पर्शः कोटिचन्द्रसुशीतलः ।
राधाङ्गस्पर्शलेशो मां सुशीतलयति क्षणात् ॥
त्रिलोक्या अहमेवैवं सुखलाभाय कारणम् ।
गुणा रूपञ्च राधाया मम जीवनहेतवः ॥
एवमेव प्रतीतिर्मे तथैवानुभवोऽपि मे ।
विचार्य यदि पश्यामि भाति सर्वविपर्ययः ॥
यद्यपि तृप्यतो नेत्रे मम राधाविलोकनात् ।
मद्दर्शनसुखाद्राधा लुप्तसंज्ञा भवत्यहो ॥
कीचकस्वनमाकर्ण्य वेणुबुद्ध्यास्तचेतना ।
तमालञ्च मम भ्रान्त्या गाढमाश्लिष्य तिष्ठति ॥
कृष्णस्यालिङ्गनं प्राप्य जननं मम सार्थकम् ।
इत्येवं सुख-संमग्ना भुजाभ्यां वेष्टते तरुम् ॥
अनुकूलेन वातेन गन्धं प्राप्नोति चेन्मम ।
भवत्युत्पतितुं व्यग्रा प्रेम्नान्धीभूतलोचना ॥
सा चेत्ताम्बुलकेलां मे समास्वादयति क्वचित् ।
आनन्दसागरे मग्ना न किञ्चिद्बोद्धुमर्हति ॥
लभते सा यमानन्दं राधिका मम सङ्गमात् ।
उक्त्वा वक्त्रशतेनापि तस्यान्तं सा न गच्छति ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिभाषणम्

(पूर्वानुवृत्तम्)

अन्यदपि दृश्यताम्। इण् गतावित्यस्य धातोर्लुङि अगादित्यादि पदं वयं जानीमः। कथं नु खल्वेतत्पुनर्निष्पद्यते। स्यादेतत् कदाचित्कुत्रचित्कस्यचित् सिद्धस्यैन्द्रजालिकस्य वा वचनात्। न पुनर्व्याकरणादिषु विषयेषु। अन्यथा सर्वत्रानाश्वासप्रसङ्गो भवति। मैवं भोः मैवं मंस्थाः। न खल्वाचार्यो नस्तथा जडधीर्बभूव यथेकारो नाम वस्तुत एव गाभावमापद्यतेति तन्मतिरुदपद्यत। कामं दूरमेतदपास्ताम्। उपायकौशल्यं त्वति महदाविष्कृतमीदृशेषु स्थानेष्वाचार्यस्य। किं नामोपायकौशल्यम्? इदं तत्। उपायो नाम मे लघुर्भविष्यति। शब्दांश्च तेनाहं महत उपदेक्ष्यामि। शिष्यश्च गुरुश्चेत्युभावपि तेन महता लाभेन युज्येते इति। अन्यास्वपि वाक्षु एवं प्रयोजनवशात् क्रियत इति न केवलमयमेवाचार्योऽस्माकमुपालम्भनीयो भवति।[1]

दृशेः स्थाने पश्यादेशस्य नायमभिप्रायी यद्ध्वनिपरिवर्तनाद् दृशिः पश्याकारं धत्ते। अपि तु तत्स्थाने पश्यरूपं पाठ्यमिति। लोकस्तु तत्तथा नानुसरन् मुह्यति च भ्राम्यति च।

एवं परिहृतेऽपि नायं पक्ष आचार्यस्य सर्वथा निरवद्य इति प्रतीयते। इत्थमेव पाघ्रास्थाधातूनां यथाक्रमं पिब-जिघ्रतिष्ठा आदेशा इत्युच्यते। वस्तुतस्त्वेते धातवोऽत्राभ्यस्ता इत्येव वदन् युक्तवादी भवेत्। एवं जक्षादयो

---

1 तद्यथा आङ्गलवाचि (०) गो क्रियाया वर्तमाने प्रथमपुरुषैवचने he goes इति भवति। अतीते तु he went.

इति सर्वे ब्रुवन्ति। न पुनरेतज्जातु वस्तुतः सम्भवति गोपदात्। तत्तु went पदं गमनार्थकात् went इत्यपरस्मात्पदादुत्पन्नम्। एवं फान्स् वाचि elre क्रियात अहमस्मीत्यर्थे (je suis)। अहमभवम् इत्यर्थे तु je fus। नैते क्रियापदे एकस्मात् क्रियापदात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
धातवोऽनभ्यस्ता एव घसादयो नान्ये। घसिर्धातुरपि वस्तुतो ग्रसिरेव नापरः। परुषश्वासानुप्रदानेन रकारयोगादल्पप्राणो गकारो महाप्राणो घकारः सम्पन्नः। अलं पुनरद्यातिविस्तरेण।

उक्तं प्राक् किमप्यधिकृत्यादेशम्। पुनरपि च वक्तव्यं स्तोकम्। तथैव हि प्रवर्त्तयति मामेष विषयः। इदमुच्यते अस्थिशब्दस्य तृतीयादि-वचनेषु अस्थ्नेत्यादीनि पदानि भवन्तीति। अवितथं चेदमिति शास्ति न आचार्यः ("अस्थि दधीत्यादि" ७, १, ७५)। भवन्त्यत्रास्थ्नेत्यादीनि पदानि। कथं पुनरेतेषु पदेषु (अस्थ्ना-दध्ने त्यादिषु नकारयोगः। न खलु निपुणमतिरपि कश्चिद् रात्रिंदिवमनुसन्दधानो नकारमिह पश्येदाक्रन्दन्नुच्चै-स्तराम्। वस्तुतस्तु नात्र कदाचिदनङ् आदिश्यते। अन्योन्यं भिद्येते एतौ शब्दावेकार्थौ"। अस्थीतीकारान्तः। अस्थन्निति तु नकारान्तश्च। अस्मादेव अस्थिमदित्यर्थे अस्थन्वक्षित्यादि वैदिके वचने (ऋ, १, १६४४)। "भद्रं कर्णेभिः शृणुयाम देवा" इति मन्त्रे "भद्रं पश्ये-माक्षभिर्यजत्राः" इत्यत्र अक्षभिरिति न खल्वक्षिशब्दस्य किन्त्वक्ष(न) शब्दस्य रूपम्। एवमेव दध्नेति न दधिशब्दाद् अपितु दधन्निति नकारान्त-शब्दादुत्पद्यते। सक्थिशब्देऽप्येवम्।

अलं बहुना। भूयः खल्वस्ति वक्तव्यम्। इदं तु कश्चित्प्रतिपित्सते नाद्यापि नाम प्रत्यासन्नः स समयी यत्र नश्चित्तं तत्त्वमेव बुभुत्सेत, न पुनः केवलं काल्पनिकानि निर्वचनानि यैरज्ञानादात्मैव प्रतार्यते।

चिन्तितं किञ्चिन्नः कौशलमादेशविधौ। पुनरपीषच्चिन्तयिष्यते। महत्खल्वनुचितं कृतं कैश्चिदत्र। तत्क्षणमाकर्णयन्तु भवन्तः करुणया। कस्य नाम न विदितावस्माकं दम्पतिजम्पतिशब्दौ। तत्र यद्यप्यनयो-राद्यो यत्र क्वापि प्रयुज्यते द्वितीयस्तु केवलं वैयाकरणेष्वेव ग्रन्थेषु तदेको-दाहरणप्रदर्शनाय दर्श्यते। स्यादेतत्पूर्वं किल कदाचिदभूदयमाद्यवदेव

---

1 एवं शामेरण्य वाचि अहमस्मीत्यर्थे Ich bin, अहमभवम् इत्यर्थे तु Ich war। एतदपि पदद्वयं नैकस्मात् क्रियापदात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
प्रयुक्तः। पश्चात्तु कथञ्चिल्लुप्तप्रयोगः संवृत्त इति। यथा वा भवतु। इदं पृच्छ्यते। का तु खल्वनयोर्व्युत्पत्तिरिति। आहुस्ते। दम्पती जम्पती। जायापती। जायाशब्दस्य जम्भावो दम्भावश्च निपात्यते। नूनं जिह्रीयाज्जिह्वा कस्यचिच्चिन्तयतः। कथं तु कश्चिदेवं ब्रूयात्। किं बहुना। केवलं दृश्यतामियमतिलब्धी भाष्यपङ्क्तिराचार्यस्य सायणस्य ऋग्वेदे)२, १२७, ९) "दम्पतिं गार्हपत्यादिरूपेण गृहस्य पातकम्। दम इति गृहनाम। जकारलोपश्छान्दसः" इति। "मोदमानौ स्वे दमे" (गृह) इत्यसकृत्प्रयोगश्चन्दसि। इदं च पदमृग्वेदे अग्नेरिन्द्रस्य अश्विनोश्च विशेषणत्वेन प्रयुज्यते।३ किञ्च यः स दमशब्दः स आद्योदात्तः। तथात्वाच्च स स्वरः प्रबल इति शिष्यते। तदुत्तरो मकारस्थीऽकारस्तु दुर्बल इति मध्यवर्णलोपनियमाल्लुप्यते (syncope)। इति न किञ्चिद् दुष्यति शब्दनिष्पत्तौ। द्विवचने तु स एव शब्दो गौणार्थेन जायापती बोधयति।

न च किञ्चिदवद्यं जम्पतिशब्देऽपि। सन्ति निघण्टौ पृथिव्या एकविंशतिर्नामानि यानि व्याख्यातानि निरुक्ते यास्केनाचार्येण। तेषां च नाम्नामन्यतमं ज्मेति। विप्रकर्षात् (Anaplyxis) जमेति जायते यथा पाघ्राध्मास्थाम्नेत्यादि पाणिनिसूत्रे (७, ३, ७८) ध्माम्नाधात्वोर्यथाक्रमं धमम्नानेशौ भवतः। अकारलोपाच्च पूर्ववत् ततः पतिशब्दयोगे जम्पतिः अस्य च मुख्योऽर्थो भूपतिः। गौणस्त्वर्थोद्विवचने दम्पतिवज्जायापती।

इदं च किञ्चित्प्रसक्तानुप्रसक्तम्। अर्थं प्रतिपित्समानेनावश्यं निरुक्तमध्येतव्यम्। अन्यथा न कस्यापि व्याकरणज्ञानं पूर्यते। तदाह भगवान् यास्कः "अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते। अर्थमप्रतियतो नात्यन्तं स्वरसंस्कारोद्देशः। तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यमिति।"

(निरुक्तम्, १-१५)।

इदं च केषाञ्चिद्विप्रियमपि वस्तुतः सर्वेषामपि हितमेवेति वक्तुं व्यवसीयते। सन्ति केचिदद्यत्वे संस्कृतविद्वांसो ये केवलं न प्रीयन्ते प्राकृते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
अपित्ववगणयन्त्यनन्तिमन्तम्। एतत्पुनर्न तथा परेषामनर्थाय कल्पते यथात्मन एव। मोहात्तु नावबुध्यन्ते ते तत्। नूनं चित्रीयेत चित्तं तेषां यदि ते शृणुयुर्यदस्पृशन्नपि प्राकृतं स्यात्कश्चित्पुरुषो धुरन्धरो मीमांसायास्तर्कस्य वा न पुनः स स्वप्नेऽपि कदाचित्संस्कृतविदिति केनापि मन्येत स चेन्नाधीते प्राकृतम्। (क्रमशः)

वृत्तवर्त्तिका

कियतः कालात पूर्वं दक्षिणेश्वराद्यापीठे पुण्यक्षेत्रे श्रीश्रीमदन्नदाठाकुरप्रतिष्ठितदक्षिणेश्वररामकृष्णसंघपरिचालित-दक्षिणेश्वरबालिकाश्रमपुरष्कारवितरणसभाया अधिवेशनमभूत्। तत्र चतुर्विंशतिपत्तनप्रान्ताधिकर्त्तारः श्रीयुतवसन्तकुमारवन्द्योपाध्यायमहोदयाः सभापतिपदं तथा महामहोपाध्याय-श्रीकालीपदतर्काचार्य्यमहोदयाः प्रधानातिथिपदमलङ्कृतवन्तः। सम्पादिकया श्रीवेलादेवी एम् ए व्याकरणतीर्थया बालिकाविद्याश्रमप्रधानाध्यापिकया सम्पादिकाया ब्रह्मचारिण्याः श्रीशोभादेवीव्याकरणतीर्थायाः संस्कृतमयं मुद्रापितमभिभाषणं वाचितम्, यत्र विद्याश्रमस्य सर्वाणि वृत्तानि निबद्धानि। विद्याश्रमस्य बालिकाभिः वेणीसंहारस्य अंशविशेषः सामान्यरूपेणाभिनीतः, सप्तशत्या देव्या दूतसंवादः प्रयुक्तः, वङ्गभाषामय-हिन्दीभाषामयान्यपि कानिचिद् वस्तून्यभिनीतानि। कैश्चिद् वक्तृभिर्व्याख्यानमुखेन स्वं स्वं मतं प्रकटीकृतम्। प्रधानातिथिमहोदयेन संस्कृतभाषया विद्याश्रमस्य तथा तत्प्रतिष्ठापकानां महती प्रशस्तिरुद्घोषिता विवृतश्च नारीणां विद्याशिक्षादिकृत्यस्य ब्रह्मचर्य्यपालनोपस्कृतस्य संसारे महानुपयोगः।

अथ सभापतिभिः सावधिकशक्तिकत्वेऽपि यथाशक्ति साहायकस्य कर्त्तव्यतामुद्घोष्य समर्जिते सभासदां साधुवादे सभाया अवसानमभूत। अन्ते च विद्याश्रमबालिकाभिः सङ्गीतादिमयेन श्रीमदन्नदाठाकुररचितेन स्वजीवनवृत्तेन सभासदां सुमहान् सन्तोषः सम्पादितः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

9. **Introduction to the Rigveda of Sayanacharya**—Edited by Dr. Pashupatinath Shastri, M.A. B.L. Ph. D. Re. 1-8 ; Re. 1-4- (for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. As.14; As. 10 (for members).

11. **Prabhakara-vijayam** of Nandishvara—Edited by Mahamahopadhyaya Anantakrishna Shastri Vedantavisharad and Pt. Ramanath Shastri. Rs. 2-8 ; Rs. 2 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya—Edited by Pt. Bamacharan Kavyatirtha. As 12 ; As 10. (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Prof. Chintaharan Chakravarti, M.A. Re 1-8 ; Re. 1-4 (for members).

14. **Nala-damayantiyam** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2-8 ; Rs. 2 (for members).

15. **Prashastapada-bhashyam**—Edited by MM. Kalipada Tarkacharya. Rs. 4 ; Rs. 3. (for members).

16 **Yatratattvam** of Raghunandana Bhattacharya—Edited by Pt. Dwarikanath Nyayashastri. Rs. 2. ; Re. 1-8 (for members).

17. **Rik-pratishakhyam**—Ed. by Dr. Pashupatinath Shastri, M.A., B.L., Ph.D with the assistance of Prof. Chintaharan Chakravarti, M.A. Rs. 5 ; Rs. 4 (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Prof Akshayakumar Shastri. Re. 2 8 ; Rs. 2 (for members).

19. **Chhandogyamantrabhashyam** of Gunavishnu—Ed. by Prof. Durgamohan Bhattacharya, M. A. Rs. 7-8 ; Rs. 6 (for members). [out of stock]

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by MM. Kalipada-Tarkacharya. Rs. 7. ; Rs. 6 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Prof. Chintaharan Chakravarti, M.A. Re. 1-4 ; Re. 1 (for members).

22. **Prasanta-ratnakaram** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2 ; Re. 1-8 (for members).

23. **Devisatakam** of Mahamahopadhyaya Krishnanath Sarvabhauma —Ed. by Pt. Janakinath Shastri. As. 12 ; As. 10 (for members).

24. **Sataranja Kutuhalam**:—Ed. by Prof Chintaharan Chakravarti Kavyatirtha M.A., As. 8

25. **Satyanubhavam**:—(a new MahaKavya) of MM. Kalipada Tarkacharya, Rs. 5 ; Rs. 4-8 (for members).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



একমাত্র ধর্ম্মই এই সংসার-সাগরে সমুদ্ধর্ত্তা
এবং তাঁরই মহনীয় বাণী প্রচার করিতেছে
গুপ্তপ্রেশ ডাইরেক্টরী পাঞ্জিকা

विशेषतो द्रष्टव्यम्

अयि परिषत्प्रणयिनो ग्राहकमहोदयाः !

वर्षस्यास्य वार्षिकं देयं यैर्नाद्यापि परिशोधितं तैरवश्यं सत्वरं तत् (annual subscription) संप्रेष्य परिषत्कार्यालयस्य सौकर्यं विधातव्यमिति सविनयं विज्ञाप्यते

परिषत्-सम्पादकैरिति

Printed by Bishnupada Bhattacharya M. A. Kabyatirtha. at Calcutta Oriental Press, Ltd., 9, Panchanan Ghose Lane, Calcutta and Published by the same from Sanskrit Sahitya Parishad, 168/1 Raja Dinendra Street, Shyambazar, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C 1073

Vol. XXXVI. March 1954

No. 11 १८७५-शकीये

३६ श-वर्षस्य फाल्गुने

११श संख्या मासे

भारते मातु भारती

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकौ

श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः

श्रीरामधनशास्त्री काव्य-व्याकरण-पुराणतीर्थश्च

संस्कृत-साहित्य-परिषत्
श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—रूप्यकषट्कम् ६।
Foreign price—1-4s

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्किञ्चिदावेदनम्

प्रियपाठकमहाभागाः !

जानन्त्येव भवन्तो यत् परिषदियं कियतः कालात् प्रागात्मप्रतिष्ठायै कलिकाता-पौरसभादत्तं किञ्चित् स्थानमधिगत्य तत्रात्मनो वासगृहं रचयितुमारभ्यापि किञ्चिन्मात्रं निर्मायैव महासमरसम्भूतदौर्मूल्यादिभिः कारणैरर्थाभावेन च महता नारब्धं समापयितुं समर्थेति ।

तत् प्रियतमामिमां परिषदं यदि श्रीमन्तः प्रतिष्ठावतीं प्राणवतीञ्च द्रष्टुमिच्छन्ति, तदा सदयं प्रेषयन्तु यथाशक्ति साहाय्यं वक्ष्यमाणसङ्केतेन परिषत्-प्रणयिन्याः कल्पितप्रासादनिर्माणपरिसमाप्त्यर्थमिति ।

सङ्केतः—संस्कृत-साहित्य-परिषत्-सम्पादकः,
१६८।१, राजा-दीनेन्द्रष्ट्रीट, कलिकाता-४

Sanskrit Sahitya Parishat Series

(Revised up to April, 1951)

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (out of Stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1-4 ; Re. I. (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshinacharan Bhattacharya. (out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kalipada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. 2 (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshinacharan Bhattacharya. Rs. 2-8 ; out of stock.

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satishchandra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinath Sahityashastri. As. 4.

(Cont. to Cover 3rd Page)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

Vol. XXXVI. | १८७५-शकीये फाल्गुने | March
No. 11. | ३६श-वर्षस्य ११श-संख्या | 1954.

मतिमञ्जरी

कः पन्थाः ?

[निबन्धकः—श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः]

एतद्वर्षीय-माध्यमिकशिक्षापर्षत्परिगृहीत-परीक्षायां काचन विशेष-भ्रान्तिः सञ्जाता। तत्र प्रथमदिवसीयाङ्गलभाषापरीक्षायाः प्रश्नाः सर्वे न पाठ्यसूच्यनुगताः। एतदधिकृत्य कलिकातानगर्यां महान् विक्षोभो जातः। भवतु नाम स मानसः क्षोभः स्वाभाविकश्छात्रेषु। तत्र प्रतीकारोऽपि भवितुमर्हत्येव। एतदुपजीव्य ध्वंसात्मकं कर्म तु न वयमभिनन्दामः। इतः प्राक् शिक्षकाणां न्याय्यम् प्राप्यमधिकृत्य ते राष्ट्र-समीपे पुनः पुनः सविनयं विज्ञापयद्भिर्यदा न किञ्चिदासादितं तदा सम्मिलितैर्विज्ञापनायास्यां नगर्यां समवेतैर्जातं तदानीमपि केश्चिन्मन्दप्रकृतिभिर्ध्वंसात्मकमाचरणं कृतम्। एवं क्रमेणास्माभिः प्रायश उच्छृङ्खलाचरण-परायणानां संख्यायाः परिपुष्टिर्दृश्यते। एषा न कल्याणकरी राष्ट्रस्य शान्तिप्रियस्य नागरिकसंघस्य च।

स्मृतिपथमुदेत्यधुना यदा महात्मना गान्धीमहाभागेन स्वाराज्यलाभाय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
भारतीयानुद्बोधयितुं तेषां मनःसु सविशेषं चाञ्चल्यञ्च समुत्पादयितुं विद्यालयतश्छात्राः समाहूतास्तदा प्रभृति केचन प्रयोजनवशादनुष्ठितामुच्छृङ्खलामपि स्वाधीनतां मन्वते। तदा प्रभृत्येव विद्यार्थिनोऽपि विस्मृतकर्तव्या यथेच्छं समाचरन्ति। येभ्यस्ते शिक्षां समधिगच्छन्ति न तेष्वपाध्यायेष्वपि सम्मानं प्रदर्शयन्ति। अस्य खलु मूलीभूतस्य क्रिया राष्ट्रेष्वपि प्रभावं लभमाना नवलब्धस्य राष्ट्रस्य उद्वेगविशेषं जनयति—शिथिलयति च राष्ट्रस्य मूलीभूतं जनानुरागम्। राष्ट्रपरिचालकैरप्यत्र सविशेषं मनो न दीयते। तेऽपि लब्धाधिकारा न सर्वथा जनकल्याणाय यतन्ते। जना अपि कथं वा तेषामुपेक्षां सहेरन्? एवं स्थिते यदि नीतिविगर्हिता विशृङ्खलापरम्पराः सर्वदानुवर्तेरन् तदा का गतिः शान्तिप्रियाणां नागरिकाणाम्?

एतद्विषयमवलम्ब्य वयं निरपेक्षाणां मनीषिणां दृष्टिं समाकृष्टुं शक्नुयाम यदि राष्ट्रपरिचालकाश्च जनाश्च तेषां बुद्धिवैशद्यमङ्गीकुर्युः। जनसंघैः सह राष्ट्रपरिचालकानां संयोगस्तथा स्थापनीयो यथा कदाचिदपि तथाभूतांहार्दिकसंयोगाद् वियोगो न सम्भाव्येत। एतदर्थमस्माभिर्भारतीयशास्त्रानुशासनमपि स्मर्तव्यम्। एवं च शास्त्रानुगाया नीत्या अनुसरणेन नाकल्याणसम्भावनेति संक्षेपतोऽस्माकं सर्वेषु भारतमङ्गलकामिषु विमर्शाय विज्ञापनम्।

संस्कृतसाहित्यपरिषदः ३६श वार्षिकमहोत्सवे
सभापतीनां महामहोपाध्याय-श्रीयुतविधुशेखरशास्त्रि-महोदयानाम्

अभिभाषणम्

(पूर्वानुवृत्तम्)

संस्कृतं प्राकृतं चेत्युभयमपि सहाध्येतव्यमिति मेनिरे प्राञ्चः स्पष्टम्। संस्कृते दृश्यकाव्यानि संस्कृतप्राकृताभ्यामुभाभ्यामेव वाग्भ्यां विरचितानीति को नाम न वेत्ति। साहित्यदर्पणकारः "साहित्यार्णवकर्णधारो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वनाथकविराजोऽष्टादश भाषा बुबुधे। तासां सप्तदश प्राकृतरूपाः। एकैव तु संस्कृतमयी। एवं च स कविः कविजनोचितया वाचा वर्णयत्यात्मानम् "अष्टादशभाषावारविलासिनीप्रौढभुगङ्ग" इति। तत्पिताप्यभूत "सव्वभासाचडरो" (सर्वभाषाचतुरः)। कर्ता च भाषार्णवनामकस्य कस्यचिद् ग्रन्थस्य। सन्ति ते सुविश्रुता ग्रन्थकारा ये खलु रचयितारो न केवलं संस्कृतस्य अपितु प्राकृतस्यापि व्याकरणस्य। यथा हेमचन्द्रः क्रमदीश्वरः पुरुषोत्तमश्च। अधीयते चाद्यापि सन्तस्तानि व्याकरणानि। आलङ्कारिकाश्चास्माकमवगच्छन्ति अलङ्कारविचाराय प्रभूतं प्राकृतमपेक्ष्यत इति। स्मरत्वत्र कश्चिद्भोजराजस्य सरस्वतीकण्ठाभरणम्।

स्तोकेऽप्यसति प्राकृतज्ञाने संस्कृतविदपि पुरुषः शोच्यां दशामुपैति। अत्र वर्तमानेषु शतशतेषूदाहरणेषु द्वित्राण्येव दीयन्ते समयसंक्षेपात्। इयं पङ्क्तिः कविकुलगुरोः कालिदासस्य (रघु, २, ३९):

"सक्ताङ्गुलिः सायकपुङ्ख एव
चित्रार्पितारम्भ इवावतस्थे।" इति।

इदं चाधीयते श्रीमद्भागवते (६, १०, १४)

"पुङ्खानुपुङ्खपतितैर्ज्योतीषीव नभो घनैः॥" इति। को नामेह पुङ्खः। यो विहङ्गस्य पक्षः स एव पुङ्खः। वदेद्वा कश्चिद् यः संस्कृते पक्षशब्दः स एव प्राकृते पुङ्ख इत्याकारमापद्यते। प्रयोक्ता त्वत्र संस्कृतप्राकृतयोर्भेदमबुध्यमानः पक्ष इति प्रयोक्तव्येऽपि प्रमादात् पुङ्ख इति प्रयुयुजे इत्यहो महानासीत्तदा प्रभावः प्राकृतस्य। नैतदतिचित्रं यदा विकृतमिति स्थाने विकटमिति वैदिकवचस्यप्युपलभ्यते। बहु खल्वीदृशमिति सुविदितं विदुषाम्। प्रकृते तु पक्षात्पुङ्खाकारापत्ताविदं किञ्चित्प्रतिपत्तव्यम् संस्कृतशब्दे स्वरात्परस्य क्षकारस्य क्खकारभावश्छकारभावो वा भवतीति साधारणो नियमः प्राकृते। अथेह पकारस्यौष्ठ्यवर्णतया तत्प्रभावात्प-

---

9 मूलतया पक्षिणः पक्षरूपेऽर्थे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
कारस्थोऽकार उकारो जायते ततश्च स्वयम्भुनानुनासिकभावेन पक्खः पुङ्खाकारो भवति। शक्यते च दर्शयितुमिदं संस्कृतेऽपि। यथा चिन्त्यतां दृश्यतां च नश्यतेर्मज्जतेश्च धातोर्यथाक्रमं नङ्क्ष्यति मङ्क्ष्यतीति च पदम्।

निर्व्वक्तव्यः शब्दः। तत्र चावश्यं युक्त्या भवितव्यम्। मूढजातीयस्तु कश्चित्पण्डितमानी पुङ्खशब्दं निर्वुवाणः कथमीषदपि नापत्रपत इति विस्मयते चेतो विपश्चितः। इदं च तस्य निर्वचनम्—"पुमांसं खनति। खन् ड इति" (Apte's Sanskrit English Dictionary).

अस्त्यस्मिन्नेवार्थे१ संस्कृते पिच्छशब्दः पिञ्चशब्दश्च। न तयोरन्यतरोऽपितु वस्तुतः संस्कृतः। यद्युभावपि प्रचुरं तत्र तत्र प्रयुज्यते। प्राकृतावेतौ तु शब्दौ। उक्तं प्राक् संस्कृतशब्दे स्वरात्परं क्षकारः क्खकारश्छकारो वा भवतीति प्राकृते नियमः। यदा च्छकारस्तदा च्छकारस्य तालव्यतया तत्प्रभावेण पकारस्थाकारस्येकारभावात् स एव पच्छशब्दः पिच्छाकारमापद्यते। स्वयम्भुनानुनासिकभावेन तु स पिंच्छाकारो जायते। किं पुनरत्र निर्वचनम्। आह क्षीरस्वाम्यमरकोषे पिच्छति पिच्छम" इति। पिच्छ कुट्टने। अस्पष्टोऽत्र धात्वर्थः। भानुजिदीक्षितस्तु तत्रैव निर्वक्ति "पिच्छयति। पिच्छयते वा। पिच्छ कुट्टने। अच् घञ् वा।" नेह किञ्चिद् वक्तव्यम्। इदं तु सन्तो मन्वीरन् सन्ति प्रभूतानीदृशान्यनेकानि पदानि यान्यसंस्कृतान्यपि संस्कृतानीति निर्विशङ्कं प्रयुज्यन्ते। स्मर्तव्यमत्र यदुक्तमाचार्येण यास्केन। पृष्टः कश्चिन्निब्रुतया। न त्वेव न निब्रूयात्। तथा कुर्वंश्चार्थनित्यः परीक्षेतेति"। वयं तु हन्त न तथा परीक्षामहे। अपरीक्षमाणाश्च तदपि कुर्मो यत्र कुर्याम। यत्र क्वापि च छान्दसोऽयं प्रयाग इति आर्षप्रयोगोऽयमिति वा ब्रुवाणा युक्तां विवृतिमावृणुमः।

इहाऽन्यतोऽपि दृश्यताम्। केयं शोच्या गतिरापादिता संस्कृतस्य कैश्चिदनहंरुपाध्यायैस्तत्र तत्रोपाध्यापयपद्भिर्दृश्यकाव्यानि। नैते नः सखायो मूले यत्प्राकृतं स्वयं तत्तथाधीयते छात्रान्वा तथाध्यापयन्ति। किन्तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
छायामात्रमुदीरयन्ति। समूलघातं घ्नन्ति च तेन निरवशेषं रामणीयकं काव्यस्य। नैते मनागप्यनुभवन्ति दुग्धं चेद्दध्ना परिणमते नैनत्पिबता दुग्धपानगुणो लभ्यते। स्वयमिदमनुभूयताम्। इयं काचिद्भाषा कवेर्विद्यापतेर्गीतिः—

"आजु रजनी हाम भागे पोहायनु पेखनु पियमुख चन्दा।
जीवन यौवन सफल माननु दशदिश भेल निरदन्दा॥
आजु मझू गेह गेह करि माननु आजु मझू देह भेल देहा।
आजु विहि मोरे अनुकूल होयल टुटल सब सन्देहा॥

अथेहास्याः संस्कृतच्छाया

१ अद्य रजनीमहं भागेन प्रभातामकार्यं प्रेक्षे प्रियमुखचन्द्रम्।
२ जीवनं यौवनं सफलममानयं दश दिशो भूता निर्द्वन्द्वा।
३ अद्य मम गेहं गेहममानयं अद्य मम देहो भूतो देहः।
४ अद्य विधिर्मऽनुकूलो भूतस्त्रुटितः सर्वः सन्देहः॥

कियदनयोर्महदन्तरं कतरचानयोरुत्कृष्यतेतरामिति न मया वक्तव्यम्। इदमन्यत्पश्यन्तु भवन्तः। इत्थं सर्वथा संस्कृतस्यैव भागधेयविपर्यासात्प्रवृत्ता काचिदभिनवा परम्परा गुरुशिष्यारणां समं संस्कृतपाठशालास्वाङ्गलमहाविद्यालयेषु च या खलु न कचित्कस्यापि कस्मैचिच्छ्रेयसे किन्त्वनिति महतेऽनर्थायैव सम्पद्यते। तत्र कश्चित्स्वप्नेऽपि भ्राम्येन्मुह्येद्वा। एवं चापचीयमानं प्राकृतज्ञानमस्माकं संस्कृतज्ञानमपि शनैः शनैरधिकाधिकमपचिनोति न तु कथञ्चिदुपचिनोति। वङ्गीयसंस्कृतशिक्षापरिषत्नामापि प्राकृतस्याग्राह्यमिव मन्यते। तदिदं दुनोति नश्चित्तमनिमात्रं प्रकटयति च तेनात्मनो विचारकुशलताम्।

किञ्चैतानि त्रिचतुराणि वचनान्यवश्यवक्तव्यानि प्रतिभान्ति। अनुपेक्षणीयान्येतानि सम्यग्बुभुत्समानेन संस्कृतम्। विस्तरभिया तु मयैतान्यत्र स्पृष्टमात्राणि। तत्र तावदादौ पुरातनी भारतभूगोलविद्या।

छान्दोग्ये (५, ११, ५) कैकेयो राजाश्वपतिराह

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"न मे स्तेनो जनपदे न कदर्यो न मद्यपः।
नानाहिताग्निर्नाविद्वान न स्वैरी स्वैरिणी कुतः॥"

इति। क्व नामैते कैकेयाः। अथवा मा ज्ञासीदेतत् कश्चिदौपनिषदोऽवगाढोऽध्यात्मविद्यायाम्। इदं त्वाह निरुक्ते (२-२) भगवान्यास्कः "शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते" इति। महाभाष्यकारो भगवान् पतञ्जलिस्त्वत्र (१, १, १) युनक्ति "विकार एनमार्या भाषन्ते शव" इति। क्वैते कम्बोजाः। कुत्रत्या नु पुमांस आर्याः। महाभाष्ये पूर्वस्मिन्नेव प्रसङ्ग उक्तम् हम्मतिः सुराष्ट्रेषु रंहतिः प्राच्यमध्येषु। गमिमेव त्वार्याः प्रयुञ्जते। "दातिर्लवनार्थं प्राच्येषु द्रात्रमुदीच्येष्विति"। क्व नु खल्वेते जनपदाः।

रघोर्वाजिनः सिन्धुतीरविचेष्टितैः स्कन्धान्दुधुवुरित्याह कालिदासः (रघु, ४, ६८)। क्व पुनः काश्मीरेषु सिन्धोः सम्भवो यद्यप्याह मल्लीनाथः "सिन्धुर्नाम काश्मीरदेशेषु कश्चिन्नदविशेष" इति। वस्तुतस्त्वत्र सिन्धुस्थाने वक्षु(वंक्षु, वङ्क्षु) इति वा साधीयान्पाठः। स चायं नदो लोके oxus इति प्रसिद्धः। तच्चिन्त्यतामयं विषयो निपुणम्।

(क्रमशः)

ग्रन्थविमर्शमर्शनम्

(पूर्वानुवृत्ति)

[निबन्धकः—श्रीनिरञ्जनस्वरूपब्रह्मचारी अष्टतीर्थ-न्यायवेदान्ताचार्यः]

अनन्तानन्दादीनुल्लिखितानां सर्वेषामेवाप्रामाण्यापत्त्या न तदनुल्लेखनमात्रं तादृशवचनानां प्रक्षिप्तत्वे तन्त्रमपि तु तस्य तादृशवचनजालनिषेध एव तथा। तदनुल्लेखने तदानीमतिप्रसिद्धत्वमेव तन्त्रम्, न ह्यतिप्रसिद्धे पुनः पुनरुल्लेखः प्रतीकधारणं वावश्यकं भवति। वस्तुतस्तु शास्त्राप्राप्तत्वमात्रं नाप्रामाण्ये प्रयोजकम्, अपितु शास्त्रविरुद्धत्वमेव, तच्चानन्तानन्दादीनां नास्तीति प्रागेवोपपादितमिति कुतस्तल्लिखितेतिहासस्याप्रामाण्यम्? प्रामा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
णिकलोकप्राप्तत्वस्यैव प्रामाण्यप्रयोजकत्वेन तदभावस्यैवाप्रामाण्यप्रयोजकत्वा-न्नाप्रामाण्यं तदितिहासस्य, तेषां वेदवित्त्वेन प्रामाणिकत्वस्य पूर्वमसकृदु-क्तत्वात्। तथाचाप्रामाण्यप्रयोजकयोः प्रामाणिकलोकप्राप्तत्वाभावशास्त्र-विरुद्धत्वयोरुभयोरेव तेष्वसत्त्वेन न तदुक्तेतिहासस्याप्रामाण्यं, अपि तु तद्विरुद्धस्यैवाप्रामाण्यमिति प्रमाणाभिज्ञमात्रेणैव स्वीकरिष्यत इत्याशंसाम। अतो नानुमापकत्वमपि तदुभयोरिति पण्डितंमन्यैरपि यत् स्वच्छिद्रान-वलोकनं, तद्द्वेषाधिक्येनैवेति प्रतिभातीव।

वेदवित्त्वात् प्रामाणिकत्वेनावश्यस्वीकर्त्तव्ययोर्माधवानन्तपादयोः वर्णित शङ्करजन्मस्थानविरोधोऽप्येकस्यैव देशस्य कालान्तरे नामान्तरकरणेनापि सङ्गमयितुं शक्यः। यथा खलु क्वाइवष्ट्रीटाख्यपथविशेषादोनामिदानीं सुभाषरोडादि नामान्तरं कृतं, यथा वा पूर्ववङ्गादिदेशविशेषस्य तदंशस्य वा पूर्वपाकिस्थानादिनामान्तरकरणं, तथैवैकस्यापि शङ्करजन्मस्थानस्य कालान्तरे नामान्तरं कृतमिति मन्तव्यम्। सर्वदर्शनकृता मङ्गलाचरणे बुक्कणराजप्रधानमन्त्रित्वेन यादृशः खलु स्वपरिचयो दत्तः, स एव जैमिनीयन्यायमालायामपीत्येकत्वप्रत्यभिज्ञापकस्वकीयलेखनसत्त्वेऽपि कथं भिन्नत्वं ग्रन्थकृतोरनुमीयत इति न नो बुद्धौ प्रतिभातीव। अपि च वेदवित्सम्प्रदायपरम्परया तादृशसकलग्रन्थकृत्त्वेनैकस्यैव माधवा-चार्यस्य स्मरणात् तद्विरोधेन तथाकथितैतिहासिकानामेव परमप्रामाण्यमस्तु, न तु माधवाचार्याणाम्। न ह्येतिहासिकाः सर्वज्ञा वेदविदो वा, येन प्रमाणं भवेयुः, दूरस्तु तेषां वैदिकमाधवाचार्यापेक्षया समधिकप्रामाण्यभावः। नाप्येतिहासिकाः सर्वत्राविवादाः, येन सर्वत्रैव तेषामविवादमेव प्रामाण्यं भवेत, विवादे तु विकल्प एव स्यात्; न ह्येकस्मिन विकल्पे जाते कस्यापि पक्षस्य प्रामाण्यं स्यात् एकप्रामाण्यस्यापरप्रामाण्यमपहत्यैवोदयादन्यथा विकल्प एव न स्यात्। यत्राप्यविवादस्तत्राप्यन्यत्र दृष्टविकल्पेनाप्रामाण्यमनु-मीयेत। असर्वज्ञत्वेनावेदवित्त्वेनानार्षत्वेन चानुकूलतर्कस्याप्यभावात्; अपि तु तथाकथितैतिहासिको यदि प्रमाश्रयः स्यात सर्वज्ञः स्यात्, वेदवित्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यात्, वेदानुकूलत्वं वा स्यादित्यादिप्रतिकूलतर्कस्यैव सत्त्वादप्रामाण्यमेव सुस्थिरं भवेत्। दृश्यते च तथाकथितैतिहासिकानां सर्वेषामेवासर्वज्ञत्वमवेदवित्त्वं वैदिकपरम्पराप्रसिद्धिविरोधेन वेदविरुद्धवक्तृत्वञ्च, दृश्यते च तेषामेकस्मिन्नेव विषये परस्परविरोधोऽपि। तथाच सर्वेष्वेव प्रामाण्यबाधकेषु सत्सु कथं तेषां वचसि समाश्वासः, कथं वा तदाश्वासमवलम्ब्य तद्विरोधेन वेदविदां वैदिकपरम्परागतानां वेदानुकूलवक्तॄणामपि वचस्यश्रद्धा विमर्शकशिरोमणीनां पण्डितवराणामपि। न हि ते श्रद्धाश्रद्धे मीमांसाशास्त्रोपन्यायपरिशोधितचित्तानां सम्भवेतामिति तु विभावनीयं सुधीभिरेव। यश्च—श्रीभगवच्छङ्करावतारशङ्कराचार्यपादानां लीलाविशेषं व्यासशङ्करसंवादविशेषमवलम्ब्य तेन श्रीशङ्कराचार्यणामसर्वज्ञत्वमनुमाय तस्यावतारखण्डनप्रयासः, सोऽप्यतीव बालप्रलपितमिव प्रतिभाति। यतः कस्यचिदपि श्रीभगवदवतारस्य लीलाविलासो लीलावेलायां सर्वदा सर्वथा लोकातीतो भवितुमर्हति, तथा सति लीलैव स न स्यात्। न हि मनुष्यविग्रहेणावतीर्णस्य सर्वदा सर्वथालौकिकभावेनावस्थितस्य मनुष्यैः सह कोऽपि व्यवहारः सम्भवेत्, व्यवहारे सम्भाव्यमाने वा तस्यालौकिकत्वम्। न हि श्रीभगवतः श्रीकृष्णस्य बाल्यलीला सदा सर्वथैवालौकिको एवासीत्, तथा सति तस्य नवनीतचौरणं, यशोदया बन्धनं, बन्धनभयात् पलायनं, बन्धने च रोदनं, तिरष्कारिणीनां गोपीनां गृहद्वारेषु हदनं, जरासन्धभयात् पलायनं, यवनशाल्वादीनां युद्धे विमुखीभवनमित्यादयोऽमितैश्वर्यस्य सकलब्रह्माण्डसम्राजः सम्भवेयुः। नापि शास्त्रोक्तिं विना केवलैश्वर्यमयीभिर्लीलाभिरेव श्रीभगवदवतारत्वकल्पनं सम्भवति, वशिष्ठागस्त्यमार्कण्डेयसौभरिप्रभृतिषु महर्षिषु व्यभिचारात् परशुरामरामबलरामानां तादृशालौकिकैश्वर्याणामभावेन श्रीभगवदवतारत्वानुपपत्तिश्च स्यात्। तस्मादेवमेवावधारणीयं यच्छास्त्रमात्रप्रमाणकमेव श्रीभगवदवतारत्वम्। शास्त्रं यदि कथयेदयं भगवदवतार इति, तदा किमप्यैश्वर्यं मास्तु, तथापि स भगवदवतार एव। शास्त्रं न कथयेच्चेत्, तदालौकिकैश्वर्यसत्त्वेऽपि न स भगवदवतारः अपि तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योगविभूतिमान् जीवविशेष एव स इति निर्णयम्। तथाच यथा खलु शास्त्रमात्रप्रमाणकः शुचित्वनिश्चयः तद्विरोधिना नरशिरःकपालस्य शुचित्वानुमानेन न बाध्यते, अपि तु तद् बाधते, तथैव शिवपुराणप्रमाणकः श्रीशङ्कराचार्यस्य श्रीशङ्करत्वनिश्चयोऽपि न तद्विरोधिना केनाप्यनुमानेनाप्तशब्देन वा बाध्यते, अपि तु तत्तमेव बाधते। शिवपुराणान्तर्गतशङ्करावतारप्रतिपादकवचनानां विमर्शकतत्सदृशान्यसकलवैदिकावैदिकास्तिकपरम्पराप्रसिद्धिविरोधेनप्रक्षिप्तत्वे, एकेन साम्प्रदायिकेनापरसम्प्रदायसम्मतावतारस्य प्रतिपादकवचनानां विनितगमनाविरहेण प्रक्षिप्तत्वापत्त्वाभावः सर्वेषामेवावताराणामवतारत्वापत्तिः, अतस्तेषां प्रक्षिप्तत्वाभावः प्रामाणिकैरेव स्वीकरणीय इत्यलमधिकप्रतिवचनेन। एतेन माधवाचार्यादिलिखितेतिहासविरोधो सर्व एवेतिहासोऽप्रामाणिक इति तद्विरोधिनः श्रीशङ्करेतिहासस्याप्रामाण्यप्रतिपादिका विमर्शकस्य यावत्य उक्तयस्ताः सर्वा एव प्रयुक्ता वेदितव्याः।

अन्ते श्रीशङ्कराद्वैतवादस्य मायावादशब्देन यः खल्लेखः कृतः सोऽपि वादशब्दार्थाज्ञानमूलकस्तीव्रद्वेषमूलको वेति प्रतिभाति। न हि वादशब्दस्य सिद्धान्ततदनुकूलविचारैतदन्यतरार्थं परित्यज्यार्थान्तरे प्रयोगो दार्शनिकशास्त्रे दृश्यते। तथा सति मायानिर्णायकं मायापरमतात्पर्यकं वा शास्त्रं मायाशब्देन लभ्यते। श्रीशाङ्करमतन्तु न मायानिर्णायकं वा मायापरमतात्पर्यकम्, अपि तु परमार्थाद्वैततात्पर्यकम्। अद्वैतन्तु द्वैतमिथ्यात्वनिश्चयं विना न सिध्यतीति द्वैतस्य मायोपादानकत्वेन मिथ्यात्वं प्रतिपादयितुमेव मायाप्रसङ्गः, न तु सैव परमतात्पर्यविषयीभूता श्रुतीनाम्। तस्मान्मायावादशब्देन कथमपि पण्डितैरद्वैतवादो बोद्धुं बोधयितुं वा शक्यते। अतो वादशब्दार्थानभिज्ञेनादार्शनिकेन श्रीशाङ्करमतपरमद्वेषिणैव वा केनचित् श्रीभगवत्पादाचार्यमतस्य हेयत्वमुपपादयितुमेव तत्र तादृशशब्दस्य प्रयोगः कृतः, स एव पन्था विमर्शकेनापि स्वानुकूलत्वादनुसृत इति सोऽपि तत्कोटिप्रविष्ट एवेति प्रतिभाति। वस्तुतस्तु ये खलु दार्शनिका

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
मायां परमेश्वरशक्तित्वेन पारमार्थिकीं स्वीकुर्वन्ति, तेषां मतमेव मायावाद-शब्दप्रतिपाद्यमिति मन्तव्यम्। तथाच वैष्णवाचार्याणां रामानुजादीनां मतमेव मायावादशब्दस्य व्युत्पत्तिलभ्योऽर्थः। अतएवोक्तं विष्णु-पुराणे—'मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमेव च। मयैव कथितं देवि कलौ ब्राह्मणरूपिणा।' अस्यायमर्थः—मायावादं पारमार्थिकमायातात्-पर्यकम्, अतएव प्रच्छन्नमावृतपरमार्थतत्त्वकं, बौद्धं बुद्धिमात्रकृतं, न तु श्रुतितात्पर्यविषयीभूतं यच्छास्त्रं शास्त्रविशेषः, तदसदेवायुक्तमेवेति मयैव शङ्करेण ब्राह्मणरूपिणा लीलया विप्रशरीरं परिगृह्यावतीर्णेन सता कलौ कथितं प्रमाणेन प्रतिपादितं स्वकीयशाङ्करभाष्य इति शेषः। मायायाः पारमार्थिकत्वखण्डनेन तदीयमिथ्यात्वव्यवस्थापनेन च पारमार्थिकमाया-वादिनां सर्वेषामेव मतं खण्डितमिति भावः। तेनाद्वैतमतपरमद्वेषिभि-र्विज्ञानभिक्षुपादैरद्वैतमतनिन्दनपरतया यदेष श्लोकः साटोपमुदाहृतः, तदपि निरस्तं वेदितव्यम्। मायाशब्दस्याद्वैतमतार्थकताया लक्षणां विनाऽ-सम्भवात, शक्यार्थग्रहणे तात्पर्यबाधाभावे लाक्षणिकार्थग्रहणस्यापण्डिता-न्येषामसम्भवात्। तथाच स्वखातसलिले विमर्शकधुरन्धरः स्वयमेव निमज्जति, तथा तथैवायं नीरमरं गभीरतरमेव समवतरतीति कथमुद्धराम इत्यलमनल्पजल्पनेन मीमांसाशास्त्रपरिज्ञानशून्यानां वचनप्रतिवचन-रूपेणेति शम्।

शोधनपत्रम्

ज्यैष्ठमासीयपत्रिकायां द्वाविंशपृष्ठे स्मरणीया दिवसाः।

आशुतोषस्य मृत्युतिथिः ... ... 1024 स्थले 1924
अक्षयकुमारस्य मृत्युतिथिः ... ... 1186 स्थले 1886
श्रावणमासीयपत्रिकायां षट्चत्वारिंश पृष्ठे प्रथमाणविकविष्फोरका-
भिवर्षणम् ... ... 1925 स्थले 1945
रवीन्द्रनाथस्य मृत्युतिथिः ... ... 1921 स्थले 1941
इत्येवं संशोध्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीचैतन्यचरितामृतसंस्कृतानुवादः

(पूर्वतोऽनुवृत्तः)

अनुवादकः—श्रीभास्करानन्दस्वामी ।

श्रीश्रीचैतन्यचरितामृत आदिलीलायां

चतुर्थः परिच्छेदः

लीलावसानसौख्येन तस्या या तनुमाधुरी ।
तद्दर्शनसुखेनैव विस्मृतात्मा भवाम्यहम् ॥
उभौ समरसौ स्यातामित्याह भरतो मुनिः ।
स तु नैव विजानाति व्रजस्येमं रसं मम ॥
अन्योन्यसङ्गमेनाहं सुखं यावल्लभे क्वचित् ।
तस्मादप्यधिकं राधासुखं शतगुणं भवेत् ॥

"तथाहि ललितमाधवे ९।५ लोकः—

"निर्धूतामृतमाधुरीपरिमलः कल्याणि बिम्बाधरो
वक्त्रं पङ्कजसौरभं कुहरितश्लाघाभिदस्ते गिरः ॥
अङ्गं चन्दनशीतलं तनुरियं सौन्दर्यसर्वस्वभाक् ।
त्वामास्वाद्य ममेदमिन्द्रियकुलं राधे मुहुर्मोदते ॥४३॥"

"तथाहि श्रीरूपगोस्वामिनोक्तम्—

"रूपे कंसहरस्य लुब्धनयनां स्पर्शेऽतिहृष्यत्त्वचं
वाण्यामुतकलितश्रुतिं परिमले संहृष्टनासापुटाम् ।
आरेज्यद्रसनां किलाधरपुटे न्यञ्चन्मुखाम्भोरुहां
दम्भोद्गीर्णमहाधृतिं बहिरपि प्रोद्यद्विकाराकुलाम् ॥४४॥"

रसस्तिष्ठति मय्येकः कोऽपीति ज्ञायते मया ।
वशं करोति तञ्चापि राधिका मम मोहिनी ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यज्जातीयं सुखं राधा मत्तः समधिगच्छति ।
तदास्वादयितुं शश्वदुन्मुखश्चिन्तयाम्यहम् ॥
विधायापि बहून् यत्नांस्तन्नास्वादयितुं क्षमे ।
वर्द्धते हृदि लोभो मे जिघ्रतस्ततसुखामृतम् ॥
अवतारं करोम्येव तद्रसास्वादनार्थकम् ।
तं प्रेमरसनिर्यासमास्वादयाम्यनेकधा ॥
रागमार्गेण मे भक्ता यथा भक्त्या भजन्ति माम् ।
लीलाचरणद्वारेण तथा शिक्षां ददाम्यहम् ॥
न पूरितं मयाद्यापि तदेतद्वाञ्छितत्रयम् ।
न विजातीयभावेन तदास्वाद्यं भवेदपि ॥
अनङ्गीकृत्य राधाया भावकान्ती उभे अपि ।
नास्वादयितुमर्हामि तस्यास्ततत्रिविधं सुखम् ॥
अङ्गीकृत्यैव राधाया भावं कान्तिञ्च सर्वथा ।
ततसुखत्रितयास्वादहेतोरवतराम्यहम् ॥
यदैवं निश्चयं कृष्णः कृतवान् सर्वभावतः ।
युगावतारकालोऽपि तदैव समुपस्थितः ॥
श्रीमानद्वैत आचार्यस्तदाराधनमाचरत् ।
तस्य हुङ्कार आकर्षत् कृष्णं तं परमेश्वरम् ॥
अवतार्याग्रतः सर्वान् मातरं पितरं गुरून् ।
भाववर्णौ च राधाया अङ्गीकुर्वन् स्वयं हरिः ॥
नवद्वीपे शचीगर्भाद्विशुद्धाद्दुग्धसागरात् ।
प्रादुर्भूतोऽभवत् कृष्णः पूर्णमण्डलचन्द्रमाः ॥
ध्यायन् स्वरूपगोस्वामिश्रीमत्पादसरोरुहम् ।
व्याख्यातवानहं षष्ठश्लोकस्यार्थं यथामति ॥
अस्य श्लोकद्वयस्यार्थं यथा व्याख्यातवानहम् ।
तत्र श्रीरूपगोस्वामिश्लोकः प्रामाण्यमर्हति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथाहि स्तवमालायां श्रीचैतन्यदेवस्य द्वितीयस्तवे तृतीयश्लोकः—

"अपारं कस्यापि प्रणयिजनवृन्दस्य कुतुकी
रसस्तोमं हृत्वा मधुरमुपभोक्तुं कमपि यः ।
रुचं स्वामावव्रे द्युतिमिह तदीयां प्रकटयन्
स देवश्चैतन्याकृतिरतितरां नः कृपयतु ॥"

"मङ्गलाचरणं कृष्णचैतन्यतत्त्वलक्षणम् ।
प्रयोजनञ्चावतारे श्लोकषट्कैर्निरूपितम् ॥४५॥
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स कृष्णदास आह श्रीचैतन्यचरितामृतम् ॥

इति श्रीचैतन्यचरितामृत आदिखण्डे चैतन्यावतारसामान्य-
कारणं नाम चतुर्थपरिच्छेदः ।

पञ्चमः परिच्छेदः

"वन्देऽनन्ताद्भुतैश्वर्यं श्रीनित्यानन्दमीश्वरम् ।
यस्येच्छया ततस्वरूपमज्ञैर्नापि निरूप्यते ॥१॥"
जयति जयति शश्वत् कृष्णचैतन्यदेवो
जयति जयति नित्यानन्ददेवः सदैव ।
जयति जयति नित्यं श्रीमदद्वैतचन्द्रो
जगति च विजयन्तां श्रीलगौराङ्गभक्ताः ॥
कृष्णचैतन्यमाहात्म्यं षष्ठश्लोकेन वर्णितम् ।
पञ्चश्लोक्याधुना नित्यानन्दतत्त्वं निरूप्यते ॥
कृष्णः सर्वावतारीति स स्वयं भगवानिति ।
तस्य श्रीबलरामाख्यो द्वितीयः खलु विग्रहः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकत्वेऽपि स्वरूपस्य देहाभ्यामेव भिन्नता ।
तस्य लीलासहायश्च कायव्यूहोऽयमादिमः ॥
सोऽयं कृष्णोनवद्वीपे श्रीमच्चैतन्यचन्द्रमाः ।
तेन श्रीबलरामेण नित्यानन्देन सङ्गतः ॥

"तथाहि श्रीरूपगोस्वामिकड़चायाः श्लोकः—

"सङ्कर्षणः कारणतोयशायी
गर्भोदशायी च पयोब्धिशायी ।
शेषश्च यस्यांशकलाः स नित्या-
नन्दाख्यरामः शरणं ममास्तु ॥२॥
श्रीबलरामगोस्वामी मूलं सङ्कर्षणो हि सः ।
गृहीत्वा पञ्चरूपाणि कुरुते कृष्णसेवनम् ॥
साहाय्यं कृष्णलीलायां सर्वमाचरति स्वयम् !
अन्यैर्देहैश्चतुर्भिः स सृष्टिलीलां करोति च ॥
सर्वाः सृष्ट्यादिकाः सेवास्तस्याज्ञाप्रतिपालनम् ।
कुरुते शेषरूपेण विविधं कृष्णसेवनम् ॥
सर्वैरूपैश्च भुङ्क्तेऽसावानन्दं कृष्णसेवनात् ।
चैतन्येन समं रामः स नित्यानन्दरूपतः ॥
करिष्ये सप्तमश्लोकं चतुःश्लोक्या स्फुटार्थकम् ।
सर्वैर्विज्ञास्यते तत्त्वं नित्यानन्दप्रभोर्यया ॥

"तथाहि श्रीरूपगोस्वामिकड़चायाः श्लोकः—

"मायातीते व्यापिवैकुण्ठलोके पूर्णैश्वर्य श्रीचतुर्व्यूहमध्ये ।
रूपं यस्योद्भाति सङ्कर्षणाख्यं तं श्रीनित्यानन्दरामं प्रपद्ये ॥
अतीतं प्रकृतेर्धाम परव्योमाभिधानकम् ।
विभुत्वादिगुणैर्युक्तं श्रीकृष्णविग्रहो यथा ॥
सर्वगं विभु चानन्तं वैकुण्ठादिकधाम तत् ।
कृष्ण-कृष्णावताराणां तद्विश्रामनिकेतनम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपर्यस्ति परव्योम्नः कृष्णलोक इति श्रुतम् ।
द्वारका मथुरा नाम गोकुलश्चेति स त्रिधा ॥
सर्वोपरितमं श्रीमद्गोकुलं व्रजधाम यत् ।
श्वेतद्वीपश्च गोलोको वृन्दावनमिति प्रथा ॥
कृष्णविग्रहतुल्यं तदनन्तं सर्वगं विभु ।
उपर्यधश्च सर्वत्र व्याप्यास्ते नियमं विना ॥
ब्रह्माण्डेऽपि प्रकाशः स्यात्तस्य कृष्णेच्छया पुनः ।
स्वरूपेण तदेवैकं नहि कायद्वयं भवेत् ॥

(क्रमशः)

ग्रन्थसमालोचना

[निबन्धकः—श्रीयादवेन्द्रनाथ-राय-न्यायतर्कतीर्थः]

वैज्ञानिकेर चक्षे गीता। प्रथमखण्डात्मिका। श्रीमतपुलिनविहारि हालदार एम, ए महोदयेन व्याख्याता। ११श संख्यक-चित्तरञ्जन-एभिनिउ कलिकाता १३ इति सङ्केतस्थानात् प्रकाशिता। मूल्यं मुद्राद्वयम्।

कालोपयोगिविज्ञानसम्मतव्याख्यानेन सर्वत्र हेतुवादान्वेषणपरायणानामर्वाचीनानां शास्त्रेषु विश्वासोत्पादनाय या प्रणाली समनुसृता ग्रन्थव्याख्यात्रा सा सर्वथा युक्तियुक्ता हृदयग्राहिणी च। यद्यपि स्वतःप्रमाणप्रदीपस्वरूपायाः श्रीमद्भगवद्गीताया युक्तिप्रद्योतालोकशिखया सन्दर्शनमशोभनमिव प्रतिभाति तथापि पाश्चात्त्यसभ्यताहालाहलपानान्धानां न प्रदीपशिखा मार्गप्रदर्शनाय समर्थेति समधिकतरज्योतिःपदार्थस्य सुतरामावश्यकता वर्तत एवेति ग्रन्थस्यास्य सुबहुलप्रचारः युक्तिबलेन च विकृतचित्तानां स्वस्थतासम्पादनार्थं ग्रन्थकर्तुरेवं क्रमेण शास्त्रसंरक्षणद्वारा शान्तिपरिवेशनाय च निरामयदीर्घजीवनं परमेशसमीपे संप्रार्थ्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संवर्द्धना-सम्मेलनम्

अस्यैव सौरफाल्गुनमासस्य त्रयोविंशदिवसे सायं षष्ठहोरायां स्यार श्रीमद् बद्रीदास गोयेङ्का के, टि, सि, आइ, इ महोदयानामाध्यक्षेण प्रथमतो नवनिर्मित-संस्कृतसाहित्यपरिषतसदनद्वितीयतलस्य शुभं द्वारोद्घाटनकृत्यं समाहितम्। ततश्च परिषदोऽन्यतमसहकारिसभापतीनां श्रीयुत-रमाप्रसाद-मुखोपाध्याय एम, ए, बि, एल् महोदयानाम् अन्यतमसचिवानां श्रीयुत-चपलाकान्तभट्टाचार्य एम, ए, बि, एल्,, महोदयानाञ्च कलिकाताविश्व-विद्यालयनियामकसमितेः (सिण्डिकेट) सदस्यपदासादनेन तथा परिषत सचिवचराणां डक्टर-श्रीयुक्त-गौरीनाथभट्टाचार्यशास्त्रि एम, ए, पि, आर्, एस्, डि, लिट् महोदयानां डि, लिट् इति सम्मानपदलाभेन प्रोच्छ्वसित-प्रमोदप्रवेदनार्थमभिनन्दनपत्रं वाचितं प्रदत्तञ्च। ये चान्ये सुगृहीतनामानः परिषदः साधारणसदस्या डक्टर-श्रीमत्सदानन्द भादुड़ी एम, ए, पि, एइच, डि, महोदय-विश्वविद्यालयकोषाध्यक्षश्रीयुत-सतोशचन्द्र घोष एम, ए महोदय-प्रमुखाः,

कलिकाताविश्वविद्यालयनियामकसमितेः सदस्यपदं लब्धवन्तः तेऽपि स्वनामख्यातैर्महामहोपाध्यायपदभागभिः श्रीयुक्त-कालीपदतर्काचार्यमहोदयैः सादरं सबहुमानं भूयोभूयः प्रशस्य समभिनन्दिताः। तत्राभिनन्दनस्योत्तर-रूपेण विश्वविद्यालयनियामकसमितिसदस्याभ्यां समाजैः सह संस्कृतभाषाया यथा मधुरः सम्बन्धः सञ्जायेत तदर्थं प्रचार आवश्यक इत्युक्तम्। अवसाने च महाकविभासप्रणीतस्य मध्यमव्यायोगस्य समीचीनेनाभिनयेन परिषत-सदस्यैः समागतानां तुष्टिः सम्पादितेति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

9. **Introduction to the Rigveda of Sayanacharya**—Edited by Dr. Pashupatinath Shastri, M.A. B.L. Ph. D. Re. 1-8 ; Re. 1-4- (for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. As.14 ; As. 10 (for members).

11. **Prabhakara-vijayam** of Nandishvara—Edited by Mahamahopadhyaya Anantakrishna Shastri Vedantavisharad and Pt. Ramanath Shastri. Rs. 2-8 ; Rs. 2 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya—Edited by Pt. Bamacharan Kavyatirtha. As 12 ; As 10. (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Prof. Chintaharan Chakravarti, M. A. Re 1-8 ; Re. 1-4 (for members).

14. **Nala-damayantiyam** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2-8 ; Rs. 2 (for members).

15. **Prashastapada-bhashyam**—Edited by MM. Kalipada Tarkacharya. Rs. 4 ; Rs. 3. (for members).

16 **Yatratattvam** of Raghunandana Bhattacharya—Edited by Pt. Dwarikanath Nyayashastri. Rs. 2. ; Re. 1-8 (for members).

17. **Rik-pratishakhyam**—Ed. by Dr. Pashupatinath Shastri, M.A., B.L., Ph.D with the assistance of Prof. Chintaharan Chakravarti, M.A. Rs. 5 ; Rs. 4 (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Prof Akshayakumar Shastri. Re. 2 8 ; Rs. 2 (for members).

19. **Chhandogyamantrabhashyam** of Gunavishnu—Ed. by Prof. Durgamohan Bhattacharya, M. A. Rs. 7-8 ; Rs. 6 (for members). [out of stock]

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by MM. Kalipada-Tarkacharya. Rs. 7. ; Rs. 6 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Prof. Chintaharan Chakravarti, M.A. Re. 1-4 ; Re. 1 (for members).

22. **Prasanta-ratnakaram** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2 ; Re. 1-8 (for members).

23. **Devisatakam** of Mahamahopadhyaya Krishnanath Sarvabhauma —Ed. by Pt. Janakinath Shastri. As. 12 ; As. 10 (for members).

24. **Sataranja Kutuhalam**:—Ed. by Prof Chintaharan Chakravarti Kavyatirtha M.A., As. 8

25. **Satyanubhavam**:—(a new MahaKavya) of MM. Kalipada Tarkacharya, Rs. 5 ; Rs. 4-8 (for members).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

একমাত্র ধর্ম্মই এই সংসার-সাগরে সমুদ্ধর্ত্তা
এবং তাঁরই মহনীয় বাণী প্রচার করিতেছে
গুপ্তপ্রেশ ডাইরেক্টরী পাঞ্জিকা

विशेषतो द्रष्टव्यम्

अयि परिषत्प्रणयिनो ग्राहकमहोदयाः !

वर्षस्यास्य वार्षिकं देयं यैर्नाद्यापि परिशोधितं तैरवश्यं सत्वरं तत् (annual subscription) संप्रेष्य परिषत्कार्यालयस्य सौकर्यं विधातव्यमिति सविनयं विज्ञाप्यते

परिषत्-सम्पादकैरिति

Printed by Bishnupada Bhattacharya M. A. Kabyatirtha. at Calcutta Oriental Press, Ltd., 9, Panchanan Ghose Lane, Calcutta and Published by the same from Sanskrit Sahitya Parishad, 168/1 Raja Dinenda Street, Shyambazar, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C 1073

Vol. XXXVI.

No. 12

३६श-वर्षस्य

१२श-संख्या.

April 1954

१८७५-शकीये

चैत्रे

मासे

संस्कृत साहित्य परिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकौ

श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः

श्रीरामधनशास्त्री काव्य-व्याकरण-पुराणतीर्थश्च

संस्कृत-साहित्य-परिषत्

श्यामबाजार, कलिकाता।

वार्षिकमूल्यम्—रूप्यकषट्कम् ६।

Foreign price—1-4s

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्किञ्चिदावेदनम्

प्रियपाठकमहाभागाः !

जानन्त्येव भवन्तो यत् परिषदियं कियतः कालात् प्रागात्मप्रतिष्ठायै कलिकाता-पौरसभादत्तं किञ्चित् स्थानमधिगत्य तत्रात्मनो वासगृहं रचयितुमारभ्यापि किञ्चिन्मात्रं निर्मायैव महासमरसम्भूतदौर्मूल्यादिभिः कारणैरर्थाभावेन च महता नारब्धं समापयितुं समर्थेति ।

तत् प्रियतमामिमां परिषदं यदि श्रीमन्तः प्रतिष्ठावतीं प्राणवतीञ्च द्रष्टुमिच्छन्ति, तदा सदयं प्रेषयन्तु यथाशक्ति साहाय्यं वक्ष्यमाणसङ्केतेन परिषत्-प्रणयिन्याः कल्पितप्रासादनिर्माणपरिसमाप्त्यर्थमिति ।

सङ्केतः—संस्कृत-साहित्य-परिषत्-सम्पादकः,

१६८।१, राजा-दीनेन्द्रष्ट्रीट्, कलिकाता-४

Sanskrit Sahitya Parishat Series

(Revised up to April, 1951)

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (out of Stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1-4 ; Re. 1. (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshinacharan Bhattacharya. (out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kalipada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. 2 (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshinacharan Bhattacharya. Rs. 2-8 ; out of stock.

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satishchandra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinath Sahityashastri. As. 4.

(Cont. to Cover 3rd Page)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

Vol. XXXVI. No. 12. | १८७५-शकीये चैत्रे ३६श-वर्षस्य १२श-संख्या | April 1954.

मतिमञ्जरी

[निबन्धकः—श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः]

वर्षान्तविज्ञप्तिः

वर्षान्ते सम्पादकत्वेनास्माभिः किञ्चिद्वक्तव्यमित्येषा रीतिः । सा तु-नानुस्रियतेऽस्माभिः । यतो गतः खलु कालो वाक्प्रपञ्चस्य—अधुना कर्म्मणः कालः । तच्च कर्म्मास्माभिरनुष्ठितं न वेति तत् पाठकमहोदयै-रेव विवेचनीयम् । अस्माभिरेतदधिकृत्य केवलमुच्यते यत साध्यानुरूपं कर्म सम्पादितमिति । परं या विच्युतिः सा यद्यपि न केवलमर्थनिबन्धना तथापि—कोषालस्यत्वमपि सामग्रीकुक्षावववगाहते । अतश्चास्माभिः सखेद-मिदं विज्ञाप्यते यद् वङ्गप्रान्ते प्राधान्येन प्राय एकैवैषा संस्कृतपत्रिका प्रचरति,—तत्र तु संस्कृतानुरागित्वेन प्रथितयशसामपि नानुरागः सम्यग् दृश्यते । किं तत्र कारणमिति गवेषयद्भिरप्यस्माभिर्नावलोक्यते तत्त्वम् । यदि संस्कृतानुरागिणोऽस्माकं भ्रान्तिं निर्दिश्य तत्संशोधनाय यतेरन् ततः सुतरां पत्रिका निर्दोषा विमला च काशयति दश दिशः सुनिर्म्मलैः स्वतेजः-प्रभावैः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राष्ट्रे वा समाजे वा प्रायो विशिष्टा जना भारतीयसंस्कृतेस्तन्मूलायाः सभ्यतायास्तन्मूलायाश्च संस्कृतभाषाया गौरवं घोषयन्ति। तदुद्घोषणं यदि मानसैक्यमनुसरति तदावश्यमेवेयं संस्कृतभाषा नोपेक्षितेव प्रतीयेतेत्यस्माकं मतिः।

सर्वे संस्कृतानुरागिणः कृतधियो विद्वांसोऽस्माभिर्भूयोभूयः सादरं सविनयं च विज्ञाप्यन्ते यथा तेऽत्र यदि सम्पादितयत्नाः कर्तव्यं किञ्चिदिव समाचरेयुरस्माभिः सार्द्धमेकीभूय तदा पत्रिकाया अस्याः शोभाः सम्पादयेयुरिति संक्षेपतो निवेदनम्।

संस्कृतसाहित्यपरिषदः ३६श वार्षिकमहोत्सवे
सभापतीनां महामहोपाध्याय-श्रीयुतविधुशेखरशास्त्रि-महोदयानाम्

अभिभाषणम्

(पूर्वानुवृत्तम्)

संस्कृतसाहित्येतिवृत्तम्

पूर्वं किल कश्चित् कदाचित् कस्याञ्चित् विद्वज्जनपरिषदि पारिषद्यान्न्यवेदयद् यः कोऽपि तीर्थपरीक्षार्थी स्यात्तेन संस्कृतसाहित्येतिवृत्तमवश्यमध्येतव्यमिति विधीयतामिति। तत्र प्रत्युत्तरत्वेन कस्यचिद्विद्वद्धौरेयस्येयं वाक् स्वमित्रं प्रति श्रुतिपथमगच्छत् ब्रूहि भो विद्यारत्न तत्रभवान् कालिदासः स्वसरसः कतमस्मिंस्तीर्थे प्रत्यहं सस्नाविति ज्ञानं नूनं कौतुकमावहति तदीयस्य काव्यस्यार्थावगमे तु कियत्तदुपकरोति। तूष्णीमासीत्सापरिषत्। आसीच्चारण्यरुदितं सर्वम् यथा वा तथा वैतद्भवतु। नैतदुपहसनीयं, न तरां चोपेक्षणीयम्, नूनमनर्हा आसंस्ते सदस्या ये नाशक्नुवन् बोद्धुं हितमात्मनः परस्य च। ध्रुवं च ते तत्रभवन्तो नावेदिषुः किं नाम साहित्येतिवृत्तं भवतीति। तत्क्रियतां यदुचितम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैदिकसाहित्यम्

स एव पुमांस्तस्यामेव च विद्वज्जनपरिषदि पुनरवोचत् तीर्थपरीक्षार्थी किमपि सङ्ग्रहरूपं वैदिकसाहित्यमधीयीतैवेति विधेयमिति। तदेतद्बलवदक्षुन्नाच्चित्तं तस्यैव विद्वद्धुरन्धरस्य। अश्रूयत च तस्य गर्जितं धर्मो नो नश्येद् धर्मो नो नश्येदिति अद्विजा अप्यधिक्रियन्ते तीर्थपरीक्षायामाविर्भवन्ति च ते तत्र। न च तेऽधिक्रियन्ते श्रुतौ।

किमत्र प्रतिपत्तव्यम्। द्वयी गतिः। अधीयतां यदध्येतव्यम्। सर्वथा हीयतां वा परीक्षा।

विषयेतिवृत्तम्

एतच्चेह विमृश्यताम्। यदधस्तात्संस्कृतसाहित्येतिवृत्तमिति विवेचितं तस्यैवायं प्रपञ्चः। नैतत्तिरोहितं विदुषां सन्ति ग्रन्था दुरवगाहा येऽवश्यमध्येतव्याः। अन्यथा—शास्त्रमेव शनैः शनैरुच्छिद्येत। तत्सुष्ठुतरं प्रवर्ततामध्ययनमध्यापनं च यथाद्यत्वे प्रवर्तते कर्तव्यस्त्वत्र कश्चित्प्रयासविशेषः। अधीतेष्वप्यनेकेषु गम्भीरार्थेषु दुरवबोधेषु च ग्रन्थेषु न तज्ज्ञानं पशस्यं येन नाधिगम्यते यथायथमितिवृत्तमिति प्रथितो वृत्तान्तो विषयस्य विवृण्वन्नेतस्योद्भवं वृद्धिमन्यच्चैवंजातीयमनेकम्। यदि कश्चिदद्यत्वे न्यायविद्यामध्येतुमीहेत अधीष्व साधो न्यायवैशेषिकतन्त्रे इत्युपदिश्येत। स तथा कुर्यात्। अथ फलति तस्य फले साधु शस्तोऽसि साधो स्वधीती न्यायविद्यायामिति स प्रशस्यते लोके। अथ चेत् पृच्छतु स किञ्चिज्जैनन्याये बौद्धन्याये वा मनागपि न शक्नुयात् सत्प्रत्युत्तरयितुम्। न चानयोश्चर्चा लघीयसी। अतिमहच्च गौरवमापादितमाभ्यां न्यायविद्याया भारते। तेन चास्माकं भारतस्यैव। अतो भारतेऽभिजातेन नैयायिकेन विद्यार्थिना यावच्छक्यं सम्भवति चावश्यमवगन्तव्यमितिवृत्तं न्यायशास्त्रस्य। यथा च न्यायशास्त्रस्य तथैव वेदान्तादीनामपरेषां शास्त्राणामित्युपपद्यते।

बृहत्तरभारतेतिवृत्तम्

सन्ति केचन जनपदा भारताद्बहिः सन्निकृष्टा विप्रकृष्टाश्च ये खल्वद्यत्वे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोके बृहत्तरभारतनाम्ना प्रथन्ते। अभूत्तैर्भारतस्य नैकप्रकारो नेदीयान् मिथः सम्पर्कः। उत्कर्षाय विद्यायाः प्रसाराय ज्ञानगोचरस्य अपरस्मै च भूयसे लाभाय न वयं भारतसंसृष्टं तदितिवृत्तमवज्ञातुमर्हामः। एतच्च सुकरमवगन्तुमस्माभिः स्वकीययैव वाचा।

अवेस्ता

अथाहमतिभूमिमिव किञ्चिद्वन्तुमिच्छामि। सर्वथाप्यभिनवमिव वा किमपि श्रावयितुमभिलषामि भविष्यति हितमतिमहत्संस्कृतविद्यार्थिनामिति मन्वानः। मा मां कश्चिदन्यथा मंस्त। ब्रवीमि, न मां पाण्डित्यप्रकर्षाभिमानः प्रवर्तयति कस्मिंश्चिदविनये। तथापि शङ्कत इव मे चित्तम्। अथवावश्यवक्तव्ये किमेतया मे विचिकित्सया।

अस्माकं वैदिकी वाक् पारसीकानां च वागवेस्ता नाम मिथः सम्बन्धेन सहोदरे। तयोः प्रथमा ज्यायसी। द्वितीया तु कनीयसी। किञ्च संस्कृतप्राकृतयोरन्योन्यं यश्च यावांश्च सम्पर्कस्ततोऽप्यतितरां स नेदीयान् संस्कृतावेस्तयरिति पश्यन् पुरुषः सपद्यापद्येत विस्मयम्।

संस्कृतम्	अवेस्ता
सोमः	ह ओ मो
असुरः	अहुरो[1]
देवः	दएवो[2]
यज्ञ (यज् नः)	यश्नो
गाथा	गाथा
हस्त	जस्तो
पुत्रः	पुथ्रो
मित्रः	मिथ्रो[3]
मृगः	मेरेगो[4]

१। प्राणवत् प्राणप्रद। २। दैत्य।
३। मित्र>मिथ्र>(मिथिर)>मिहिर। ४। विहङ्ग

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized By Arya Samaj Foundation Chennai and eGangotri

गिरिः	गइरिश्
भूरिः	बुइरिश्[५]
पतिः	पइतिश्
विश्वः	वीस्पो
सेना	हएना
अथ कानिचित	क्रियापदानि
√भू (भ्वादि)	भवति बवइति
√भृ (भ्वादि) भरते	√वर वरइते
√हन (अदादि) हन्ति	√जन जइन्ति
√अस् (अदादि) अस्मि	√अस् अह्मि
क्र्यादि	
√ग्रभ्=ग्रह गृभ्णामि	√गेरेभ् गेरेभ्नानि
√अस् (अदादि) असि	अहि
संस्कृतम्	अवेस्ता
√प्री, प्रीणामि	फ्रनामि
√दा ददाति	ददाइति

संस्कृत इवावेस्तायामपि लिङ्गवचनपुरुषाणामेकैकस्य त्रिविधेन भेदेन शब्दरूपप्रकरणम्। समासप्रकरणम्। क्रियाप्रकरणम् (यत्र दश लकारा दश च धातुगणाः)। कृत्प्रकरणम्। तद्धितप्रकरणम्। अन्यच्चैवंजातीयकमपरापरं व्याकरणविषयं पर्यवेक्षमाणस्य पुरुषस्य संस्कृतावेस्तयोर्नैदिष्टः सम्पर्कः स्पष्टतरं प्रादुर्भवेत्समुत्पादयेच्च तेन प्रमोदप्रवाहमतिमहान्तम्।

इदं चेह किञ्चिद्धृदयङ्गममवेस्तासंसृष्टम्। ए ऐ ओ औ इत्येतानि चत्वारि सन्ध्यक्षराणीति सुप्रसिद्धम्। द्वयोर्द्वयोरक्षरयोः सन्धिना तेषामेकैकस्योद्भूतत्वात्। तत्र ऐकारस्य औकारस्य च सन्ध्यक्षरत्वं स्पष्ट-

५। अवेस्तायां नास्ति मध्वनिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेवास्माभिरुच्चारणमात्रादप्यनुभूयते। अपरिस्मिंस्तु सन्ध्यक्षरद्वये (एकाररूपे ओकाररूपे चाक्षरे) नैवं सन्ध्यक्षरत्वं स्तोकमप्यनुभूयते। किन्तु अकारादिवत् कश्चिदसङ्कीर्णः स्वरो ज्ञायते। तदेतद्विवेचितमृग्वेद-प्रातिशाख्ये। यथा पयस उदकस्य चान्योन्यं संसृष्टौ कुत्र पयः कुत्र वोदकमिति न शक्यं विवेक्तुम्, एवमेकारे ओकारे च तयोस्तयोर्द्वयोः स्वरयोर्याभ्यां सन्धिना तयोरुद्भवः। अद्यत्वे संस्कृत एकारस्य ओकारस्य च सन्ध्यक्षरधर्मः प्रक्रियायां वर्त्तमानोऽपि प्रयोगे सर्वथापि तिरोभूतः। अवेस्तायां तूभयथापि वर्तते। स एष विशेषोऽवेस्तायाः संस्कृतात्।

अन्यच्चेयमुपकरोति संस्कृतस्य। सन्ति केचन शब्दाः संस्कृते ये द्वयमर्थं बोधयन्ति ऋतुं वत्सरं च। यथा वयं शरच्छब्देन प्रसिद्धमृतुं वत्सरं चोभयमपि बुध्यामहे।१ एवं हिमशब्दः।२ वर्षवर्षाशब्दयो-राकारत ईषद् भेदेऽपि प्रकृतिस्तयोश्चिन्तयितव्या। नात्र कश्चिद्भेदः। अथ कदाचिदुदपादि मे चेतसि। अस्ति नु कश्चिन्निदाघवाचकः शब्दो यः शरदादिवदृतुं वत्सरं चोभयं बोधयति। दीर्घमपि कालमनुसन्दधानो नाहमेनमध्यगच्छम्।

अवश्यं त्वेनेन भवितव्यम्। न खलु सुषहो निदाघो भारते सर्वत्र। नायं सर्वथाप्यवज्ञेयः।

अथ कदाचिद्विश्रामसुखमनुभवति मयि उद्वर्तयति च स्वैरमवेस्ताकोशस्य पत्राणि सपदि मे दृग्गोचरमापतितस्तत्र कश्चन शब्दः। समुत्पन्नश्चाति-महान् हर्षः। लब्धो हि स लाभो यो मयैतावन्तं कालमियदन्विष्टम्। स च शब्दो हम इति। अयं च निदाघार्थः। अवेस्तायां संस्कृत इव समार्थेऽप्येष शब्दः प्रयुज्यते। अयं च हमशब्दः संस्कृते समा एव। सद्य एवाहमस्मार्षमेनं वत्सरवाचकम्। यः खलु छन्दसां नूतनेऽवतारे भगवतो वाल्मीकेः काव्ये सर्वं एव स्मरन्ति। यथा

"मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः

१। "जीवेम शरदः शतम्" २। "शतं हिमाः।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ इति ।

संस्कृतशब्दे स्वरात्पूर्ववर्ती सकारो हकारो भवतीति नियमोऽवेस्तायाम् । प्रागुदाहृतम् । इहापि द्वित्रमुदाह्रियते । असि=अक्षि । सप्त=हप्त । सुमतं =हुमतम् । सुक्तम्=हखतं ।

अथ का व्युत्पत्तिः समाशब्दस्य । आहुः केचन । समिवैकल्य इति । अन्ये त्ववैल्य इति पठन्ति । वैकल्यं च पुंसो निदाघादिव शीतादिभ्योऽप्युत्पद्यते । न केवलं निदाघादेव । अवेस्तार्थस्त्वतिस्पष्टः । अयं चशब्द ईषदाकारान्तरेण एतस्मिन्नेवार्थे भाषान्तरेष्वपि लभ्यते ।१ किमत्र बहुना ।

१ । English *Summer* ; Gersman *hmmer*.

निधिगोपाः

आचार्यो यास्क आह येऽस्माकं विद्यां रक्षन्ति ते निधिगोपा भवन्तीति । निधिगोपैर्भवद्भिर्भवितव्यं भो विद्वांसः । अतिसमासात्किञ्चिदिवोच्यते । परःसहस्राः संस्कृतग्रन्थाश्चीनेषु भोटेषु च तैस्तैस्तत्रत्यैर्विद्वद्भिस्तस्मिंस्काले स्वस्वभाषामवतारिताः ।

अन्येद्युः कश्चन मोङ्गलभिक्षुरनुभूतिस्वरूपाचार्यकृतं सारस्वतव्याकरणमधीयानो मया श्रुतः । न तानीह परिगणयितुं शक्यन्ते । शास्त्राणां विशेषेण तु बौद्धानां कथैव नास्ति । एवं चीनवाच्यपि । भूयसामेषां ग्रन्थानां मूलं तिरोभूतम् । अद्भुतमिव तु भोटभाषायामवतारणम् । तथेदं कृतं भोटकैर्यथा मन्ये सर्वथास्माकमेव परमाय हिताय तद्विहितमेतदिति । न चेदं कश्चित्स्वप्नेऽपि मनुष्यादशक्यमिदमस्माकमिति । अभये हि भवन्तो भयं पश्यन्ति । भवतामेव हीदं कृत्यम् । इहागमनात पूर्वमचिन्तयमहं सखायो म एतादृशेषु स्वपरहितेषु कर्मसु सानन्दं प्रवर्त्स्यन्तीति । भागधेयविपर्यासस्त्वासीदन्यादृश एव । न स्वकृत्यं स्मर्यते सुहृद्भिरवज्ञया । ईप्स्यते चेच्छ्रूयतां ब्रवीमि । पूर्वमेवेदमारब्धं कृत्यं नः कैश्चित । वयमेव तु प्रमादेनालस्येन च स्वपिमः । सेयं भूमिरस्माकमेव । तच्चेदिष्यते कर्षणेन नूनमेषा कनकं प्रसोष्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नवा बौद्धग्रन्थाः

भोटप्रसङ्गो मामितोऽन्यत्र किञ्चिन्मुखरयति। बहूनि नः शास्त्राणि विशेषेण ते बौद्धानि विलुप्तानि वा प्रायेणासुगमानि वा। अद्यत्वे तु ध्रुवमतिकृतवेदिनो वयं विद्वद्वरस्य साङ्कृत्यायन-श्रीराहुलस्य येन रात्रिंदिवममिमात्रं परिश्राम्यता पर्यटता च भोटविषयान् विपत्तिमपि महतीमाश्लिष्य केचिदतिदुर्गमा ग्रन्था आसादिताः। एषु केचन ग्रन्थाः। अपरे तु साम्प्रतिकाश्छायाचित्ररूपाः (७२ संख्यकाः) वर्तन्ते ते साम्प्रतं पाटलिपुत्रनगरे जयशालगवेषणभवने। इदं तु दुनूयाच्चित्तं मतिमतामतिमात्रं यदेते चित्रपटाः प्रतिदिनं शनैः शनैः परिम्लायन्तः पश्यतामेव नस्तिरोभवन्ति। न पुनर्वयं संस्करणेन यथोचितं संरक्षणाय प्रयतामहे। अत्यल्प एव पुनः केचन प्रयस्यन्ति। ततश्च लब्धा अपि ते पुनर्नातिचिराद्विनश्येयुः। अप्यस्त्यत्र न कश्चित्प्रतीकारः। को नाम मादृशो ब्रूयान्नास्तीति। अस्त्येष स्फुटम्। न तु वयं कुर्मः। कर्तव्यं तु यथा वा तथा वा।

संस्कृतविद्वांसः। किमेते कुर्युः ?

अवसितप्रायं मे वचनम्। स्वल्पं शिष्यते। तत्पुनरतिगरीय इत्यवश्यं वक्तव्यं श्रोतव्यं चिन्तयितव्यं च। अन्यथानिवार्या विपत्तिरतिमहती। भारतजीवातुभूतायाः संस्कृतविद्याया एकान्तोपासका विद्वांसः प्रतिदिनं प्रसृतिप्रमाणस्यापि तण्डुलस्य कृते सकुटुम्बं ग्लायन्तः कियदवसीदन्तीति को नामास्मासु न वेत्ति। किमत्र प्रतिपत्तव्यम्। किं ते कुर्युः। न ते भिक्षवः। न च तेषां भिक्षुभावः कथञ्चिदपि सोढव्यः यथा तथा वास्तु। अपाकर्त्तव्य एवायम्। मा तान् कश्चिच्छुन इव कतिभिरुच्छिष्टपिण्डैः सन्तोषयितुं यतिष्ट। यात्रामात्रं धर्म इति त ईहन्ते नाधिकम्। गुण एव त्वद्यायं तेषां दोष इव सम्पन्नः। भाग्यात् तदत्यल्पकमपि न तैर्लभ्यते। लभ्यतां तैस्तदितिति को नाङ्गीकुर्यात्। न खलु न विद्यते वङ्गेषु मुख्यसचिवः शिक्षासचिवः परे वा ते तेऽधिष्ठातारः पुरुषाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिक्षायाः। स्निह्यति रज्यते वा चित्तमेषां संस्कृत इति बहिः प्रतिभासमानमपि न वस्तुतस्तथा प्रतीयते। सन्ति केचन प्रतीहारा एकैकस्याप्यधिष्ठातृपुरुषस्य। स्याच्चावश्यमेकैकस्य प्रतीहारस्य मासिकी भृतिः। कियती स। ध्रुवं सा मात्रया भूयसी तस्या वृत्तेर्या वितीर्यते करुणया कस्मैचित्संस्कृतविदुषे। तदेतत्स्वयं विदधाना अपि अधिकृतपुरुषा न स्तोकमप्यपत्रपन्त इति हा हतासि देवि संस्कृतविद्ये।

जिजीविषा नाम जनस्य नैसर्गिकी। यथा कथञ्चित स जीवेदेव। न भिक्षया न जीव्यते। दूर्जीवितं नु तत्। न च निष्पद्यते तेन प्रयोजनम्।

किं तर्हि कर्तव्यम्। श्रूयताम्। "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः" इत्युपदिदेश नो महर्षिः। तच्छ्रोतव्यमिदं तदनुरूपयैव श्रद्धया। नास्ति किञ्चिदविषयो नाम कर्मणः। न किञ्चिद्यन्न सिध्यति कर्मणा।

न तत्तपो यन्न साधयति हितं पुरुषस्य। अत्र चाल्पानामपि वस्तूनां संहतिः कार्यसाधिका भवतीति नीतिविदामतिलघ्वपि वचनं न कथञ्चिदुपेक्षणीयम्। सन्त्यनेकानि सांमनस्यानि कर्माणि वेदवचनेषु। स गच्छध्वं सं वदध्वं सं वो मनांसि जानतामिति को नामास्मासु न वेत्ति : तदेतत्सर्वं संस्कृतविषश्चितश्चिन्तयन्तु विचारयन्तु सम्भूय च प्रवर्तन्तां तेषु तेषु कर्मसु।

बहवो नो विपश्चितो ये तेषु तेषु जनपदेषु ग्रामनगरादिषु च निवसन्ति न केवलमेतस्मिन्नेव महानगरे न चैकोऽप्येषामयोग्यः। तदाहुर्नीतिविदः "अयोग्यो नास्ति वै कश्चिद् योजकस्तु सुदुर्लभ" इति। अस्ति प्रयोजनं महामहोपाध्यायेन। अस्ति प्रयोजनं काव्यतीर्थेन, अस्ति च प्रयोजनमकाव्यतीर्थेनापि। स एव तु पुमान् दुर्लभो यः कश्चित्कस्मिंश्चित् कर्मणि युनक्ति। तदेतद् यः कोऽप्युन्नेतुं शक्नोति। एक एव हि शरीरधारणव्यापारो विविधैरङ्गप्रत्यङ्गैः सम्भूय यथाशक्ति ि.यते। अन्तरेण त्वेकेन तदंशो न सम्पद्यत इत्यपि दृश्यते।

क पुनः कर्माणि। कानि वा तानि यानि करणीयाण्यस्माभिरित्युच्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न तावदेकस्यापि पर्याप्तं कर्म दृश्यते। कुतो न्वेतावतामस्माकं भविष्यति अथ विद्यन्ते कर्माणि क्व तावानर्थो यं भवानस्मासु विभक्तुमीहते चिन्तयतीवात्रभवान् स्वमनस्यस्माकमनशनम्। मा भवन्तो भैषुः। अ मेतेनोद्वेगेन। सत्यं न सन्ति साम्प्रतं कर्माणि। उद्भावयिष्यन्ते त्वकाम मानैरप्यधिष्ठातृभिः पुरुषैर्यथा परेषां जनगणानां कृते। तदयं काल एवा स्पष्टं सूचयति।

तत्र साम्प्रतं समासात्त्रिचतुराणि कर्माणि चिन्त्यन्ते।

अभिनवानां ग्रन्थानां विरचनम्।

(१) यथा कश्चन संस्कृतकोशः, नास्ति कश्चन तादृशः कोशः संस्कृ भवेद्यः खण्डे आकारेण चतुर्दशशतानधिकपद्यात्मकः। निष्पद्यते च ये तत्प्रयोजनं संस्कृतकोशस्य भवति यदति सुप्रथितेन मनिअ वइलि-अमस्य आङ्गलिखितेन संस्कृतकोशेन। दुष्करमस्येह वर्णनम् स्वयं सन्त एतद् द्रष्टुं श्रोतुं चार्हन्ति। शब्दकल्पद्रुमस्य वाचस्पत्य वा गौरवं महत्त्वं वानेनापलप्यते। विषयान्तरे हि तयोरुपयोग योजनीयं च तत्र तत्तत् प्रभूतम्। ततश्च न सिध्यत्यस्माकं तत्प्रयोज यदर्थमपेक्ष्यतेऽयं कोशः॥

अयमन्य ईदृशः कोशः। अभिधीयतामयं भारतीयो दर्शनमह कोशः। विस्तरं विहाय सारमात्रमस्य निर्दिश्यते। प्रथमं तावद् य सङ्कलितो न्यायकोशस्तथान्येषामपि सर्वेषां दर्शनानामेकैकः कोशः कर्तव्य ततस्तैः सर्वैः कोशै रचनीयः कश्चिदेको महान्कोशो योऽभिधीयेत भारतीय महादर्शनकोश इति। उदकीर्त्तयत्तत्र तदात्वे वङ्गानां विश्वविद्यालये दर्शन मुख्योपाध्यायः श्रीराधाकृष्णस्तमिमं महादर्शनकोशमधिकृत्येमामुक्तिम्- तच्चेत्कोशोऽयं सम्पूर्यते विश्वविद्यालयमिममरं करिष्यतीति। दुर्भाग्ये यात्तु न स सम्पूर्णः परित्यक्तश्च तत्सङ्कल्पोऽपि। अतः पुनरयमवश्य मारब्धव्यो विपश्चिद्भिर्विविधाय हिताय च लाभाय सर्वेषामेव संस्कृत विपश्चिताम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालिदासकोश इत्यन्यः कश्चन कोशः प्रक्रान्तः सङ्कलयितुं विश्वविद्यालये। अधन्यतया तु तस्य सोऽपि हन्त परित्यक्तः। किमत्र वक्तव्यम्। अयमपि कोषः कर्त्तव्यः।

एवं कियन्ति नामैतादृशानि रचनीयानि पुस्तकान्युद्दिश्यन्ताम्। न खलु विद्यत एषामियत्तेति। यथा संस्कृत-पालि-प्राकृतप्रभृतिभ्यस्तेषां तेषां विषयाणां भाषायामवतारणं विरचनं च नवनवानां विविधानां ग्रन्थानाम्। निधिगोषप्रसङ्गे च चीनभोटभाषातः संस्कृतोद्धरणमत्रैवान्तर्गच्छति।

एतच्चानतिपात्यं कृत्यं मन्यामहे। भूयस्युपकृतिर्हि सम्पत्स्यतेऽनेन विपश्चिताम्। एतन्नाम वर्तमानेनाभिनवेन प्रकारेण संस्करणे ग्रन्थानां येन ग्रन्थस्य सर्वोऽपि पाठः साधिष्ठ एव भवेत्। प्रकृष्यते चास्योपयोगो विविधेनाकारेण। अनुशीलनीयमिदं कर्म कानिचिद्दिनानि तैर्यं कामयन्ते तत्कर्तुम्।

उपायः।

कृतं कृतं भो विस्तरेण। न खलु नास्माकमपि चित्तमीदृशमितः प्रकृष्टतरं वा किञ्चित्परिकल्पयितुमीष्टे। भद्रं ते। एते स्मः। कारयतु भवानस्माभिर्यच्चिकीर्ष्यते। वित्तमेव तु तावन्न दृश्यते। न चाभुक्तः कश्चिज्जीवति। कथं न्वेतत्सेत्स्यति।

सत्यमस्त्ययमनुयोगः। उक्तमधस्तान्न खलु नास्त्यत्र प्रतीकार इति। किञ्च। अस्ति स श्रीगौरीसेनः। ध्रुवं स वित्तं दास्यति। अथ न स दित्सेत्। कथञ्चित् दापयिष्यत एव। यो नाद्य ददाति श्वः स दाता। अवितथमिदं राष्ट्रकोशस्य मुखमद्य पिहितमस्मत्कृत इति। श्वोऽपि तत्तथैव स्यादिति न शक्यं वक्तुम्। मन्महे च प्रयस्यद्भिरस्माभिर्न तावन्ति वित्तानि दुरधिगमानि भविष्यन्ति यावन्ति न कल्पनामप्यतिक्रमिष्यन्ति।

सुप्रतिष्ठितेयं साम्प्रतं संस्कृतसाहित्य-परिषदतिक्रम्य शनैः शनैरात्मनः शिशुभावं संचिन्वाना च शक्तिं महतीम् कर्म यदनयाद्य सुकरं न तदन्यै-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहुभिरपि। तच्चेत्सत्यं किञ्चिच्चिकीर्ष्यते करुणया क्षणं चिन्तयन्तु भवन्तः शान्तेन चेतसा यन्निवेदितमनेन वो मित्रजनेन। स मन्यते नास्ति किञ्चिद् येनेयं संस्कृतसाहित्यपरिषदिह न सर्वानपि संस्कृतसमाजानात्म गुणेनातिवर्तितुं प्रभवेदिति।

बहूक्तं भोः सखायः! कृतोऽयमञ्जलिः। आपृच्छे सविनयं सविस्मय च। मर्षणीयोऽस्मि स्मरणीयश्चास्मि करुणया गोष्ठीकथासु।

विजयतां भगवती संस्कृतसरस्वती।
विजयतां संस्कृतसाहित्यपरिषत्।
विजयन्तां च सर्वे
तदीयाः सदस्याः।
ॐ शान्तिः शान्तिः शान्तिः॥

श्रीचैतन्यचरितामृतसंस्कृतानुवादः

(पूर्वतोऽनुवृत्तः)

अनुवादकः—श्रीभास्करानन्दस्वामी।

श्रीश्रीचैतन्यचरितामृत आदिलीलायां

पञ्चमः परिच्छेदः

चिन्तामणिमयी भूमिः कल्पवृक्षमयं वनम्।
प्रपञ्चवन्निरीक्षन्ते जनास्तच्चर्मचक्षुषा॥
सप्रेमचक्षुषामग्रे तत्स्वरूपं प्रकाशते।
सार्द्धं गोपैश्च गोपीभिर्यत्र कृष्णो विराजते॥

"तथाहि ब्रह्मसंहितायाः ५।२५ श्लोकः—

"चिन्तामणिप्रकरसद्मसु कल्पवृक्ष-
लक्षावृतेषु सुरभीरभिपालयन्तम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लक्ष्मीसहस्रशतसम्भ्रमसेव्यमानं
गोविन्दमादिपुरुषं तमहं भजामि ॥४॥"
मथुराद्वारकापुर्योर्निजरूपं प्रकाशयन।
चतुर्व्यूहीभवन कृष्णो बहुधा विलसत्यसौ ॥
वासुदेवस्ततः सङ्कर्षणः प्रद्युम्न एव च।
अनिरुद्धश्च ते सर्वे चतुर्व्यूहान्तरांशिनः ॥
सर्वोपाधिविनिर्मुक्ता मायालेशविवर्जिताः।
विशुद्धाश्च तुरीयाश्च चतुर्व्यूहाः प्रकीर्तिताः ॥
एतेषु त्रिषु लोकेषु कृष्णो लीलामयः परम्।
स्वीयैः परिकरैः सार्द्धमनन्तं क्रीड़ति स्वयम् ॥
परव्योमनि रूपं स्वमेकं कृष्णः प्रकाशयन।
श्रीनारायणरूपेण नाना लीलाः करोत्यसौ ॥
कृष्णस्य द्विभुजो ह्येव विग्रहः स्यात् स्वरूपतः।
श्रीनारायणरूपेण स एव स्याच्चतुर्भुजः ॥
शङ्ख-चक्र-गदा-पद्म-महैश्वर्यमयः सदा।
सेवन्ते तस्य पादाब्जं श्रीभूलीलाख्यशक्तयः ॥
अपि चेद्धर्म एवैकस्तस्य क्रीड़ा हि केवलम्।
तथापीयन्ति कर्माणि कुर्य्याज्जीवानुकम्पया ॥
सार्ष्टि-सालोक्य-सामीप्य-सारूप्याख्याः समर्षयन।
मुक्तीश्चतुर्विधा जीवान् संसारात्तारयेदसौ ॥
ब्रह्मसायुज्यमुक्तानां नास्ति तत्र गतिः किल।
बहिरेव हि वैकुण्ठात्तेषां भवति संस्थितिः ॥
वैकुण्ठाद्बहिरस्त्येकं यज्ज्योतिर्मयमण्डलम्।
कृष्णस्याङ्गप्रभा तद्धि दीप्यते परमोज्ज्वलम् ॥
अतीतं प्रकृतेस्तत्तु सिद्धलोकाभिधानकम्।
चितस्वरूपं न तत्रास्ति चिच्छक्तेर्विकृतिः क्वचित् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्विशेषं यथा भाति बहिः सूर्य्यस्य मण्डलम् ।
सूर्य्यस्यान्तस्तु दीप्यन्ते सविशेषा रथादयः ॥
चिच्छक्तेः परमव्योम्नि विलासा बहवस्तथा ।
निर्विशेषं बहिर्ज्योतिर्विभ्वं शश्वत् प्रकाशते ॥
निर्विशेषं हि तद्ब्रह्म ज्योतिर्मयमशेषतः ।
सायुज्यमुक्तिमासाद्य तत्रैव लभते लयम् ॥

"तथाहि भक्तिरसामृतसिन्धौ साधनभक्तिलहर्य्यां ११० माङ्कधृत-ब्रह्माण्डपुराणम्—

"सिद्धलोकास्तु तमसः पारे यत्र वसन्ति हि ।
सिद्धा ब्रह्मसुखे मग्ना दैत्याश्च हरिणा हताः ॥५॥
तस्मिन्नेव परव्योम्नि नारायणसमन्ततः ।
द्वारकास्थचतुर्व्यूहप्रकाशान्तरमस्ति हि ॥
द्वितीयास्ते चतुर्व्यूहा वासुदेवादयः पुनः ।
सुविशुद्धास्तुरीयास्ते द्वारकायामिवासते ॥
तत्र यो रामरूपोऽसौ महासङ्कर्षणः स्मृतः ।
आश्रयः स हि चिच्छक्त्या जगत्कारणकारणम् ॥
विलासो यश्च चिच्छक्त्याः शुद्धसत्त्वाभिधानकः ।
शुद्धसत्त्वमयं तावद् वैकुण्ठादिकधाम तत् ॥
षड्ऐश्वर्य्याणि तत्रापि चिन्मयान्यखिलानि च ।
सङ्कर्षणविभूतिः सा निश्चयेनावगम्यताम् ॥
जीवो नाम तटस्थाख्या शक्तिर्या विद्यतेऽपरा ।
महासङ्कर्षणोऽसौ तत्-सर्वजीवसमाश्रयः ॥
यस्मादुत्पद्यते विश्वं यस्मिंश्च प्रविलीयते ।
तस्यापि पुरुषस्यासौ श्रीसङ्कर्षण आश्रयः ॥
अपारैश्वर्य्य आश्चर्य्यमयः सर्वाश्रयश्च सः ।
महिमानमनन्तोऽपि वदितुं यस्य न क्षमः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तुरीयं शुद्धसत्त्वं यच्छ्रीसङ्कर्षणसंज्ञकम् ।
तद् यस्यांशो भवेन्नित्यानन्दरामः स कथ्यते ॥
संक्षेपेणाष्टमः श्लोकः स्फुटार्थो विवृतो मया ।
श्रूयतां नवमश्लोकस्याधुनार्थोऽवधानतः ॥

"तथाहि श्रीरूपगोस्वामि-कड़चायाः श्लोकः—

"मायाभर्त्ताजाण्डसंघाश्रयाङ्गः शेते साक्षात्कारणाम्भोधिमध्ये ।
यस्यैकांशः श्रीपुमानादिदेवस्तं श्रीनित्यानन्ददेवं प्रपद्ये ॥६॥

अस्ति ज्योतिर्मयं धाम वैकुण्ठाद्बहिरेव यत् ।
स कारणार्णवो नाम ततोऽपि वर्त्तते बहिः ॥
वैकुण्ठं परितो वृत्वा योऽयं कारणवारिधिः ।
अनन्तः पारहीनोऽसौ नावधिस्तस्य विद्यते ॥

(क्रमशः)

शोकसन्देशः

सौरचैत्रस्य त्रयोविंशदिवसे रजन्यां स्वनामधन्यानां विश्वविश्रुत-कीर्तीनां साधकप्रवराणां दार्शनिकशिरोमणीनामाचार्य्य-महेन्द्रनाथ-सरकारमहोदयानां भारतीयदर्शननभस्तः पतनं भारतवर्षस्याशुभोदर्कं सूचयति । विदुषामेतेषां वैदुष्यादिवैशिष्ट्यं न केवलं शास्त्रज्ञानमात्रोप-निबद्धमपितु सम्यगनुभूतिलब्धम् । कृततत्त्वसाक्षात्काराणामिव ज्योतिः-स्वरूपाणामेतेषामन्तर्धानेनापि साधनलब्धज्ञानाचरणादिकं प्रतिपादयन्तौ "तन्त्रेर आलो" "उपनिषदेर आलो" इतीमौ ग्रन्थौ भारतभूमिं चिरं विद्योतितां करिष्यत इत्यत्र नास्ति सन्देहावसरः । तथाप्येतेषां महात्मनां तिरोधानेन "महापुरुषपतनक्षति" र्या सञ्जाता सा सुतरामपूरणीयैव । महात्मान इमे साधकोचितेन दिव्येनोत्तरायणयानेन याताः शाश्वतीं शान्तिं लभन्तामिति परमेशसमीपे आर्तभावेन काम्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नागपुरे संस्कृतविश्वपरिषदः सम्मेलनम्

अस्ति तावत् सोमनाथपत्तनगृहीतजन्मा 'संस्कृतविश्वपरिष'न्नाम काचन सुमहती विद्वत्सभा। तस्याश्च मूलभूतं कर्मस्थानमिदानीं संस्थापितमास्ते मुम्बय्यां प्रथितमहिम्नि महाविद्यायतने 'भारतीयविद्याभवने'। भारतीयसंस्कृतावास्थितबुद्धिर्भारतराष्ट्रपतिः स्वयमस्याः परिषद आध्यक्ष्यमलङ्करुते। संस्कृतवाङ्मये बद्धादरो राज्यपाल—श्रीमन्मुनसीमहोदयश्चास्याः सभापतिपदमध्यास्ते। संस्कृतविश्वपरिषदोऽस्याः प्रयत्नेन प्रवर्तमानमासस्य चतुर्विंशे दिवसे (24th April) मध्यप्रदेशीय-नागपुरनगरे संस्कृतविदुषामेकं महासम्मेलनं भविष्यतीति वार्ता सम्प्रति समुद्घोषिता।. तत्र हि संस्कृतविद्यायाः समुन्नतये संस्कृतविदुषां परिपोषाय च कृत्यजातानि सविचारं निर्धारयिष्यन्ते। यथायथं कृत्यजातनिर्धारणेन सम्मेलनमिदं गीर्वाणवाणीप्रणयिनामुपकाराय भवत्वित्याशास्महे।

पश्चिमवङ्गराज्येऽस्मिन् तारकेश्वर-वंशवाटी प्रभृतिषु केषुचित् स्थानेषु संस्कृतविश्वपरिषदः केन्द्रसभाः स्थापिता इति नो महदाश्वासस्थानम्। परिषदः पश्चिमवङ्गीयप्रधानशाखा त्वस्यामेव कलिकातानगर्य्यां स्थापयितव्येति श्रूयते। भारते निरूढप्रभावेयं संस्कृतसाहित्यपरिषदेव विश्वपरिषदः प्रधानशाखाया गुरुभारं वोढुमर्हतीत्येतादृशी कथापि नः श्रुतिपथमायाति। न जाने इतः परं किं भविष्यति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

9. **Introduction to the Rigveda of Sayanacharya**—Edited by Dr. Pashupatinath Shastri, M.A. B.L. Ph. D. Re. 1-8 ; Re. 1-4 (for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. As.14; As. 10 (for members).

11. **Prabhakara-vijayam** of Nandishvara—Edited by Mahamahopadhyaya Anantakrishna Shastri Vedantavisharad and Pt. Ramanath Shastri. Rs. 2-8 ; Rs. 2 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya—Edited by Pt. Bamacharan Kavyatirtha. As 12 ; As 10. (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Prof. Chintaharan Chakravarti, M. A. Re 1-8 ; Re. 1-4 (for members).

14. **Nala-damayantiyam** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2-8 ; Rs. 2 (for members).

15. **Prashastapada-bhashyam**—Edited by MM. Kalipada Tarkacharya. Rs. 4 ; Rs. 3. (for members).

16 **Yatratattvam** of Raghunandana Bhattacharya—Edited by Pt. Dwarikanath Nyayashastri. Rs. 2. ; Re. 1-8 (for members).

17. **Rik-pratishakhyam**—Ed. by Dr. Pashupatinath Shastri, M.A., B.L., Ph.D with the assistance of Prof. Chintaharan Chakravarti, M.A. Rs. 5 ; Rs. 4 (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Prof Akshayakumar Shastri. Re. 2 8 ; Rs. 2 (for members).

19. **Chhandogyamantrabhashyam** of Gunavishnu—Ed. by Prof. Durgamohan Bhattacharya, M. A. Rs. 7-8 ; Rs. 6 (for members). [out of stock]

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by MM. Kalipada Tarkacharya. Rs. 7. ; Rs. 6 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Prof. Chintaharan Chakravarti, M.A. Re. 1-4 ; Re. 1 (for members).

22. **Prasanta-ratnakaram** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2 ; Re. 1-8 (for members).

23. **Devisatakam** of Mahamahopadhyaya Krishnanath Sarvabhauma —Ed. by Pt. Janakinath Shastri. As. 12 ; As. 10 (for members).

24. **Sataranja Kutuhalam**:—Ed. by Prof Chintaharan Chakravarti Kavyatirtha M.A., As. 8

25. **Satyanubhavam**:—(a new MahaKavya) of MM. Kalipada Tarkacharya, Rs. 5 ; Rs. 4-8 (for members).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

একমাত্র ধর্ম্মই এই সংসার-সাগরে সমুদ্ধর্ত্তা
এবং তাঁরই মহনীয় বাণী প্রচার করিতেছে
গুপ্তপ্রেশ ডাইরেক্টরী পঞ্জিকা

विशेषतो द्रष्टव्यम्

अयि परिषत्प्रणयिनो ग्राहकमहोदयाः !

वर्षस्यास्य वार्षिकं देयं यैर्नाद्यापि परिशोधितं तैस्वश्यं सत्वरं तत् (annual subscription) संप्रेष्य परिषत्कार्यालयस्य सौकर्यं विधातव्यमिति सविनयं विज्ञाप्यते

परिषत्-सम्पादकैरिति

Printed by Bishnupada Bhattacharya M. A. Kabyatirtha. at Calcutta Oriental Press, Ltd., 9, Panchanan Ghose Lane, Calcutta and Published by the same from Sanskrit Sahitya Parishad, 168/1 Raja Dinenda Street, Shyambazar, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C 1073

Vol. XXXVII.
No. 3
३७श-वर्षस्य
३य-संख्या

July 1954
१८७६-शकीये
आषाढे
मासे

संस्कृत साहित्य परिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकौ

श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः

श्रीरामधनशास्त्री काव्य-व्याकरण-पुराणतीर्थश्च

संस्कृत-साहित्य-परिषत्
श्यामबाजार, कलिकाता

वार्षिकमूल्यम्—रूप्यकषट्कम् ६)
Foreign price—1-4s

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्किञ्चिदावेदनम्

प्रियपाठकमहाभागाः !

जानन्त्येव भवन्तो यत् परिषदियं कियतः कालात् प्रागात्मप्रतिष्ठार्थं कलिकाता-पौरसभादत्तं किञ्चित् स्थानमधिगत्य तत्रात्मनो वासगृहं रचयितुमारभ्यापि किञ्चिन्मात्रं निर्मायैव महासमरसम्भूतदौर्मूल्यादिभिः कारणैरर्थाभावेन च महता नारब्धं समापयितुं समर्थेति ।

तत् प्रियतमामिमां परिषदं यदि श्रीमन्तः प्रतिष्ठावतीं प्राणवतीञ्च द्रष्टुमिच्छन्ति, तदा सदयं प्रेषयन्तु यथाशक्ति साहाय्यं वक्ष्यमाणसङ्केतेन परिषत्-प्रणयिन्याः कल्पितप्रासादनिर्माणपरिसमाप्त्यर्थमिति ।

सङ्केतः—संस्कृत-साहित्य-परिषत्-सम्पादकः,

१६८।१, राजा-दीनेन्द्रष्ट्रीट्, कलिकाता-४

Sanskrit Sahitya Parishat Series

(Revised up to April, 1951)

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (out of Stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1-4 ; Re. I. (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshinacharan Bhattacharya. (out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kalipada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. 2 (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshinacharan Bhattacharya. Rs. 2-8 ; out of stock.

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satishchandra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinath Sahityashastri. As. 4.

(Cont. to Cover 3rd Page)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

Vol. XXXVII. No. 3. | १८७६-शकीये आषाढ़े ३७श-वर्षस्य ३य-संख्या | July 1954.

मतिमञ्जरी

चीनभारतमैत्रीसंस्था ।

[निबन्धकः—श्रीयादवेन्द्रनाथ-राय-न्यायतर्कतीर्थः]

अतिप्राचीनकालात् प्रभृति चीनसाम्राज्येन सह भारतवर्षस्य हार्दिकी मैत्री प्रतिष्ठितासीत् । चीनांशुकं प्राचीनभारते पवित्रतयागृह्यत । चीनाम्बरादिद्वारेण भारतवर्षेण सह निर्बाधं वाणिज्यादिकं प्राचलत् । ततश्च पराधीनेनापि भारतवर्षेण कदाचिदर्थसाहाय्येन कदाचिद्वा सैनिकसाहाय्येन सा मैत्री संवर्धिता दृढ़ीकृता च । इदानीं भारतसाम्राज्येन स्वाधीनतां समधिगत्य राजनैतिकी मैत्री प्रतिष्ठाप्यत इति न किञ्चिदनुपपन्नं, न वा किञ्चित् विचित्रं चित्रम् । तथाप्यनेन मैत्रीसंघटनेन केचित् प्रसन्नाः केचिद् विषण्णाः, केचिदवसन्नाः, केचिन्निषण्णाः, केचिदुत्सन्ना गुम्फन्ति स्वस्वचित्तप्रसूनमालिका अभिप्रायानुरूपाः । वर्तमानेषु राष्ट्रचक्रेषु दुर्नयपरम्परा यथा जगत्संक्षोभं जनयति तथा कदाचिद् भारतवर्षं चीन-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साम्राज्येनैकीभूय कञ्चिद् विपत्तिविशेषं वा संघटयेदिति तु चित्तविलास-विजृम्भणमात्रं न तु कथमपि सम्भाव्यमेतद् भारतराष्ट्रे। यस्य खलु भारतवर्षस्य साध्वी चिन्ताजगदुपकाराय, न परस्वापहरणाय ; फलप्रदान-क्षमा क्रिया—विश्वकल्याणसम्पादनाय, न विश्वजीवनग्रासाय, सूनृता वाक् सुधाभिषेकमोदजननाय,—न जीवमर्मतक्षणाय ; सर्वातिशायिनी शक्तिरात्म-रक्षणाय,—नानभिमतपीडनाय ; महोन्नतादर्शस्त्यागो, नैकान्ततो भोगः एषैवास्य वाणी "मा गृधः कस्यस्विद्धनं, तेन त्यक्तेन भुञ्जीथाः" "पृथिवी शस्यशालिनी", लोकाः समस्ताः सुखिनो भवन्तु", "सर्वे ते सुखिनः सन्तु, सर्वे सन्तु निरामया" इत्याद्या। अधुना जडविज्ञानचिन्ताधारा—एवं प्रवर्तते यत् कियति स्वल्पे काले कतीनामधिकसंख्यकानां प्राणिनां प्राणा आदातुं शक्यन्ते—न तु तेन साधारणेनोपायेन जगतः कल्याणं स्यादिति। अस्माकं स्वाधीनभारतराष्ट्रस्य धुरन्धरा अपि न कस्यापि राष्ट्रस्योद्वेगजननाय प्रवर्तन्ते—अपि तु कथं समग्राया वसुधाया मङ्गलं विदध्युस्तदर्थमेव भृशं यतन्ते ते। अतः प्रवर्तमाना चीनभारतमैत्रीसंस्था न केवलं प्राच्यभूखण्डस्य किन्तु समग्रस्य भूमण्डलस्य शान्तिं व्यवस्थाप्य संरक्ष्य च स्वकीयां मर्यादां विश्वहिताय प्रवर्तेतामिति सर्वशक्तिभागिन्या भगवत्या भवान्याश्चरणान्तिके प्रार्थ्यते, संप्रार्थ्यते च यथेदं भारतवर्षं पुरा गौरवपदमधिष्ठितवत् तथा-धुनाऽपि तथैव गौरवभाजनं गुरुपदमधिगच्छतादिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पत्रावली

[निबन्धकः—स्वर्गत-पण्डितरामगोपालविद्यारत्नः]

१। अपि कुशली भवान्? कुशलिनी च तत्रभवती मे वैवाहिकी? महात्मन्! लौकिकमानेन गणिताद् युगादर्वागपि नावयोरस्ति परस्परं कौशलिकसन्देशविनिमयः। किं करोमि? भ्रातः! प्रदीप्तसंसारानल-सन्तापसन्तप्तत्वान्न खलु श्रीमतां शारीरमपि क्षेममवगन्तुं प्रभवामि, किं पुनर्मानसिकं वैषयिकञ्च! सखे, कविकुलसेवनीयां संस्कृतभाषामादाय श्रीमतां पादमूलमुपसर्पामि। नो जाने किं विषमयं फलमस्मिन् फलिष्य-तीति। अथवा अतितरामविवेकस्य वामनस्य चन्द्रदिधीर्षेव मे संस्कृत-भाषासु लेखनीपरिचालनेयम्। न खलु कुसुमरसपानावेशविकलीकृत-चेतसां भ्रमराणामस्फुटमधुराक्षरस्य गुञ्जनस्येव मे भाषाया झङ्कारः। नो वा वसन्तसङ्गतकलकण्ठकोकिलकुलैरुच्चरितानां निस्तब्धनिशीथकुहु-ध्वनीनामिव तस्याश्चित्तचापल्यप्रवृत्तिहेतुत्वम्। नापि व्रीडावगुण्ठित-नवोढ़ानां विकाशोन्मुखयौवनानां पुरसुन्दरीणामपरिस्फुटप्रथमप्रेमभाषा-भिव्यक्तेरिव तस्याः श्रवणमनःप्राणेषु आनन्दस्रोतःप्रवाहनिदानत्वम्। तत् केन गुणेन तत्रभवतां प्रीतिं जनयिष्यामीति चिन्तयन परिमुह्यामि।

२। मित्रगोष्ठी नाम भवद्भिरेकचित्तीभूतैर्महान्तं भारतीयमभावमपा-चिकीर्षुभिर्विद्वद्वृन्दैः परिचालिता काननभूमिषु तावदयत्नप्रसूनैरुत्फुल्लैः परिमलबाहुल्यादाकुलीक्रियमाणालिकुलैः-धिक्कृतमहार्घरत्नराजिभिः प्रसूनै-र्ग्रथिता मालेव हृदयकन्दरेषु परिस्फुटानां विविधविचित्रभावानामभिव्यक्ता-वत्युपयोगिनीभिर्ललितमधुराक्षराभिः संस्कृतवचनपरम्पराभिर्विरचिता संवादलिपिर्मया लब्धा, समधीता, निरक्षरेण मादृशेनासमालोचनीयापि कथमपि मनसि समालोचिता च।

३। भ्रातरक्षय!

किन्तावदतिशोचनीयामात्मनो विवृतिं ते निवेदयामि? सर्व एव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरस्ताद् गङ्गास्नानमभिसन्धाय निकेतनान्निःसरन्ति, प्रसङ्गादुपलादिकमपि आहरन्ति, मम तु पुनरुपलाहरणमेव मुख्यमासीत्, भागीरथीपुण्यसलिलावगाहनन्तु प्रासङ्गिकं, तस्माद् गौणमेव। तच्च विविधदर्शनविज्ञानकाव्यानुशीलनसञ्जातज्ञानप्रवृद्धैर्भवद्भिः समं संलापादिना चित्तविनोदनं नाम। तत्तु गौणमपि मे मुख्यमेव। किन्तु किं करोमि? भ्रातरतितरां मन्दभाग्योऽस्मि। नो चेत् कथमविचिन्तितोऽयं मे दुरपनेयरोगः सहसा समायातः? किं कथयामि? न हि तावदुत्थातुमपि मे शक्तिरस्ति। संकल्पाश्च बहवो मे मनसि स्थिताः। किन्तु सचरणेनापि पङ्गुनेव मया हि पुनरेकोऽपि साधनीय इति मत्वा सर्वेभ्यो विनिवृत्तोऽस्मि। अथ अमुमेव आगतेरुदर्कं परिगृह्य प्रतियास्यामि? नोचेत् कार्यातिपातस्तदात्मप्रदर्शनस्य खलु पूर्णोऽयमवसर इत्यलं पल्लवितेन।

४। वत्स उपेन्द्र!

अद्यैव तावत् समासादिता ते मधुरवचनावलीभिर्विरचितैका शान्तिसंविधायिनी भक्तिलिपिका। अनधिगतदुर्वारशोकप्रवाहनिवहः शिशुमपि यत् त्वमितराभिर्जनसाधारणेनोच्यमानाभिर्विज्ञानगर्भवचनपरम्पराभिरनाश्वास्य मदर्थं भगवदनुकम्पां प्रार्थयितुकामोऽसि तदेव ते शिक्षानंपुण्यस्य फलं, ममापि नाम महती शक्तिश्च। किन्तु खलु सूर्योदयप्रभृतिप्रमाणेनापि दिग्भ्रान्तस्य पुरुषस्य दिग्भ्रमो नापसार्यते तथा तीक्ष्णनाराचादपि तीव्रतमेन पुत्रशोकविकारेणाभिभूतस्य पुरुषस्य उपदेशशतेनापि दुरपनेयः स विकारो नापनीयते। उपदेशा अपि ते फलेभ्यो न परिकल्पन्ते च। अथवा, कोटिजगदुपकरणनिष्पादितक्रीडाकलापचातुर्यस्य मायाप्रहरणस्य प्रहर्तुकामस्य .....रवस्य प्रहारपंक्तिभिरभिभूय जानन्नपि अविद्यासमीरणेन दीधूयमानशिखं हुताशनमिव लेलिहानमेनं शोकं मृत्युना बलाद् गृहीतः स्वयमेव प्राणान् विसिसृक्षुः पतङ्ग इवाहं प्रवेष्टुकामोऽस्मि।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीचैतन्यचरितामृतसंस्कृतानुवादः

(पूर्वतोऽनुवृत्तः)

अनुवादकः—श्रीभास्करानन्दस्वामी।

श्रीश्रीचैतन्यचरितामृत आदिलीलायां

पञ्चमः परिच्छेदः

इत्युक्तानन्दसम्मूढो गायन्नुच्चैर्ननर्त्त सः।
विप्रोऽपि नाकरोद्रोषं स हि कृष्णमसेवत॥
मदनुग्राहके रामदासे च गमनोद्यते।
उत्सवान्ते मम भ्रात्रा तस्य तर्कः समुत्थितः॥
भ्रातुर्मे कृष्णचैतन्ये विश्वासः सुदृढः स्थितः।
विश्वासाभास एवासीन्नित्यानन्दप्रभुं प्रति॥
श्रुत्वैतद्रामदासस्य हृदि दुःखमजायत।
उक्तवानहमेवं तं भ्रातरं बहु भर्त्सयन्॥
तावुभौ भ्रातरौ तुल्यप्रकाशावेकविग्रहौ।
नित्यानन्दममन्वानो लप्स्यसे त्वममङ्गलम्॥
एकस्मिंस्तव विश्वासो नापरं बहुमन्यसे।
एषोऽर्द्धकुक्कुटीन्यायः प्रमाणाभास एव ते॥
पाषण्डोऽस्यथवा त्वं यदुभयं नापि मन्यसे।
द्वयोरेकत्र सम्मानोऽपरस्मिन्नेति भण्डता॥
रामदासस्ततः क्रुद्धो वंशीं भङ्क्त्वा गतो यदा।
तस्मिन्नवसरे भ्रातुरभून्महदमङ्गलम्॥
इत्येवं सेवकस्यापि प्रभावस्तस्य कीर्तितः।
अन्यः स्वभावकारुण्यवृत्तान्तः कथ्यते मया॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कटुवाग्भिः कनीयांसमहं भर्त्सितवानिति ।
तस्यां रात्रौ प्रभुः स्वप्ने मम सन्दर्शनं ददौ ॥
नवहट्टान्तिके ग्रामे भ्रामटपुरनामके ।
ददौ मे स्वपतो नित्यानन्दरामः स्वदर्शनम् ॥
तदा तत्पादयोस्तूर्णं दण्डवत् पतिते मयि ।
प्रभुरात्मपदाम्भोजं न्यस्तवान्मम मूर्द्धनि ॥
उत्तिष्ठोत्तिष्ठ वत्सेति तेनोक्तोऽहं पुनः पुनः ।
उत्थाय तस्य तद्रूपं पश्यन्नेव विसिस्मिये ॥
श्यामस्निग्धरुचिर्महत्तमतनुर्वीराग्रगण्यो बली
साक्षान्मन्मथमन्मथः सुघटितश्रीपाणिपादाम्बुजः ।
क्षौमावेष्टितशीर्षकः कमलदृक् क्षौमाम्बरेणावृतः
कर्णाभ्यर्णसुवर्णकुण्डलयुगः स्वर्णाङ्गदावापकः ॥

शिञ्जन्मञ्जीरपादो गलललितलुठत्पुष्पमालाविलम्बो
भद्रश्रीरञ्जितश्रीः सुकलिततिलकः कोटिचन्द्राननश्रीः ।
दानोन्मत्तेभराजस्तुतमृदुगमनः प्रेमसन्दोलिताङ्गो
दाडिम्बीबीजदन्तो निगदति सततं कृष्ण कृष्णेति मन्द्रम् ॥
रक्तां दोलयते यष्टिं हस्तेन सिंहविक्रमः ।
वेष्टयन्तः पदाम्भोजं भृङ्गा राजन्ति सर्वतः ॥
सर्वे पारिषदास्तत्र गोपवेशा विलोकिताः ।
ब्रुवन्तः कृष्णकृष्णेति प्रेमावेशेन विह्वलाः ॥
कश्चिद् वादयते शृङ्गं वंशीञ्चान्योऽपरे तथा ।
गीतिं गायन्ति नृत्यन्ति वीजयन्ति च चामरम् ॥
उपानयन्ति ताम्बूलं प्रभवे तत्र सेवकाः ।
नित्यानन्दस्य दृष्ट्वैव वैभवं तदलौकिकम् ॥
तथा रूपं गुणं लीलामानन्दविह्वलोऽभवम् ।
किमप्यनवगच्छन्तं मामुवाच हसन् प्रभुः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयि भोः कृष्णदास त्वं भयं मा कुरु मा कुरु ।
गच्छ वृन्दावनं शीघ्रं तत्र सर्वं हि लप्स्यसे ॥
इत्युक्त्वा हस्तसङ्केतं कृत्वा मां प्रेरयन् प्रभुः ।
अन्तर्दधे सपद्येव सर्वैर्निजगणैः सह ॥
लुप्तसंज्ञस्तदैवाहं भूतले पतितोऽभवम् ।
स्वप्नभङ्गात् परं दृष्टा प्रभाता रजनी मया ॥
किं दृष्टं किं श्रुतं वेति बहु चिन्तयता मया ।
वृन्दावनप्रयाणाय प्रभोराज्ञेति निश्चितम् ॥
उत्थाय तत्क्षणादेव यात्रार्थमुद्यतोऽभवम् ।
वृन्दावनं समायातः प्रभोः करुणया सुखम् ॥
जयति जयति नित्यानन्दरामः प्रभुर्मा-
मनयदतुलकारुण्येन वृन्दावनं यः ।
जयति जयति नित्यानन्ददेवो दयालु
रलभ इह हि रूपं साग्रजं यत्कृपातः ॥
सनातनस्य कारुण्याद् भक्तिसिद्धान्तमाप्तवम् ।
श्रीरूपकृपया भक्तिरसप्रान्तं तथालभे ॥
जयति श्रीपदाम्भोजं नित्यानन्दमहाप्रभोः ।
राधागोविन्दपादाब्जं शरणं लब्धवान् यतः ॥
अहमस्मि जगामाधाधिकपापतमः खलु ।
विष्ठास्थेभ्योऽपि कीटेभ्यो लघिष्ठोऽस्मि च सर्वथा ॥
मन्नाम शृण्वतः पुण्यं क्षीयते पापमेधते ।
इत्थं गर्हितकर्माणं यो हि मां दयते जनम् ॥
नित्यानन्दं विनैकं को वर्त्तते जगतीतले ।
नित्यानन्दः कृपामूर्त्तिरुन्मत्तः प्रेमसम्पदा ॥
विचारयति नो किञ्चिदुत्तमाधममध्यमान् ।
उद्धारयति तान् सर्वान् ये पतन्ति तदग्रतः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मादृशं स दुराचारमत एवोदधारयत ।
मामानयच्च पापिष्ठं पुण्यं वृन्दावनं प्रभुः ॥
अदाद्रूपपदालम्बं मादृशायाधमाय सः ।
श्रीमन्मदनगोपाल-श्रीमद्गोविन्ददर्शनम् ॥
तेनाहं कारितो यत्तदिह वक्तुं न साम्प्रतम् ॥
श्रीमान् मदनगोपालो वृन्दावनपुरन्दरः ।
श्रीव्रजेन्द्रकुमारोऽयं साक्षाद्रासविलासकः ।
श्रीराधाललितायुक्तः साक्षान्मन्मथमन्मथः ।
यः श्रीरासविलासेन शश्वदेव प्रकाशते ॥

"तथाहि श्रीमद्भागवते १०।३२।२—

"तासामाविरभूच्छौरिः स्मयमानमुखाम्बुजः ।
पीताम्बरधरः स्रग्वी साक्षान्मन्मथमन्मथः ॥२०॥"
हृदयानि जनानां स स्वमाधुर्येण कर्षति ।
सेवेते एकतो राधापरतो ललिता प्रियम् ॥
नित्यानन्दानुकम्पैव तं देवं मामदर्शयत ।
सा मे प्रभुमकार्षीच्च राधामदनमोहनम् ॥
अधमश्चापि मां सैव श्रीगोविन्दमदर्शयत् ।
तद्वार्ता नैव वाच्या मे व्यक्तं वक्तुं न शक्यते ॥
कल्पवृक्षवने वृन्दावने श्रीयोगपीठके ।
रत्नमण्डपमध्यास्ते रत्नसिंहासनं महत ॥
तत्रासीनोऽस्ति गोविन्दः श्रीव्रजेन्द्रस्य नन्दनः ।
प्रकाशयति माधुर्यं मोहयन भुवनत्रयम् ॥
वामे श्रीराधिका देवी सखीभिः सह राजते ।
प्रभू रासादिका लीलाः करोत्यानन्दविह्वलः ॥
ब्रह्मलोके स्वयं ब्रह्मा यं ध्यायति निरन्तरम् ।
अष्टादशार्णमन्त्रेण यमुपास्ते च सर्वदा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ध्यायन्त्यधिष्ठिताः सर्वे भुवनानि चतुर्दश ।
यस्य लीलाश्च गायन्ति वैकुण्ठादिपुरस्थिताः ॥
परया यस्य माधुर्या लक्ष्मीश्चाकृष्यते स्वतः ।
तद्रूपं रूपगोस्वामी यथावत् समवर्णयत् ॥

तथाहि भक्तिरसामृतसिन्धौ साधनभक्तिलहर्यां

८७तमः श्लोक :—

"स्मेरां भङ्गीत्रयपरिचितां साचि विस्तीर्णदृष्टिं
वंशीन्यस्ताधरकिशलयामुज्ज्वलां चन्द्रकेण ।
गोविन्दाख्यां हरितनुमितः केशितीर्थोपकण्ठे
मा प्रेक्षिष्ठास्तव यदि सखे बन्धुसङ्गेऽस्ति रङ्गः ॥२१॥"

निःसन्देहमयं साक्षाच्छ्रीव्रजेन्द्रसुतः पुमान् ।
अज्ञानी प्रतिमाबोधमस्मिन् प्रकुरुते यदि ॥
तस्य तेनापराधेन कदाचिन्नास्ति निष्कृतिः ।
पतनं नरके घोरे भवितेवेति किं ब्रुवे ॥
यस्मादेवं गुणोपेतं गोविन्दं प्राप्तवानहम् ।
पादपद्मकृपां तस्य को वा वर्णयितुं क्षमः ॥
श्रीवृन्दावनवास्तव्यं तावद् वैष्णवमण्डलम् ।
परमश्रेयआधारं कृष्णनामपरायणम् ॥
श्रीनित्यानन्दचैतन्यौ यस्य प्राणा धनानि च ।
यद्राधाकृष्णयोर्भक्तिं विना जानाति नापरम् ॥
तस्य श्रीचरणच्छायां पदरेणूंश्च पावनान् ।
कृपया दत्तवान् श्रीमन्नित्यानन्दोऽधमाय मे ॥
अत्रैव लप्स्यसे सर्वमित्युक्तं प्रभुणा मम ।
सूत्रं तदेव तस्यैव मयेयं विवृतिः कृता ॥
तत् सर्वं लब्धवानस्मि वृन्दारण्यं समागतः ।
अभिप्रायः प्रभोः पूर्णस्तत्सर्वलाभसम्पदा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लिखाम्यात्मकथामेतां न जिह्रेमि तथाप्यहो ।
नित्यानन्दगुणोन्मत्तो न शक्नोमि निवर्त्तितुम् ॥
अपारमहिमानो हि नित्यानन्दप्रभोर्गुणाः ।
सहस्रवदनोऽनन्तस्तेषामन्तं न गच्छति ॥
यस्याशास्ति पदाम्भोजे श्रीरूपरघुनाथयोः ।
स कृष्णदास आह श्रीचैतन्यचरितामृतम् ॥

इति श्रीचैतन्यचरितामृत आदिखण्डे चैतन्यावतारसामान्य-
कारणं नाम पञ्चमः परिच्छेदः ।

श्रीचैतन्यचरितामृतस्यादिलीलायां

षष्ठः परिच्छेदः

"वन्दे तं श्रीमदद्वैताचार्यमद्भुतचेष्टितम् ।
यस्य प्रसादादज्ञोऽपि तत्स्वरूपं निरूपयेत् ॥१॥"
जयतात् कृष्णचैतन्यो जयतात् करुणामयः ।
नित्यानन्दस्तथाद्वैताचार्यश्च जयतान्तराम् ॥
नित्यानन्दस्वरूपं तत् पञ्चश्लोक्या मयोदितम् ।
अद्वैताचार्यमाहात्म्यं श्लोकयुग्मेन वर्ण्यते ॥
"तथाहि श्रीरूपगोस्वामिकृतकड़चायां श्लोकद्वयम्—
महाविष्णुर्जगत्कर्त्ता मायया यः सृजत्यदः ।
तस्यावतार एवायमद्वैताचार्य ईश्वरः ॥२॥
अद्वैतं हरिणाद्वैतादाचार्यं भक्तिशासनात् ।
भक्तावतारमीशं तमद्वैताचार्यमाश्रये ॥३॥"
अद्वैताचार्यगोस्वामी भवति स्वयमीश्वरः ।
अपारो महिमा यस्य जीवबुद्धेरगोचरः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जगदादीनि कार्याणि महाविष्णुः सृजत्यसौ ।
तस्यैवाद्वैत आचार्योऽवतारः स्वयमुच्यते ॥
सृष्टिस्थितिविधानं यो विधत्ते निजमायया ।
यो ब्रह्माण्डान्यनन्तानि संसृजत्यवलीलया ॥
प्रकाशयत्यनन्ता यो मूर्त्तीरिच्छासमुद्भवात् ।
ब्रह्माण्डानां विशत्यन्तरेकैकाभिश्च मूर्त्तिभिः ॥
तस्यैव पुरुषस्यांशोऽद्वैतोऽद्वैतं तयोर्द्वयोः ।
तस्य कायविशेषोऽयं न विच्छिन्नो मनागपि ॥
प्रधानं समुपादाय कुर्वंस्तस्य सहायताम् ।
इच्छामात्रेण निर्माति स ब्रह्माण्डानि कोटिशः ॥
जगतां शिवमद्वैतं सोऽयं शिवगुणाश्रयः ।
चरित्रं मङ्गलं शश्वद् यस्य नाम च मङ्गलम् ॥
कोटिशोऽंशांश्च शक्तीश्च सोऽवतारांश्च कोटिशः ।
समादाय विनिर्माति ब्रह्माण्डानां गणं पुमान् ॥
उपादानं निमित्तञ्च मायांशौ द्विविधौ मतौ ।
प्रधानं तदुपादानं जीवमायानिमित्तकम् ॥
मूर्त्तिद्वयं समाश्रित्य यथैव पुरुषेश्वरौ ।
तौ निमित्तमुपादानं गृह्णन्तौ सृजतोऽखिलम् ॥
निमित्तकारणं साक्षात् पुरुषो विश्वसर्ज्जने ।
नारायण उपादानं स्वयमद्वैतरूपतः ॥
अंशेनासौ निमित्तेन मायामीश्वर ईक्षते ।
उपादानेन चांशेनाद्वैतो विश्वं सृजत्यसौ ॥
सांख्या यद्यपि मन्यन्ते प्रधानं विश्वकारणम् ।
मैवं तत् सृष्टिकर्त्तृत्वं तज्जड़स्य न सम्भवेत् ॥
अधिप्रधानमीशोऽसौ शक्तिं सञ्चारयत्यतः ।
तयैवेश्वरशक्त्या हि विश्वं भवति निर्मितम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभुरद्वैतरूपेण शक्तिं सञ्चारयत्यसौ ।
अत एव हि सोऽद्वैतो मुख्यं भवति कारणम् ॥
कर्त्ता ब्रह्माण्डकोटीनामद्वैताचार्य एव हि ।
पुनरेकैकशो मूर्त्यां ब्रह्माण्डानि विभर्त्त्यसौ ॥
अद्वैतो मुख्यमङ्गं स्यात्तस्य नारायणस्य हि ।
अंशोऽर्धोह्यङ्गशब्दस्येत्युक्तं भागवते तथा ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे चतुर्दशाध्याये चतुर्दशश्लोके श्रीभगवन्तं प्रति ब्रह्मवाक्यम्—

नारायणस्त्वं न हि सर्वदेहिना-
मात्मास्यधीशाखिललोकसाक्षी ।
नारायणोऽङ्गं नर-भू-जलायना-
त्तच्चापि सत्यं न तवैव माया ॥
ईश्वरस्याङ्गमंशो वा चिदानन्दमयः सदा ।
मायया नास्य सम्बन्ध इति श्लोकेन गीयते ॥
कथमङ्गमिति प्रोक्तं नोक्तांश इति चेच्छृणु ।
अंशादप्यङ्गमित्यस्याधिका स्यादन्तरङ्गता ॥
महाविष्णोः स एवांशोऽद्वैताचार्य्यो गुणाकरः ।
स ईश्वरादभेदेनाद्वैत इत्यभिधान्वितः ॥
असृजत् सर्वविश्वानि सृष्ट्यादौ स यथा पुरा ।
तथा प्रावर्त्तयद् भक्तिमधुनावतरन्नितः ॥
कृष्णभक्तिप्रदानेन स जीवानुदधारयत् ।
गीता-भागवतग्रन्थव्याख्यया भक्तिमातनोत् ॥
विना भक्त्युपदेशेन न तत्कार्यमवर्त्तत ।
आचार्य इति नाम्नातो जनैः सर्वैः स भूषितः ॥
वैष्णवानां गुरुर्विश्ववासिनां पूज्य इत्यसौ ।
मिलनेन द्वयोर्नाम्नोरद्वैताचार्य औच्यत ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स आसीदन्तरङ्गांशः कमलाक्षस्य शार्ङ्गिणः ।
कमलाक्ष इति श्रेष्ठं नामाप्यन्वर्थतां गतम् ॥
विन्दन्तीश्वरसारूप्यमीश्वरस्य हि पार्षदाः ।
नारायण इवैतेऽपि पीतवस्त्राश्चतुर्भुजाः ॥
प्रभुरद्वैत आचार्य ईश्वरस्यांशसत्तमः ।
तत्त्वं नाम गुणास्तस्य सर्वे विस्मयकारकाः ॥
तुलसीजलदानेन गम्भीरैर्हुङ्कृतैश्च यः ।
स्वगणैः सह चैतन्यं पृथिवीं समुपानयत् ॥
तेन द्वारेण चैतन्यो भगवान्नामकीर्त्तनम् ।
प्रचार्य जीवनिस्तारं कृतवान् धरणीतले ॥
अपारं गुणमाहात्म्यमाचार्यस्य महात्मनः ।
प्राप्तुं कीटोपमा जीवास्ततपारं पारयन्ति किम् ॥
अद्वैताचार्यगोस्वामी चैतन्यस्याङ्गमुत्तमम् ।
तस्यान्यदेकमङ्गञ्च नित्यानन्दो महाप्रभुः ॥
उपाङ्गानि प्रभोर्भक्तास्ते श्रीवासादयोऽभवन् ।
हस्तास्यनेत्रवक्षाङ्गमुपाङ्गं धनुरादिवत् ॥
एतान् सर्वान् समादाय सदा विहृतवान् प्रभुः ।
तत्र तत्र विहारेण स प्राचारयदीप्सितम् ॥
माधवेन्द्रपुरीस्वामिशिष्योऽद्वैत इति प्रभुः ।
गोस्वामिनं तमाचार्यममन्यत निजं गुरुम् ॥
रक्षितुं धर्ममर्यादां प्रभुर्लौकिकलीलया ।
चकार स्तुतिभक्तिभ्यामाचार्यस्य पदार्चनम् ॥
तथाप्यद्वैत आचार्यश्चैतन्यं ज्ञातवान् प्रभुम् ।
आत्मानञ्च सदा तस्य दास इत्यभ्यमन्यत ॥
दास्याभिमानसौख्येन स्वात्मानमपि विस्मरन् ।
कृष्णदासो भवेत्युक्त्वा सोऽयं जीवानुपादिशत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृष्णदासोऽहमित्याभिमानिकानन्दवारिधेः ।
नैकेन विन्दुना मान्ति कोटिब्रह्मसुखान्यपि ॥
नित्यानन्दस्तथाहञ्च श्रीचैतन्यस्य किङ्करौ ।
दासभावसमः क्वापि नानन्दोऽन्यत्र वर्त्तते ॥
परमप्रेयसी लक्ष्मीर्हृदि तस्य वसन्त्यपि ।
कातर्येण सनिर्बन्धं दास्यानन्दं प्रयाचते ॥
तस्य पारिषदाः सर्वे दास्येनानन्दितान्तराः ।
ब्रह्मा सनातनः शम्भुः शुकदेवश्च नारदः ॥
नित्यानन्दावधूतोऽसौ सर्वेषामग्रणीरपि ।
दास्यप्रेम्णा सदोन्मत्तश्चैतन्यस्य महाप्रभोः ॥
श्रीवासो हरिदासश्च रामदासो गदाधरः ।
वक्रेश्वरो मुरारिश्च मुकुन्दश्चन्द्रशेखरः ॥
उत्कृष्टमहिमानस्ते सर्वे पाण्डित्यमण्डिताः ।
श्रीचैतन्यस्य दास्येन कारिता उन्मदा इति ॥
मत्वागायदनृत्यच्च साट्टहासं मुहुर्मुहुः ।
भव चैतन्यदासस्त्वमिति लोकानुपादिशत् ॥
सोऽचिन्तयच्च चैतन्यो मामेव मन्यते गुरुम् ।
मम दास्याभिमानस्तु तथापि सुमहानिति ॥
कृष्णप्रेम्नः प्रभावोऽयमपूर्वः परिलक्ष्यते ।
योजयेद्दास्यभावेन समान्न्यूनान् गुरूनपि ॥
अस्य प्रमाणरूपेण शास्त्रं व्याख्यायते शृणु ।
महतोऽनुभवो यत्र प्रमाणं सुदृढं ततः ॥
अपरस्य कथा कैव व्रजे नन्दो व्रजेश्वरः ।
येन तुल्यो न कृष्णस्य गुरुः कोऽपि महीतले ॥
शुद्धवात्सल्यभावोऽस्यानैश्वर्यज्ञानमिश्रितः ।
कृष्णप्रेमा तथापीमं तद्दास्यमन्वकारयत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्य श्रीमुखवाण्येव प्रमाणत्वेन दर्श्यते ॥

उद्धव श्रूयतां कृष्णः सत्यमेव सुतो मम ।

स एवेश्वर इत्येवं यदि त्वं मन्यसे दृढम् ॥

तथापि तत्र मे सन्तु तथैव चित्तवृत्तयः ।

भक्तिस्तवेश्वरे कृष्णे सुदृढास्तु मतिश्च मे ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे सप्तचत्वारिंशाध्याये अष्टपञ्चाशत्तमश्लोके श्रीकृष्णमुद्दिश्य नन्दवाक्यम्—

मनसो वृत्तयो न स्युः कृष्णपादाम्बुजाश्रयाः ।

वाचोऽभिधायिनीर्नाम्नां कायस्तत प्रह्वणादिषु ॥५॥

एवं तत्रैवैकोनषष्टितमः श्लोकः—

कर्मभिर्भ्राम्यमाणानां यत्र क्वापीश्वरेच्छया ।

मङ्गलाचरितैर्दानै रतिर्नः कृष्ण ईश्वरे ॥६॥"

श्रीदामाद्याः सखायो ये कृष्णस्यासंस्तदा व्रजे ।

ऐश्वर्य्यज्ञानहीनास्ते शुद्धसख्यमयान्तराः ॥

कृष्णस्य स्कन्धमारुक्षंस्तथान्योन्यमयुतसत ।

तेऽपि तद्दास्यभावेन पादौ तस्य सिषेविरे ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे पञ्चदशाध्याये पञ्चदशश्लोके परीक्षितं प्रति शुकवचनम्—

पादसंवाहनं चक्रुः केचित्तस्य महात्मनः ।

अपरे हतपाप्मानो व्यजनैः समवीजयन ॥७॥"

प्रेयस्यो याश्च कृष्णस्य यावत्यो गोपिका व्रजे ।

उद्धवोऽपि तदा यासां पादरेणूनयाचत ॥

याभ्यश्चाभ्यधिकप्रेष्ठा नासीत कृष्णस्य काचन ।

आत्मानमभ्यमन्यन्त तस्य दासीति ता अपि ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे एकत्रिंशाध्याये षष्ठश्लोके श्रीकृष्णमुद्दिश्य गोपीवाक्यम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्रजजनार्त्तिहन् वीरयोषितां निजजनस्मयध्वंसनस्मित ।
भज सखे भवत्किङ्करीः स्म नो जलरुहाननं चारु दर्शय ॥८॥

तत्रैव सप्तचत्वारिंशाध्याये ऊनविंशश्लोके भ्रमरं प्रति श्रीराधिका-वाक्यम्—

अपि वत मधुपुर्यामार्यपुत्रोऽधुनास्ते
स्मरति स पितृगेहान् सौम्य बन्धूंश्च गोपान् ।
क्वचिदपि स कथा नः किङ्करीणां गृणीते
भुजमगुरुसुगन्धं मूर्ध्न्यधास्यत् कदा नु ॥९॥"

आस्तां तावत् कथान्यासां श्रीमती सापि राधिका ।
सर्वैरंशैश्च सर्वाभ्यो याभवत् परमाधिका ॥
यस्याः प्रेमगुणैः कृष्णो वशीभूतः प्रतिक्षणम् ।
दासीभावेन साप्यस्य चरणाब्जमसेवत ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे त्रिंशाध्याये त्रयस्त्रिंशत्तमश्लोके श्रीकृष्णमुद्दिश्य श्रीराधिकावाक्यम्—

हा नाथ रमण प्रेष्ठ क्वासि क्वासि महाभुज ।
दास्यास्ते कृपणाया मे सखे दर्शय सन्निधिम् ॥१०॥"

रुक्मिण्याद्या महिष्यो या बभूवुर्द्वारकापुरि ।
आत्मनः कृष्णदासीत्वं बह्वमन्यन्त ता अपि ॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे त्र्यशीतितमाध्याय एकादशश्लोके द्रौपदीं प्रति कालिन्दीवाक्यम्—

तपश्चरन्तीं माज्ञाय स पादस्पर्शनाशया ।
सख्योपेत्याग्रहीत पाणिं साहं तद्गृहमार्जनी ॥११॥"

तथाहि तत्रैव चतुस्त्रिंशश्लोके द्रौपदीं प्रति लक्ष्मणावाक्यम्—

आत्मारामस्य तस्येमा वयं वै गृहदासिकाः ।
सर्वसङ्गनिवृत्त्याद्धा तपसा च बभूविम ॥१२॥"

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

9. **Introduction to the Rigveda of Sayanacharya**—Edited by Dr. Pashupatinath Shastri, M.A. B.L. Ph. D. Re. 1-8 ; Re. 1-4- (for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. As.14;As. 10 (for members).

11. **Prabhakara-vijayam** of Nandishvara—Edited by Mahamahoadhyaya Anantakrishna Shastri Vedantavisharad and Pt. Ramanath Shastri. Rs. 2-8 ; Rs. 2 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya—Edited by Pt. Bamacharan Kavyatirtha. As 12 ; As 10. (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Prof. Chintaharan Chakravarti, M. A Re 1-8 ; Re. 1-4 (for members).

14. **Nala-damayantiyam** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2-8 ; Rs. 2 (for members).

15. **Prashastapada-bhashyam**—Edited by MM. Kalipada Tarkacharya. Rs. 4 ; Rs. 3. (for members).

16 **Yatratattvam** of Raghunandana Bhattacharya—Edited by Pt. Dwarikanath Nyayashastri. Rs. 2. ; Re. 1-8 (for members).

17. **Rik-pratishakhyam**—Ed. by Dr. Pashupatinath Shastri, M.A., B.L., Ph.D with the assistance of Prof. Chintaharan Chakravarti, M.A. Rs. 5 ; Rs. 4 (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Prof Akshayakumar Shastri. Re. 2 8 ; Rs. 2 (for members).

19. **Chhandogyamantrabhashyam** of Gunavishnu—Ed. by Prof. Durgamohan Bhattacharya, M. A. Rs. 7-8 ; Rs. 6 (for members). out of stock]

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by MM. Kalipada-Tarkacharya. Rs. 7. ; Rs. 6 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Prof. Chintaharan Chakravarti, M.A. Re. 1-4 ; Re. 1 (for members).

22. **Prasanta-ratnakaram** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2 ; Re. 1-8 (for members).

23. **Devisatakam** of Mahamahopadhyaya Krishnanath Sarvabhauma —Ed. by Pt. Janakinath Shastri. As. 12 ; As. 10 (for members).

24. **Sataranja Kutuhalam**:—Ed. by Prof Chintaharan Chakravarti Kavyatirtha M.A., As. 8

25. **Satyanubhavam**:—(a new MahaKavya) of MM. Kalipada Tarkacharya, Rs. 5 ; Rs. 4-8 (for members).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

একমাত্র ধর্ম্মই এই সংসার-সাগরে সমুদ্ধর্ত্তা
এবং তাঁরই মহনীয় বাণী প্রচার করিতেছে
গুপ্তপ্রেশ ডাইরেক্টরী পাঞ্জিকা

विशेषतो द्रष्टव्यम्

अयि परिषत्प्रणयिनो ग्राहकमहोदयाः !

वर्षस्यास्य वार्षिकं देयं यैर्नाद्यापि परिशोधितं तैरवश्यं सत्वरं तत् (annual subscription) संप्रेष्य परिषत्कार्यालयस्य कृत्यसौकर्यं विधातव्य-मिति सविनयं विज्ञाप्यते

परिषत्-सम्पादकैरिति

Printed by Bishnupada Bhattacharya M. A. Kabyatirtha. at Calcutta Oriental Press, Ltd., 9, Panchanan Ghose Lane, Calcutta and Published by the same from Sanskrit Sahitya Parishad, 168/1 Raja Dinenda Street, Shyambazar, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C 1073

Vol. XXXVII. August 1954

No. 4 १८७६-शकीये

३७श-वर्षस्य श्रावणे

४र्थे संख्या मासे

भारतं मातु भारती

संस्कृत-साहित्य-परिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकौ

श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः

श्रीरामधनशास्त्री काव्य-व्याकरण-पुराणतीर्थश्च

संस्कृत-साहित्य-परिषत्
श्यामबाजार, कलिकाता

वार्षिकमूल्यम्—रूप्यकषट्कम् ६।
Foreign price—1-4s

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्किञ्चिदावेदनम्

प्रियपाठकमहाभागाः !

जानन्त्येव भवन्तो यत् परिषदियं कियतः कालात् प्रागात्मप्रतिष्ठायै कलिकाता-पौरसभादत्तं किञ्चित् स्थानमधिगत्य तत्रात्मनो वासगृहं रचयितुमारभ्यापि किञ्चिन्मात्रं निर्मायैव महासमरसम्भूतदौर्मूल्यादिभिः कारणैरर्थाभावेन च महता नारब्धं समापयितुं समर्थेति ।

तत् प्रियतमामिमां परिषदं यदि श्रीमन्तः प्रतिष्ठावतीं प्राणवतीञ्च द्रष्टुमिच्छन्ति, तदा सदयं प्रेषयन्तु यथाशक्ति साहाय्यं वक्ष्यमाणसङ्केतेन परिषत्-प्रणयिन्याः कल्पितप्रासादनिर्माणपरिसमाप्त्यर्थमिति ।

सङ्केतः—संस्कृत-साहित्य-परिषत्-सम्पादकः,

१६८।१, राजा-दीनेन्द्रष्ट्रीट्, कलिकाता-४

Sanskrit Sahitya Parishat Series

(Revised up to April, 1951)

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (out of Stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1-4 ; Re. I. (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshinacharan Bhattacharya. (out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kalipada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. 2 (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshinacharan Bhattacharya. Rs. 2-8 ; out of stock.

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satishchandra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinath Sahityashastri. As. 4.

(Cont. to Cover 3rd Page)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

Vol. XXXVII. No. 4. | १८७६-शकीये श्रावणे ३७श-वर्षस्य ४र्थ-संख्या | August 1954.

मतिमञ्जरी ।

खाद्यविनियन्त्रणम् ।

[निबन्धकः—श्रीयादवेन्द्रनाथ-राय-न्यायतर्कतीर्थः]

युगादिकृतो निर्देशेनैव प्रायो द्वादशहायणरूपयुगावसानेऽभिनवसृष्टिरिव जातं विनियन्त्रणं खाद्यस्य । एतेन शुभसृष्टिप्रक्रमेण जातिवर्णधर्मनिर्विशेषं सर्व एवातिमात्रं सन्तुष्टा इत्यत्र नास्ते सन्देहलेशावसरोऽपि ? नवलब्धायाः स्वाधीनताया इदमेवासीत् सुमहत कलङ्कस्थानम् । तच्चाधुनापनीतम् । इदानीमपेतकलङ्को भारतचित्तचन्द्रमाः स्वगणस्य स्वदेशस्य समग्रस्य च जगतः कल्याणायाह्लादनाय च जनचित्तस्य प्रद्योतनामिति ह्यस्माकं प्रार्थना । राष्ट्रे गणतन्त्रे वा राजतन्त्रे वा जनानुरागस्य गणकल्याणस्य चावश्यकर्तव्यता वर्तत एव । विधिविलसितेन वा चित्तदौर्बल्येन वास्मासु ये कलङ्कपङ्काः सञ्जातास्तान् दृढ़तया दूरीकृत्य विमलं सलिलं सुपेयं हितकरञ्च विधेयं राष्ट्रचित्तसरःसु । तदर्थमेव नेतृणामुद्यमः । धन्यवादार्हास्ते राष्ट्रनेतारो विशेषतः खाद्यविभागभारप्राप्ताः, येषामुद्यमेन दुरपनेयमयशः-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शल्यमुद्धृतं ते भूयोभूयोऽस्माभिरभिनन्द्यन्ते। परमेतत्खाद्यविभागे नियुक्ता ये कर्मकारिण आसन् तेषामपि कर्मव्यवस्था तैरवश्यं विधेया, अन्यथानन्यगतिकास्ते कं पन्थानमनुसरेयुः। यद्यपि स्वाधीने राष्ट्रे स्वाधीना कर्मव्यवस्थावलम्बनीया तथापि तादृशी स्वाधीना शिक्षापद्धतिर्न प्रवर्तिता, यत्प्रभावेण सर्वे स्वाधीनां जीविकामनुसर्तुं प्रभवेयुः। अधुनापि सैव शिक्षारीतिरनुवर्तते या केवलं राजसेवकान् सेवकान् वा निर्माति। अद्यत्वेऽपि शिक्षिता लब्धविश्वविद्यालयोपाधिका न कथञ्चिदपि भृतिं विना स्वाधीनभावेन जीविकार्जनाय प्रभवन्ति। कर्तव्यश्चाधुनापि विस्तारः शिक्षायाः, किन्तु यद्येतदेव स्थिरं स्यादध्ययनानन्तरमस्माभिर्भृत्यादिना रक्षणीया प्राणाः, तदेतादृशशिक्षया किं फलं भविष्यतीति दुर्विज्ञेयमस्माकम्। यावत् स्वाधीना जीविकार्जनपद्धतिर्न प्रवर्तयितुं शक्यते तावदधिगतविद्यानां कर्मव्यवस्था सुतरां राष्ट्रेण कर्तव्येति समासतो वक्तुं शक्यते। भवत्वधुना सर्वैरेवोदरपूरमन्नं भुज्यतामित्यपि सोत्साहं वक्तुं न पार्यते, यतो मूल्यं तावत् यथावस्थितम्। वङ्गप्रान्ते वर्षणाभावेनागामिनः शस्यस्यापि हानिसम्भावना वर्तते। कदा वा क्रययोग्यं मूल्यमर्हति धान्यादिकं तदद्दष्टमेव जानातीत्यदृष्टं नमस्कृत्य न स्थातव्यम्। यतो "दैवे पुरुषकारे च कर्मसिद्धिर्व्यवस्थिते"ति तदर्थमस्माकं कर्तव्यमपि नाल्पम्। समवायेन सर्वेषां राष्ट्रमर्यादास्थितिरिति सर्वैरेव स्वस्वकर्तव्यं विविच्य साधनीयम्,—नोदासीनैर्दैवमात्रसहायैर्वावस्थातव्यमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमच्छङ्कराचार्यदर्शनम्

लेखकः—आणेपुवेंकटरमणमूर्तिशर्मा न्यायाचार्य-तर्कवेदान्ततीर्थः ।

कालप्रभावात्कवलीकृते वलिना कलिना वर्णाश्रमाचारधर्मे, यतमानेषु वैदिकसदाचारधर्मरक्षणाय देवांशसम्भूतेषु कुमारिलभट्टप्रभृतिविद्वद्वरेषु, सन्त्यज्य वेदमार्गमाश्रयत्सु बौद्धमवैदिकं पन्थानं जनेषु, कुमार्गावलम्बनेन दारुणनरकायनगामिषु मानुषेषु, हव्यकव्याद्यभावेन क्षुधातुरेषु सुरेषु, मीमांसकेषु बौद्धेषु च परस्परमहर्निशं सुदारुणं कलहायमानेषु किं-कर्तव्यविमूढतयेतस्ततो धावत्सु मनुजेषु, बौद्धमतानुयायिनां राज्ञां सन्यासिनाञ्च भयेन बौद्धमतानुवर्तिषु जनेषु, सृष्टिस्थित्यन्तकारको भगवान शङ्करः प्रादुर्भूय मानुषरूपेण ब्राह्मणकुले, गृहीत्वाऽष्टमे हायने सन्यासाश्रमम्, समग्रे भारते प्रखरेण वाक्छस्त्रेण विच्छिद्यावैदिकं मतम्, भस्मीकृय तूलराशिमिवाखर्वं बौद्धगर्वम्, धनधान्यास्त्रशस्त्रचतुरङ्गबलदृप्तान राज्ञः स्वतपोबलेन वशीकृत्य संस्थाप्य वैदिके मार्गे, बौद्धमतं भारतदेशात्सुदूरं विताड्य, ग्राहयित्वा भारतवासिनः सर्वान जनान वैदिकधर्मं, प्रकटी-कृत्य लतागुल्माद्यावृतानि गयाप्रभृतिक्षेत्राणि, अद्वैतमतमासेतुहिमाचल-पर्यन्तं प्रतिष्ठाप्य, अध्याप्याद्वैतं परःसहस्रमन्तेवासिनः, श्रीविष्णोरवतार-भूतेन व्यासेन लोकोपकाराय रचितानामथातो ब्रह्मजिज्ञासेत्यादिसूत्राणां भगवता श्रीकृष्णेन साक्षादुपदिष्टाया श्रीमद्भगवद्गीताया ईशाद्युपनिषदाञ्च श्रीशङ्कराचार्यपादा निर्माय भाष्याणि, उपदिदिशुर्ब्रह्मतत्त्वमिति नाविदितं विदुषां विवेकशीलानाम् । श्रीमद्भगवत्पादशङ्कराचार्यविरचितग्रन्थराशि-तत्त्वमेव शङ्कराद्वैतमित्याख्यायते, अतस्तत्सारांशो दिङ्मात्रमत्र प्रदर्श्यते । अस्माभिरनुभूयमानानि गिरिसमुद्रनदीनदादीनि सर्वाणि ब्रह्माति-रिक्तवस्तूनि स्वप्नानुभूतवस्तूनीव, ऐन्द्रजालिकप्रदर्शितवस्तूनीव च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मिथ्याभूतान्येव, आकीटब्रह्मपर्यन्तं सर्वप्राणिनामनुभवगोचराः पदार्थाः स्वप्नपदार्था इव तत्कालं सत्यतया प्रतीत्य सुखं दुःखं वा जनयन्तो दोषस्थितिपर्यन्तं तिष्ठन्ति। एवञ्च निद्रारूपदोषस्य स्वप्नजनकस्य नाशे स्वप्नपदार्था यथा मिथ्येति मन्यन्ते विद्वज्जनैस्तथा जाग्रद्दशायां पदार्थप्रकाशिकाया अनादिकालसिद्धाया दोषरूपाविद्याया विद्यया नाशे जाग्रद्दशायामनुभूयमानाः पदार्था अपि मिथ्यैवेति निर्धार्यन्ते। किञ्च स्वं प्रति हननार्थं धावतो व्याघ्रादीन् स्वप्ने विलोक्योच्चैराक्रोशतो जनान् पार्श्ववर्तिनः केचिद्दयालवो जना निद्रादोषं दूरीकृत्योत्थाप्य प्रागनुभूतं मिथ्येति बोधयन्ति, ततः स्वप्नद्रष्टारस्तेऽपि स्वप्नदृष्टव्याघ्रादयो मिथ्येति निश्चिन्वन्ति। तद्वदेव जाग्रद्दशायामपि धनधान्यपुत्रकलत्रादिवियोगेन शस्त्राद्याघातेन वा प्रभूतमनुभवन्तो दुःखं दुःखाद्विमुक्तिं वाञ्छतो रुदतो जनान् ब्रह्मनिष्ठाः केचन महात्मानः ब्रह्मविद्योपदेशेनानुभूयमानं दुःखं सर्वं मिथ्येति ग्राहयित्वा-विद्यादोषं नाशयन्ति तदा तेऽपि धनधान्यपशुपुत्रादिकं वस्तुजातं तद्वियोगजन्यं दुःखञ्च मिथ्येति निर्धार्याभयं लभन्ते।

एवञ्च दुःखात्मकसंसारनिवृत्तये ब्रह्मविद्याया आवश्यकत्वेन ब्रह्मविद्याप्राप्तये तद्धेतुभूतपदार्थज्ञानाय च श्रीमच्छङ्करभगवत्पादा ब्रह्मसूत्रादीनां भाष्याणि विरचय्याकार्षुर्महान्तमुपकारम्। साऽविद्यानादिर्ब्रह्मसाक्षात्कारनिवर्तनीया सदसत्त्वेनानिर्वाच्या, आध्यासिकतादात्म्यसम्बन्धेन परमात्माभिधेयेश्वरे जीवात्मनि च वर्तते। जीव ईशः विशुद्धचैतन्यं जीवेश्वरभेदः अविद्या अविद्याचैतन्यसंबन्धश्चत्येते षट् पदार्था अनादयः, अन्तःकरणावच्छिन्नं चैतन्यं जीवः मायावच्छिन्नं चैतन्यमीश्वरः विशुद्धचैतन्यं ब्रह्मैव। जीवसाक्षि ईश्वरसाक्षि चेति वस्तुद्वयञ्च स्वीक्रियते। अन्तःकरणोपहितं चैतन्यं जीवसाक्षि, मायोपहितं चैतन्यमीश्वरसाक्षि चेति निगद्यते।

अविद्या द्विविधा मूलाविद्या तूलाविद्या चेति, मूलाविद्यास्वरूपं पूर्वमुक्तमेव। सैव जगत्कारणम्। तूलाविद्या तु पूर्वपूर्वतत्तद्भ्रमानुभवजन्यसंस्काररूपा। इयमविद्योत्तरोत्तरभ्रमहेतुः। द्विविधाप्यविद्या जीवात्मन्येव वर्तते, न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तु परमात्मनि तथापि मूलाविद्या परमात्मानं विषयीकरोतीति वेदान्तिनः केचन ब्रुवते।

श्रुतिस्मृतिविहितानि काम्यनिषिद्धभिन्नानि कर्माणि सगुणब्रह्मोपासनानि यज्ञदानतपांसि चोत्कटवैराग्योत्पत्तिपर्यन्तमवश्यं करणीयानि। वैराग्यानुदयदशायामेव श्रुतिस्मृतिविहितानि कर्माणि विहाय ब्रह्मलाभाय यतमाना जनाः उभयतो भ्रष्टा भूत्वा पतन्ति दारुणनरकेषु।

विस्तरभिया प्रमाणवचांसि नात्र प्रदर्श्यन्ते। नित्यानित्यवस्तुविवेकः इहामुत्रार्थफलभोगविरागः शमदमतितिक्षोपरतिश्रद्धासमाधानसम्पद् मोक्षेच्छेत्येतत्साधनचतुष्टयप्राप्त्यनन्तरमेव ब्रह्मविचारः करणीयः। एतत्साधनचतुष्टयप्राप्त्यर्थं साङ्गवेदाध्ययनं वैदिकस्मार्त्तयज्ञदानादिक्रियाकलापानुष्ठानं प्रथममवश्यं करणीयम्। ब्रह्मसाक्षात्कार एव मोक्षं प्रति हेतुः, तल्लाभपर्यन्तं वारं वारं वेदान्तवाक्यश्रवणं मननं निदिध्यासनञ्च करणीयम्। श्रवणमनननिदिध्यासनसहकृतवेदान्तवाक्यार्थानुभव एव ब्रह्मसाक्षात्कारः। श्रवणनिदिध्यासनसहकृता खण्डाकारब्रह्मविषयकचित्तवृत्तिरेव ब्रह्मसाक्षात्कार इति केचित् वेदान्तिनो वदन्ति।

पुस्तकप्राप्तिस्वीकृतिः

१। श्रीमृत्युञ्जयमानसिकपूजास्तोत्रम्—मूल्यमानकद्वयम्।
२। श्रीदक्षिणामूर्तिस्तोत्रम्—मूल्यमानकचतुष्टयम्।
३। श्रीवेदान्तडिण्डिमः (श्रीमच्छङ्कराचार्यविरचितः) मूल्यमानकचतुष्टयम्।
४। श्रीराजराजेश्वर्यष्टकम्—(मूल्यं न निर्दिष्टं)
५। वीजाक्षरवर्णमालिकास्तोत्रम्—मूल्यमानकत्रयम्।
६। श्रीवैष्णवसन्ध्यावन्दनम्—मूल्यमानकचतुष्टयम्।
१। चेन्नपुर्यां वाविल्लरामस्वामिशास्त्रुलुण्डसन्स् इत्येतैः प्रकाशिता-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्येतानि पुस्तकान्यस्माभिरधिगतानि। प्रसिद्धानां स्तोत्रादीनां का नाम समालोचनास्माभिः क्रियते। स्वतन्त्रप्रकाशनेन तत्तत्स्तोत्रप्रेप्सूनामुपकृतिः सम्पादिता प्रकाशकेनेत्येतावन्मात्रं वक्तुं शक्यते। परं वैष्णवसन्ध्यावन्दने प्रकाशकस्य काचित् संग्रहनिपुणता—निबन्धनपौर्वापर्यपरिपाटी च परिलक्ष्येते अस्माभिरिति प्रकाशकेभ्यः साधुवादाः प्रदीयन्ते।

साप्ताहिकसंस्कृत-पत्रिकापरिचितिः

[निबन्धकः—श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः]

पवित्रवाराणसीधामतः पण्डितपत्रिका नाम काचन साप्ताहिकी पत्रिकाऽस्माकं परं मोदं सम्पादयन्ती सङ्गता। पण्डितप्रवरकवितार्किकचूडामणयोऽखिलभारतीयपण्डितमहापरिषदः प्रधानामात्या अखिलभारतीयधर्मसंघविशिष्टनेतारः श्रीमन्महादेवशास्त्रिणो व्याकरणसाहित्याचार्याः काशीस्थहिन्दुविश्वविद्यालयीयप्राच्यविद्याविभागाध्यक्षा अस्याः पत्रिकायाः प्रधानसम्पादका इत्यपि नितरामस्मान् मोदयति। अस्यां पत्रिकायां प्रकाशितानां विषयाणां गुरुत्वं विद्यार्थिभ्यो विद्वद्भ्यश्च प्रमोदमभिनवं ज्ञानञ्च दातुं प्रभवतीत्यस्याः पत्रिकाया बहुलप्रचारः काम्यते। मूल्यमपि वार्षिकं रूप्यकचतुष्टयम् स्वल्पमेव। धर्मसंघशिक्षामण्डलम्—दुर्गाकुण्डं काशी"ति प्राप्तिस्थानम्। संस्कृतपत्रिकाः प्रायश उदयमाना एव विलीसन्ते इत्यस्याः सुदीर्घजीवनमपि श्रीभगवत्समीपे प्रार्थ्यते, जीवतादियं पत्रिका संस्कृतप्रणयिनां प्रमोदं जनयन्ती निरवधिकालमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पत्रावली

(पूर्वानुवृत्तम्)

[निबन्धकः—स्वर्गत-पण्डितरामगोपालविद्यारत्नः]

५। अपि कुशलं ते नीलकुञ्चितमूर्धजाया गृहलक्ष्म्याः ; भवतोऽपि संसारविवेकविकृतचित्तस्य ? अहो ! केन खलु पुण्यबलेन सुव्युष्टा मे रजनी, कस्य वा चिरमङ्गलमयमीदृशमाननमवेक्ष्य प्रबुद्धोऽहं यत सुचिर-सखिवियोगखेदसञ्जातपरीतापेनापि मया दिनकरप्रखरकरनिकरविशुष्क-शष्पजालेनेव प्रावृट्पयोवर्षणेन सहसा पुनर्जीवितमासाद्यते। महात्मन् ! किमवितथमेवैषा भवतोऽनुग्रहलिपिका, उताहो स्वप्नोपभुक्तराज्यसुखादिव-दलीकोऽयमधिगम्यमानः समाचारः ? अथवा, बन्धुसङ्गतितृषाव्याकुली-कृतचेतसो मे विधातृविहितोऽयं विकारनिवहः ? आङ् ज्ञातम्। दुर्लभ-जनानुरागो हि मद्विधानित्थं वियोगिनो विड़म्बयति। बन्धो ! किं कथयसि, मया धन्यः कृतोऽसि ? अनुगृहीतोऽसि ? विचित्रमेतत् प्रणयलक्षणम्। अहो ! व्याजस्तुतिरिव दुनोति मामपात्रविन्यस्तस्तवाय-मनभिधेयः स्तुतिवादः। तद् यथेच्छमभिधत्स्व, केनापि परिहासेन पुन-र्नार्हसि मां स्वनियोगात् परिचालयितुम्। सखे ! किं स्विद् युवतिजन-विलोलकटाक्षविक्षेपोद्भ्रान्तचेतसा वयमेकदापि भवता स्मर्यामहे ? भ्रान्त्यापि नैतद्विश्वसनीयम्। यातु, आकर्णितं मया कस्यचिद् विद्यालयाध्यापकस्य शीर्षपदमधिरोहतापि भवता स्वेच्छात एव तत् प्रत्याख्यातमिति। तत् केनावलम्बनेनेदानीं कालोऽतिपात्यते ? अथवा, अस्त्येवावलम्बनं यद-बलम्बनीयानामबलम्बनीयतममिति।

६। महात्मन् !

श्रीमत्याः शुभपरिणयसन्देशमाख्यापयन्त्या श्रुतिमधुरमनोहरया गिरा समनुगतां प्रागष्टाहाद् भवद्भिर्विरचितां सुखलिपिकामद्यैव कियन्तं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालमधिगतोऽस्मि। लब्ध्वा च तां ह्लादकरीमत्यर्थं प्रीतिमानपि तावन्महान्ति दुःखान्यध्यगच्छम्? कैर्नाम खलु अविरलसुखजालै-रभ्युपेत-प्रमोदजननव्यापारेण समं सहानुभूतिमापादयितुमपारयद्भिर्हृदयमर्मस्पर्शीनि दुःखानि नानुभूयेरन? अहो! ममैव भाग्यविप्लवात् सर्वमेतदुत्पन्नम्। यथाकालमपि भवद्भिर्विसृष्टा लिपिरियं प्राक् निकेतनमेव मामकं प्रतीयाय, तस्माद्व्यावर्तितापि चिरायमाणा पुनरिहाजगाम, अतः काङ्क्षन्नपि परिणय-वीक्षणजातं सुमधुरमतिर्वचनीयं शर्म, दैवदुर्विपाकाद् वाच्यतामेवापन्नोऽस्मि मन्दभाग्यः। यातु, इदानीमिदमेव काम्यं करुणामयस्य भगवतः प्रजापतेरनुकम्पया शिशुदम्पती इमौ सुचिरं दाम्पत्यसुखान्यनुभूयाताम्। सम्प्रति कार्यवशादत्रैव मासमासे, अपरमपि मासद्वयमासिष्ये च। शरीरमधुना नितरां क्लिष्टं, भवतां कुशलसमाचारः प्रार्थनीय इति। वैशाखस्योनविंशदिन-जेयं लिपिः, १३०१ वङ्गाब्दस्य।

७। परममपि श्रवणीयं श्रीमन्महाराजस्य प्राक्तनपुरुषाणामेकैकशो वैचित्र्यमयमतुलकीर्तिमदुदारचरितं कविकरसम्पर्काभावाद् वसन्त-सङ्गतिपरिवञ्चितकोकिलकुलकलकूजनमिव विलुप्तमासीत्। तेन च श्रीमतामयत्नविलुप्तचरितानां कविकुलचूडामणिना महात्मना श्रीमन्महेशचन्द्रतर्कचूडामणिमहोदयेन सम्प्रति काननविकीर्णललितमुक्ताकलापेन ग्रथिता विचित्रोज्ज्वलदीप्तिमती मालेव राजवंशनामधेयं महाकाव्यमेकं विरचितम्। तस्य च मामकादेव यजमानात् श्रीमतो विष्णुप्रसाद-वन्द्योपाध्यायमहोदयात् खण्डमेकं लभमानो नितरामनुगृहीतोऽस्मि। सर्वथा दरिद्रजनदुर्लभो हि नृपतिप्रसादः। नो जाने केन खलु पुण्यबलेन लब्धो मया मन्दभाग्येन सोऽद्य। अथवा चिरतृषाकुलचेतसो विधि-विडम्बितस्य नवजलदमनवलोकयत एव निमीलितदृशश्चातकस्य सलिल-विन्दुरिवाकस्मिकोऽयं समुपनीतो मे महानयं नरपतिप्रसादः। यातु, कल्पनाचातुर्य-भाववैचित्र्यादिभिरमृतायमानं तत् खलु सुमहत् काव्यं मादृशैरनास्वादितकाव्यसुधारसैरनालोचयितव्यं तस्मादसमालोचितश्च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
भगवदनुगृहीतेषु भवादृशेषु निखिलसम्पद्राजनेषु श्रीमतसु किं पुनरन्यद्वक्तव्यमस्ति ? केवलं भगवच्चरणारविन्दादविचलितचित्तो निरन्तरायं राज्यमेतदुपभुञ्जानः पुत्रकलत्रादिभिरवियुक्तो निरामयश्चिरं जीवतु भवानिति ।

८। गुरो !

जानन्नपि क्रोधसमीरणेन दोधूयमानशिखं हुताशनमेव लेलिहानं मृत्युना बलाद् गृहीतः स्वयमेव प्राणान् विसिसृक्षुः पतङ्ग इवाहं भवन्तमुप सर्तुकामोऽस्मि । अथवा, यदृच्छया भूधरगह्वरे शयानस्य महासिंहस्यैव निमीलितनेत्रस्य अविदितघोरपराक्रमः शिशुरिव लेष्टुनाहं रोषमुद्दीपयामि । यातु, अभिनवः कृत इति धिया मर्षितव्योऽयमपराधनिवहो न खलु रोषपरेण भवितव्यं भवता गुरुणेति, यतो भवतां मन्युनानलेन निर्दग्धव्या वयमिति ।

९। अपि कुशली भवान ? कुशलिनी च तत्रभवती अथवा तत्रभवतामपि तत्रभवती सा ? महात्मन ! सत्यपि सख्ये महति अर्वागपि संवत्सरान्नावयोरस्ति सम्मेलनं, नो वा लोकपरम्परया वार्तापरिग्रहः ; नापि सुदीर्घविरहेण व्याकुलीकृतचित्तयोर्लिपिविनिमयेन वा मनागपि चित्तविनोदनम् । किं करोमि ? भ्रातः ! प्रदीप्तसंसारानलसन्तापसन्तप्तत्वान्न खलु श्रीमतां शारीरमपि क्षेममवगन्तुं शक्नोमि, किं पुनर्मानसिकं वैषयिकञ्च । अहो ! गर्हणीयोऽपि महानयमशिष्टाचारश्चिरशैथिल्यवशादेव प्रणिधीयते नास्माभिः । यातु, यद् भवितव्यं, तद् भूतमेव । इदानीमयमस्माभिः परिहर्तव्य एव । अथ चिरनिर्व्याहारयोः सख्योः कः पुरस्ताद् वाचं व्याकरिष्यति ? मनोषिन् ! स्थाने खलु कौटिल्यकालिममलिने कस्यचित् कूटनीतेः कुटिले चेतसि प्रश्नोऽयमवसरं लप्स्यते । तदपि प्रज्ञावद्भिरुदारचेतोभिर्नायं श्रद्धेयः । सखे ! न ह्यभिमानिन्यौ दम्पती अपि चिराय मौनमवलम्बेते, कथमावाभ्यां पुंभ्यामवलम्ब्यते तत् ? भवतु, अभिमानबहुलेऽपि द्वैरथयुद्धेऽस्मिन्नग्रगामित्वापवादो मामेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
मलिनीकरोतु। अथ "जन्मे नाइ षष्ठीवृत्ता, एकेवारेइ दशभुत्ता" इति वङ्गकुलकामिनीभिः परिसेवितस्य परिहासकाव्यस्य प्रमाणबलेनामूलं हृदयस्पर्शिमहास्त्रनिवहैः फलकैरशिक्षितयोध इवाहं श्रीमतां नवनीतकोमलं हृदयमभिलक्ष्य प्रागेव संस्कृतभाषाशरान् सन्दधे। नो जाने किं फलमस्मिन् फलिष्यतीति। आशङ्के खलु प्रचण्डवानाहतिपरम्पराभिः विसंज्ञाः श्रीमन्तो युद्धक्षेत्रात् पलायमानाः पश्चात् प्रतिवैरं नानुचरेयुरिति। अहो! कृतोत्साहमपि मां नैराश्यमेवाकुलीकुरुते। न खलु कुसुमरसपानावेशविकलीकृतचेतसां भ्रमराणामस्फुटमधुराक्षरस्य प्रभातगुञ्जनस्येव मे भाषाया झङ्कारः। नो वा वसन्तसमागमोत्फुल्लचेतोभिः कलकण्ठकोकिलकुलैरुच्चरितानां निस्तब्धनिशीथकुहुध्वनीनामिव तस्याश्चित्तचापल्यप्रवर्त्तनम्। नापि स्फुटनोन्मुखयौवनानां व्रीडावगुण्ठिननवोढानां पुरसुन्दरीणामपरिस्फुटप्रथमप्रेमभाषाभिव्यक्तेरिव श्रवणमनःप्राणेषु तस्याः प्रीतिप्रवाहप्रवाहनञ्च। तत् केन शरेण श्रीमतां प्रीतिं जनयिष्यामि? क्षन्तव्यमेव श्रीमद्भिर्धार्ष्ट्यमेतत् परिहासेनापि। छिद्यतामत्रैव सांलापिकसमरव्यापारः। प्रकृतमेवानुसरामि। सखे! अधीतकाव्येनापि श्रीमता तावदनितरां क्लेशितोऽस्मि। मुहुरुपदिष्टोऽपि नासौ मे वशमायाति, नो वा तस्याध्यापकप्रवरादधीतं व्याकरणं पुनरालोचयति, नापि तट्टीकामधीते। अथ अव्युत्पत्तिमूलं तदीयं ज्ञानमुपलभ्य न हि सम्भावयामि वैयाकरणसुलभेन बोधेन परिवञ्चितस्य तस्य परीक्षाम्बुधेः पारप्रयाणं, मङ्गलविधौ च तस्य कायमनोवाग्भिर्यतमानानां श्रीमतामक्लान्तपरिश्रमस्य साफल्यञ्च। अतः सर्वमेतदशेषतो विमृश्य श्रीमतां सकाश एव पुनरध्ययनं तस्य मया मुहुरालोचितं, काममनुरुद्धञ्च। नो जाने, किं मन्यमानः स स्थानान्तरं प्रस्थित इति। न खलु अन्तस्तत्त्वानभिज्ञत्वादभिनवोऽयमुपाध्यायः श्रीमतो व्याकरणस्य पुनरालोचनायां मनागपि यतिष्यते। अतः खलु फलं यत् फलिष्यति, तत् परिस्फुटमेव। सखे! सविनयं प्रार्थये, कृतापराधोऽपि बालो यथा दुस्तरं
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परीक्षासागरमिमं कथमपि तरीतुमर्हति, आशीरुक्तैव श्रीमद्भिश्चेष्टितव्यं तथेति ।

१० । अथ केनचिदविवेकिना निरक्षरेणानुष्ठितकर्मणा विमानितोऽपि, भ्रातर्न पुनरिच्छामि कर्हिचिन्मनागपि विप्रियमाचरितुं राज्ञः । पश्य, एकस्य हि व्याधेर्निराकरणाय न खलु कश्चिदापातमधुरैरनुपयोगवद्भिः कुपथ्यादिभिः प्राणहरानपरान् व्याधीन् समाहरति, तेन हि गन्तव्यायामपि त्वदुपदिष्टायां सरण्यां न हि शक्नोमि तामनुसर्तुं प्रकृतिसुलभेन विवेक-दौर्बल्येन । भ्रातः ! मातुरिच्छैव बलवती । प्राग्भवीयानां सुकृतदुरितानां सुखदुःखादिफलभोगाय सैव पुनरिहास्मान् विविधेषु विषयेषु मुहुर्नियुनक्ति, वयमपि नाम तस्या एव नियतिनियन्त्रिताः सन्तोऽप्रियाण्यपि तानि तानि फलानि परोक्षमपरोक्षंवा अनिशमेव भुन्ङ्ग्वहे । अतो मर्मन्तुदमपि पुञ्जीकृतस्य प्राग्भवीयस्य दुरितस्य व्यवहारोत्पन्नं फलमेतन्नतग्रीवेणैव मया भोक्तव्यं भुक्तं वा नास्त्यस्मिन कापि विप्रतिपत्तिः । यातु, तस्य हि व्यवहारस्य आदावहनि के के तत्र समागताः ? केन केन वा साक्षित्व-मापादितम् ? व्यवहारः शिथिलस्तुमुलो वा कीदृशः संवृत्तः ? धर्माधि-करणान्तरात् के के व्यवहारजीविनः सङ्गताः ? अर्थिप्रत्यर्थिनोश्च विशङ्का कीदृशी ? विजयश्रीः कं पक्षमवलम्बेत, किञ्चानुमीयते लोकैः ? सर्वमेतद् यथायथ-मनुसन्धाय संवृतलियिकयैकया झटिति विज्ञापयितव्यं त्वयेति प्रार्थनीयमित्यलंपल्लवितेन ।

११ । यद्यपि भवतो ललितमधुराभिर्वचनपरम्पराभिर्नो तृप्तो, न वा क्षणमात्रदर्शनसंलापादिभिरपि परिचितोऽस्मि,तथापि श्रोतृपरम्परया मया भवतो भूयसी ख्यातिराकर्णिता, भवत्कृता तारास्तुतिरपि क्षेत्रनाथ-नामधेयस्य कस्यचिन्मामकस्यान्तेवासिनः सकाशात प्रविलभ्य परमया भक्त्या समधीता च । इह खलु भावतरङ्गायितकाव्यमहोदधौ शिक्षा-नैपुण्यचतुरः कर्णधारो भवान् । तत्र हि महाझटिकाहतिजनिततरङ्ग-विक्षेपादिभिर्निमग्नप्रायास्तारका इव विपन्ना वयं भवन्तमेव शरणं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्रजामः। राजसाहीनिवासिना वागचीत्युपाधिकेन रामजयनामकेन केनचिद् व्यवहारजीविना सङ्गीतकुसुमनामनी द्वे सङ्गीतपुस्तके प्रणीते। ते तु पुस्तके घटनावशादस्माभिरपि लब्धे पठिते च। तयोरेकस्मिन प्रकटीकृतं भवता "महात्मनो रामजयस्य सङ्गीतानि समाकर्ण्य भगवतः श्रीमूर्तिमहमवलोकयामी"ति। तयोस्तु सङ्गीतपुस्तकयोः सन्ति खलु बहूनि सङ्गीतानि, तेषां पुनः कानि नाम सङ्गीतानि भवन्तं श्रीमूर्तिं दर्शयामासुस्तन्न जानीमः, सम्यगुपलब्धुमपि नार्हामः। न हि किमपि विचित्रं भवतो भक्तप्रवरस्य हृदयवतस्तारातनयस्य भगवत्प्रसङ्गसंश्रितसङ्गीतश्रवणेन भगवतः श्रीमूर्तिदर्शनं नाम, परन्तु सर्वथा तत् सम्भवत्येव। प्रागेवोक्तं तानि सङ्गीतानि घटनावशादस्माभिरपि लब्धानि, पठितानि, कतिचिद् गीतानि चेति। तेषां पुनरेकस्मिन्नपि सङ्गीते ग्रन्थकर्तुर्हृदयावेगः, श्रोतृवृन्दानां हृदयस्पर्शी रचयितुः प्राणवहिःसृतः कश्चिद्भावः, वाक्यसंयोजनात् विशेषणानाञ्च सपिण्डीकरणादृते किमपि कवित्वं साधकत्वं वा नास्माभिरुपलब्धं नालोकितञ्च। नहि खलु तानि कुसुमानि परिमलबहुलानि, नो वा मधुमन्ति, वस्तुतस्तु, किंशुककुसुमानीव तानि वहिर्विचित्राण्येव। अनुमीयते, कस्यचिदनुरोधात् तादृशी प्रशंसालिपिका प्रदत्ता भवतेति। दीयतां, भवत्प्रदत्तया प्रशंसालिपिकया यदि कश्चित् समाद्रियते, तदा वयं सन्तुष्याम एव। न हि वयं रचयितुर्विद्वेषिणो विरोधिनो वा; किन्तु इदमेव सुमहत् कृच्छ्रमस्माकं यत् प्रगाढभक्तिप्रेमादिभिर्विगलितचेतसा मातुर्भक्तप्रवरेण कविकुलतिलकेन भवता अतिरञ्जितानि खलु तान्यकिञ्चितकराणि सङ्गीतानि। अपरञ्च, रामप्रसादप्रमुखैरादर्शभक्तिसङ्गीतरचकैः श्यामापदारविन्दचिन्तनेन श्यामामयं जगदवलोकयद्भिः साधकश्रेष्ठैरलङ्कृतेषु समुज्ज्वलेषु पवित्रासनेषु उपवेशितोऽयं भवता रामजयः। भवतः शिष्यदेशीयेन दुर्वारपुत्रशोकाभिभूतेन मया किमन्यद् भवते निवेदयितव्यं, भवतैव सर्वं विचार्यम्। परन्तु, उद्भ्रान्तेनेव मया यत् किमपि लिखितं, तदप्युदारचेतसा मर्षयितव्यमित्यलं पल्लवितेन।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

छन्दोगक्रियासारः

[निबन्धकः—श्रीरमणीकान्तसिद्धान्तरत्नः]

ॐ नमोगणेशाय ॥ सर्वेषामेवान्वाहार्य्यवतां गृह्योक्तकर्मणां (अ) संस्कृताग्निसाध्यत्वादग्निसंस्कार एव प्रथममभिधीयते। तत्र छायामण्डपसहितं पूर्वोत्तरप्लवं समं वा गोचर्ममात्रं (हस्तावरं) (आ) भूप्रदेशमग्नेः स्थण्डिलत्वेन परिकल्प्य कुशैः पांश्वादिकं समुत्सार्य गोमयेनोप-

---

(अ) अथातो गृह्याकर्माण्युपदेक्ष्यामः ॥ इति गोभिलसूत्रस्थं गृह्यापदमनुद्भिन्नपदार्थं व्याकरोति तत्पुत्रः,—पत्नयः पुत्राश्च कन्याश्च जनिष्याश्चापरे सुताः। गृह्या इति समाख्याता यजमानस्य दायकाः। ३५। तेषां संस्कारयोगेन शान्तिकर्मक्रियासु च। आचार्यविहितः कल्पस्तस्माद् गृह्या इति स्थितिः। ३६ गृह्यासंग्रहः ॥ "सर्वाण्येवान्वाहार्यवन्ति।" ५।१प्र। २ख इति गोभिलसूत्रम्। अनु पश्चात् आह्रियते यस्मात् प्रकृतं कर्म इति, अनु पश्चादाह्रियते यत् प्रस्तुतात् कर्मणः इति चान्वहार्यं नान्दीमुखश्राद्धं दक्षिणा चोच्यते। तथा च गृह्यान्तरम,—'यत् श्राद्धं कर्मणामादौ या चान्ते दक्षिणा भवेत्। अमावास्यां द्वितीयं यदन्वाहार्यं तदुच्यते इति।

(आ) गोचर्ममात्रं कुर्वीत चतुरस्रमनूषरे। सर्वतो रत्निमात्रं स्यात् सायं प्रातश्च होमयोः ॥ ३६।१प्र गृह्यासंग्रहः।

ऊषरं वालुकामयस्थानं तन्न भवति इत्यनुषरं तस्मिन् प्रदेशे। बद्धमुष्टिकरोरत्निः। निष्कनिष्ठः करो रत्निः ॥ तत्रैव गोचर्म परिमाणमाहुः, "ऋषभैकशतं यत्र गवां तिष्ठति संवृतम्। वालवत्सस्तानां गोचर्म इति तं विदुः ॥३७।१प्र।

"षट् पञ्च चतुरो वापि त्रयो द्वौ वा शफौ स्मृतौ। गोचर्म इति शब्दोऽयं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लिप्य अनिषिद्धजलाशयादाहृतोदकेन प्रक्षालितपानिपादवदणो (इ) द्विराचान्तः (ई) कुशसहितोदङ्मुखासनोपविष्टः (उ) प्रयोजनद्रव्याणि भाविनोऽग्नेरुत्तरे समासादयेत ।

विधियोगे निपात्यते ॥ ३८।१प्र गृह्यासंग्रहः । तदेवं गोचर्मस्थानानामनियतपरिमाणत्वाद् यत्र विहिते कर्मणि यावत्स्थानमपेक्षितं तावत् परिमाणमेव स्थानं ग्राह्यमित्यभिप्रायः ।

(इ) "अनुगुप्ता अप आहृत्य प्रागुदक्प्लवनं देशं समं वा परिसमूह्योपलिप्य मध्यतः प्राचीं रेखामुल्लिख्योदिचीञ्च सं हतां पश्चात्, मध्ये प्राचीस्तिस्र उलिख्याभ्युक्षयेत् ॥६।१प्र ।१ख गोभिलसूत्रम् ।

अनुगुप्ताः अनुरक्षिताः पतितादिभिरदृष्टा इत्येतत् । समूह्य इत्यनेन कुशैर्मार्जनं प्रतीयते कुशैः सम्मार्जयेद् भूमिमिति दर्शनात् । "भूमेः समूहनं कृत्वा गोमयेनोपलिप्य च । द्रव्याण्युत्तरतः स्थाप्य वृषीं कुर्यादुगङ्मुखीम्" इति गृह्यासंग्रहदर्शनाच्च अत्र समूहनं मार्जनं वेदितव्यम् ॥

"प्राङ्नीचं ब्रह्मवर्चस्यमुदङ्नीचं यशोत्तरम् । पित्र्यं दक्षिणतोनीचं प्रतिष्ठालम्भकं समम् ॥ गृह्यासंग्रहः ॥

(ई) होमे भोजनकाले च सन्ध्ययोरुभयोरपि । आचान्तः पुनराचामेत् अन्यत्रापि सकृत् सकृत् ॥ इति गृह्यासग्रहः ।

(उ) "भूमेः समूहनमित्यत्र वृषीं कुर्यादुदङ्मुखीमिति यदुक्तं वृषीनामाद्वादशाङ्गुलपरिमितवंशनिर्मितमासनं तदिति विज्ञायते ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीचैतन्यचरितामृतसंस्कृतानुवादः

(पूर्वतोऽनुवृत्तः)

अनुवादकः—श्रीभास्करानन्दस्वामी।

श्रीश्रीचैतन्यचरितामृत आदिलीलायां

षष्ठः परिच्छेदः

अथवा का कथान्येषां बलदेवोऽप्यसौ स्वयम्।
शुद्धसख्यमयो भावो यस्य वात्सल्यसंयुतः॥
सोऽपि श्रीकृष्णदास्येन बह्वात्मानममन्यत।
श्रीकृष्णदास्यहीनः को वर्त्तते जगतीतले॥
सहस्रवदनः शेषो यः सङ्कर्षण ईरितः।
दश देहान विधाय स्वान सोऽपि कृष्णं निषेवते॥
यो ब्रह्माण्डेष्वनन्तेषु रुद्रः सदाशिवांशकः।
गुणावतारः कृष्णस्य सर्वदेवशिरोमणिः॥
सोऽपि श्रीकृष्णदासत्वं सतृष्णं सम्प्रतीक्षते।
अहं श्रीकृष्णदासोऽस्मीत्याह शम्भुर्निरन्तरम्॥
कृष्णप्रेम्ना सदोन्मत्तो विह्वलोऽस्ति दिगम्बरः।
कृष्णलीलागुणैर्गाथां गायन्नृत्यति सर्वदा॥
मातुः पितुर्गुरोः सख्युर्यथा भावोऽस्तु यस्य तु।
दास्यं कारयते तं तं कृष्णप्रेमा स्वभावतः॥
एकः कृष्णो हि सर्वेषामुपास्यो जगदीश्वरः।
सेवकानुचरास्तस्य यावन्तः सन्ति चापरे॥
कश्चिन्मानयते कोऽपि न तं सर्वे तु सेवकाः।
न तं मानयते यो हि ततपापेन स नश्यति॥
अहं चैतन्यदासोऽस्मि चैतन्यस्यास्मि किङ्करः।
चैतन्यस्यास्मि दासोऽहं तद्दासस्यापि किङ्करः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्युक्त्वाद्वैत आचार्यो जगौ नृत्यन सहुङ्कृति ।
क्षणेनोपविशन्नेव स्थिरतां प्रत्यपद्यत ॥
भक्ताभिमान-मूलं हि बलरामो निगद्यते ।
तस्य भावेन सर्वेऽशास्तमेवानुगता इति ॥
तस्यावतार एकः श्रीसङ्कर्षणमहाप्रभुः ।
भक्त इत्यभिमानं स्वं कुरुतेऽसौ प्रतिक्षणम् ॥
अन्यस्तस्यावतारोऽभूद्वीरः श्रीयुक्त-लक्ष्मणः ।
असौ श्रीरामदासत्वं कुर्वन्नासीदनुक्षणम् ॥
सङ्कर्षणावतारोऽसौ कारणाब्धिशयः पुमान् ।
तस्य मूलानुसारेण भक्तभावः सदा हृदि ॥
तस्य प्रकाशभेदोऽयमद्वैताचार्य एव हि ।
कायवाङ्मानसैर्भक्तिरस्य कर्माभवत सदा ॥
चैतन्यानुचरोऽस्मीति वचनं स उदैरयत ।
नित्यं चैतन्यभक्तोऽहमिति दध्यौ च चेतसा ॥
तं सिषेवे स कायेन तुलस्या च जलेन च ।
प्रचारयंश्च तद्भक्तिं भुवनान्युदतारयत ॥
शेषः सङ्कर्षणो नाम यो धत्ते शिरसा भुवम् ।
कायव्यूहान् विनिर्माय श्रीकृष्णं सेवते सदा ॥
एते सर्वेऽवतारा हि कृष्णस्य परमात्मनः ।
एषां भक्तियुताचारः सर्वदा परिलक्ष्यते ॥
एते भक्तावतारा हि सर्वे शास्त्रैरुदाहृताः ।
पदं भक्तावताराणां सर्वेषामुपरि स्थितम् ॥
अतएव स कृष्णोऽंशी तदंशा अवतारकाः ।
कनिष्ठज्येष्ठताचारो दृश्यतेऽंशांशिभावयोः ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

9. **Introduction to the Rigveda of Sayanacharya**—Edited by Dr. Pashupatinath Shastri, M.A. B.L. Ph. D. Re. 1-8 ; Re. 1-4- (for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. As.14;As. 10 (for members).

11. **Prabhakara-vijayam** of Nandishvara—Edited by Mahamahoadhyaya Anantakrishna Shastri Vedantavisharad and Pt. Ramanath Shastri. Rs. 2-8 ; Rs. 2 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya—Edited by Pt. Bamacharan Kavyatirtha. As 12 ; As 10. (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Prof. Chintaharan Chakravarti, M. A Re 1-8 ; Re. 1-4 (for members).

14. **Nala-damayantiyam** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2-8 ; Rs. 2 (for members).

15. **Prashastapada-bhashyam**—Edited by MM. Kalipada Tarkacharya. Rs. 4 ; Rs. 3. (for members).

16 **Yatratattvam** of Raghunandana Bhattacharya—Edited by Pt. Dwarikanath Nyayashastri. Rs. 2. ; Re. 1-8 (for members).

17. **Rik-pratishakhyam**—Ed. by Dr. Pashupatinath Shastri, M.A., B.L., Ph.D with the assistance of Prof. Chintaharan Chakravarti, M.A. Rs. 5 ; Rs. 4 (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Prof Akshayakumar Shastri. Re. 2 8 ; Rs. 2 (for members).

19. **Chhandogyamantrabhashyam** of Gunavishnu—Ed. by Prof. Durgamohan Bhattacharya, M. A. Rs. 7-8 ; Rs. 6 (for members). out of stock]

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by MM. Kalipada-Tarkacharya. Rs. 7. ; Rs. 6 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Prof. Chintaharan Chakravarti, M.A. Re. 1-4 ; Re. 1 (for members).

22. **Prasanta-ratnakaram** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2 ; Re. 1-8 (for members).

23. **Devisatakam** of Mahamahopadhyaya Krishnanath Sarvabhauma —Ed. by Pt. Janakinath Shastri. As. 12 ; As. 10 (for members).

24. **Sataranja Kutuhalam**:—Ed. by Prof Chintaharan Chakravarti Kavyatirtha M.A., As. 8

25. **Satyanubhavam**:—(a new MahaKavya) of MM. Kalipada Tarkacharya, Rs. 5 ; Rs. 4-8 (for members).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

একমাত্র ধর্ম্মই এই সংসার-সাগরে সমুদ্ধর্ত্তা
এবং তাঁরই মহনীয় বাণী প্রচার করিতেছে
গুপ্তপ্রেশ ডাইরেক্টরী পঞ্জিকা

উত্তর কলিকাতায়

(দেশবন্ধু পার্কের দক্ষিণ পার্শ্বে)

নবনির্ম্মিত রঙ্গমঞ্চ

সংস্কৃত-সাহিত্য-পরিষদ্-ভবন

১৬৮।১, রাজা দীনেন্দ্র ষ্ট্রীট, কলিকাতা ৪

Printed by Bishnupada Bhattacharya M. A. Kabyatirtha. at Calcutta Oriental Press, Ltd., 9, Panchanan Ghose Lane, Calcutta and Published by the same from Sanskrit Sahitya Parishad, 168/1 Raja Dinenda Street, Shyambazar, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C 1073

Vol. XXXVII
No. 5
३७श-वर्षस्य
५म-संख्या

September 1954
१८७६-शकीये
भाद्रे
मासे

भारतं मातृ भारती

संस्कृत-साहित्य-परिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकौ

श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः

श्रीरामधनशास्त्री काव्य-व्याकरण-पुराणतीर्थश्च

संस्कृत-साहित्य-परिषत्
श्यामबाजार, कलिकाता

वार्षिकमूल्यम्—रूप्यकषट्कम् ६।
Foreign price—1-4s

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रभिवेदनम्

प्रियपाठकमहाभागाः !

जानन्त्येव भवन्तो यत् परिषदियं कियतः कालात् प्रागात्मप्रतिष्ठायै कलिकाता-पौरसभादत्तं किञ्चित् स्थानमधिगत्य तत्रात्मनो वासगृहं रचयितुमारभ्यापि किञ्चिन्मात्रं निर्मायैव महासमरसम्भूतदौर्मूल्यादिभिः कारणैरर्थाभावेन च महता नारब्धं समापयितुं समर्थेति ।

तत् प्रियतमामिमां परिषदं यदि श्रीमन्तः प्रतिष्ठावतीं प्राणवतीञ्च द्रष्टुमिच्छन्ति, तदा सदयं प्रेषयन्तु यथाशक्ति साहाय्यं वक्ष्यमाणसङ्केतेन परिषत्-प्रणयिन्याः कल्पितप्रासादनिर्माणपरिसमाप्त्यर्थमिति ।

सङ्केतः—संस्कृत-साहित्य-परिषत्-सम्पादकः,

१६८।१, राजा-दीनेन्द्रष्ट्रीट्, कलिकाता-४

Sanskrit Sahitya Parishat Series

(Revised up to April, 1951)

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (out of Stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1-4 ; Re. I. (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshinacharan Bhattacharya. (out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kalipada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. 2 (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshinacharan Bhattacharya. Rs. 2-8 ; out of stock.

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satishchandra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinath Sahityashastri. As. 4.

(Cont. to Cover 3rd Page)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

Vol. XXXVII. No. 5. | १८७६-शकीये भाद्रे ३७श-वर्षस्य ५म-संख्या | September 1954.

मतिमञ्जरी ।

अगस्त्य-महिमा ।

[निबन्धकः—श्रीयादवेन्द्रनाथ-राय-न्यायतर्कतीर्थः]

दधीचिकर्णादीनां त्यागमहिमा कीर्त्तितः कोविदैः । यः खलु जगदुपकृतये जन्मभुवं विहाय "अद्यापि दक्षिणाद्देशाद् वारुणिर्न निवर्तते" ; (महा-वन) यश्च—

"सत्कर्मयोग्यो न जनो नैवापः शुद्धिकारणम् ।
यस्मिन्नुदिते तस्मै नमो देवाय भास्वते ॥"

इति वचनपरिगृहीतस्य भास्वत उदयकारणम् अपां शुद्धिकारणञ्च ; यस्यैतादृशीं यात्रामनुस्मृत्य वयं भाद्रमासस्य प्रथमे दिवसेऽगस्त्ययात्रेति कृत्वा न गृहाद् निर्यामः ; यदा कालेयादयो राक्षसाः

"ते वृत्रं निहतं दृष्ट्वा सहस्राक्षेण धीमता ।
जीवितं परिरक्षन्तः प्रविष्टा वरुणालयम्" ॥ (महा-वन-१०३ अः)

तदा सर्वेदानवारिभिः

"अगस्त्येन विना को हि शक्तोऽन्योऽर्णवभक्षणे ।
अन्यथा हि न शक्यास्ते विना सागरशोषणम् ॥ (१०४ अः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
इत्येवमभिमन्त्र्य समभ्यर्थितो योऽगस्त्य :—

"अहं हि लोकहितार्थं पिबामि वरुणालयम् ॥"

इत्युक्त्वा समुद्रोदकं निपीय लोकं रक्षितवान् तस्य सर्वजगत्कल्याण-सम्पादकस्य महात्मनोऽगस्त्यस्य नामापि न स्मरामोऽस्मिन् भाद्रे मासे। यद्यपि भाद्रमासीयप्रथमदिवसेऽगस्त्यो दक्षिणां दिशं गतवानिति न समुपलभ्यते तथाप्यस्मिन् मासि तस्यार्घ्यदानादिविधानं दृश्यते। यस्य च

"अप्राप्ते भास्करे कन्यां शेषभूतैस्त्रिभिर्दिनैः।

अर्घ्यं दद्युरगस्त्याय गौड़देशनिवासिनः ॥" (तिथितत्त्वधृतब्रह्मवैः)

इत्यनेनार्घ्यदानविधिः

"यस्तु भाद्रपदस्यान्ते उदिते कलसोद्भवे।

अर्घ्यं दद्यादगस्त्याय सर्वान् कामान् लभेत सः" ॥ (भीमपरा)

इत्यर्घ्यदाने सर्वकामनावाप्तिफलञ्च श्रूयते तस्य माहात्म्यसंकीर्तनद्वारा पूजनमवश्यकर्तव्यम्। ब्रह्मवैवर्तपुराणीयवचने "गौड़देशनिवासिनः' इति पाठो न समीचीनतया प्रतिभाति होलाकाधिकरणन्यायविरोधात् भीमपराक्रमीयवचने "यस्तु" इति सामान्यतो निर्देशाच्च। अर्घ्यदानमन्त्रे :—

"काशपुष्पप्रतीकाश अग्निमारुतसम्भव।

मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ॥"

इति यन्मित्रावरुणयोः पुत्रत्वेनोल्लेखो दृश्यते, यद्यपि तन्न श्रीमद्भागवत-विष्णुपुराणादावुल्लिखितं तथापि ऋग्वेदीयसायणाचार्य्यव्याख्यानधृतबृहत-संहितावचनप्रामाण्यात् तदित्येवावगन्तव्यम् :—

तथाहि तयोरादित्ययोः सत्रे दृष्ट्वाप्सरसमुर्वशीम्।

रेतश्चस्कन्द ततकुम्भे न्यपतद्वासतीवरे ॥

तेनैव तु मुहूर्तेन वीर्यवन्तौ तपस्विनौ।

अगस्त्यश्च वशिष्ठश्च तत्रर्षी सम्बभूवतुः ॥" इति।

सदैव लोकहिताय व्रजताप्यनेन पितृपूर्वाणां विषादकारणं विज्ञाय तदुत्तरकाले पिण्डोदकादिप्रतिपत्त्यर्थं विदर्भराजदुहितापरूपरूपलावण्यवती

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
लोपामुद्रा गृहीता भार्य्यात्वेन। तयोस्तु "इध्मनां भारमाजह्रे इध्मवाहस्ततोऽभवदितीध्मवाहो नाम पुत्रः समजनि।

"अस्मिन्नगस्त्यप्रमुखा प्रदेशे भूयांस उद्गीथविदो वसन्ति।
तेभ्योऽधिगन्तुं निगमान्तविद्यां वाल्मीकिपार्श्वादिह पर्यटामि।"

इत्युत्तररामचरिते आत्रेय्या उक्तिदर्शनात "दक्षिणेन महाञ्छ्रीमानगस्त्यभ्रातुराश्रमः" (अरण्य-११।३७) इत्यादिना सुतीक्ष्णमुनिना रामचन्द्रस्य मार्गप्रदर्शनदर्शनाच्च दण्डकारण्येऽस्याश्रमपदमासीदिति प्रतीयते। महाभारते गयासन्निधानेऽगस्त्याश्रमपदवर्णना दृश्यते। तद् बहुत्रास्याश्रमा आसन्निति निर्णये न कापि क्षतिः। अयं खलु रामचन्द्राय वैष्णवं धनुः, ब्रह्मदत्तं शरम्, अक्षयं तूणीरं, खड्गं च दत्तवान्। एवं पराक्रान्तोऽपि स नहुषस्य राज्ञः शिविकामवाहयत्। कदाचिच्छिबिकारोहणकाले नहुषपादस्पर्शेन क्रुद्धोऽगस्त्यो नहुषं सर्पमकारयत्। यतोऽयं विन्ध्यगिरेर्दर्पहरणाय विन्ध्यगुरुः "निवृत्ते मयि शैलेन्द्र ततो वर्द्धस्व कामतः।" इत्युक्त्वा दक्षिणां दिशमाश्रित्याद्यापि नक्षत्ररूपेण विराजतेऽतो दाक्षिणात्या द्रविड़सभ्यताया अयमेव प्रवर्त्तक इति व्याजहुः। द्रविड़ा अस्मादेव वेदादिशास्त्राण्यधीतवन्त इति तत्रत्यानां धारणा।

अधुना अस्यानन्तमहिम्न एकं महिमानं स्मृत्वा विरमामः। कदाचिदीप्सितार्थप्राप्त्यर्थमगस्त्य इल्वलस्य दानवराजस्य भवनं गत इल्वलेन मृगरूपधारिणो भ्रातुर्वातापेर्मांसं भोजितः। भुक्तो वातापिर्नियतमेव जठरं विदार्य बहिरागच्छति तदानीं तु मुनिवरेण भक्षितो जीर्णश्च। ततो दानवराजो भीत्यास्येप्सितं प्रपूरितवान। तामेवाख्यायिकां मुख्यरूपेणादायागस्त्यस्य प्रार्थनं यत शास्त्रकृद्भिर्गीतम् तेनैव मन्त्रेण वयमपि तस्मै महामहर्षये नमः कुर्म—

आतापिर्भक्षितो येन वातापिश्च महासुरः।
समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीश्रीकृष्ण-प्रार्थना

निबन्धकः—श्रीघनश्याम-वेदान्ततीर्थः ।

भूमि-भार-हरणाय निर्ज्जरैः प्रार्थितं जगदधीश्वरं हरिं ।
देवकी-जठर-सम्भवं शिशुं वासुदेव-मखिलाश्रयं श्रये ॥१॥
दुष्ट-दैत्य-विनिपात-हेतवे यः श्रितो नरवपुर्यदोः कुले ।
ज्ञातमाथुर-परिस्थितिः स्वयं नन्दमन्दिरगतोऽभिवर्द्धितः ॥२॥
यस्य नाम समुदीरितं भवे सर्वमेव हि भयं समूलतः ।
हन्ति मानवचयस्य दानवाद् भीत एव स कथं गृहं जहौ ॥३॥
नैव विद्म इह कारणं विभो ! मायया हतधियो वयञ्च ते ।
देहि देव करुणाकणां यया शक्नुमो निखिलतत्त्वनिर्णये ॥४॥
पूर्वजन्मकृतसाधुकर्मभिः स्याज्जनो धन-सुसेमुषीयुतः ।
विश्वतत्त्व-निचयोपलब्धये नास्ति किञ्चि-दपि ते कृपां विना ॥५॥
ज्ञायते सकलमेव नश्वरं किन्तु तत्र भवति स्थिरा मतिः ।
को नियोजयति कुत्र केन वा नैव निश्चिततया प्रतीयते ॥६॥
पुत्र-दार-परि-पोषणेच्छया चेन्द्रियैर्विषयभोगलिप्सया ।
धावताविरतमर्थचिन्तया शान्तिरत्र न च दृश्यते मया ॥७॥
तन्यते रिपुगणैरथोद्धता वृत्तिरत्र सततं गरीयसी ।
निग्रहे किमपि नास्ति साधनं विग्रहस्य तव पूजनं विना ॥८॥
गोपबालकयुतं सुरैर्नुतं कंसवंशनिधने समुद्यतं ।
सन्ततं विविधखेलने रतं तं भजामि वनमाल्यभूषितं ॥९॥
वर्जिताखिलसुसाधनो घनश्याम एष यमभीतिविह्वलः ।
अर्च्चनाद्यकुशलोऽतिदुर्बलश्चाश्रयत्यभयदं पदं तव ॥१०॥
शास्त्रगर्हितकुमार्गधाविनं नित्यमिन्द्रियगणं नियच्छ भोः ! ।
संप्रयच्छ सुमतिं मया यया सर्वकामदपदं समाप्यते ॥११॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भक्तिर्न गोविन्दपदारविन्दयोः
शक्तिर्न तत्पूजनवस्तुसंग्रहे ।
आसक्तिरस्याश्च न याति संसृतेः
मुक्तिः कुतः स्यादिति शंक्यते सदा ॥१२॥
हरे ! न जाने तव पूजनक्रमं
जपेऽपि नाम्नो न सुनिश्चलं मनः ।
नचापि वित्तं घृतदुग्धसंग्रहे
नेत्राम्बुसिक्ता तुलसीह केवलं ॥१३॥
वंशीवाद्यैः सुमधुर-रस-स्यन्दिभिर्गोपनारी-
चित्तं दूरादहरदभितः सूर्यपुत्रीतटस्थः ।
यः श्रीकृष्णस्तमहमनिशं तापतप्तः स्मरामि
त्रायस्वेमं मरणसमये निर्दयात् सूर्यपुत्रात् ॥१४॥

श्रीकृष्णाष्टमी

निबन्धकः—श्रीदुर्गादासगोस्वामी, एम,ए, काव्य-व्याकरणतीर्थ-साहित्यशास्त्री

सन्त्रस्तानां दिशि दिशि मुहुः क्रोशतामार्त्तनादै-
र्जातोतकम्पासन इह भुवो भारमुद्धर्त्तुकामः ।
आविर्भूतः सपदि भगवान् वासुदेवः स कृष्ण-
स्तीर्थीकृत्य स्वचरणरजःस्रंसतः कंसकाराम् ॥१॥
कृष्णाष्टम्यां हरिगतरवो मेघनिर्घोषवत्यां
झञ्झावर्षाशनिशततडिद्भीषणायां निशायाम् ।
जातो हन्त ! त्रिभुवनपतिर्देवकीगर्भतः स
क्षुब्धस्याब्धेरुदरकुहराद् ग्लौरिव श्रीनिवासः ॥२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धीरापीनविगर्णयनः प्रस्थितस्याभिनन्द
कालिन्दीं तां तमसि तरतो मायया स्वल्पतोयाम् ।
अग्रे यान्त्या पयसि शिवयोर्हिष्टमार्गस्य तात-
स्याङ्काद् भ्रष्टो व्यलसदसकृच्छेषनागातपत्रः ॥३॥
हत्वा भीमामशुभपिशुनां पूतनां बालहन्त्री-
मन्यांश्चापि प्रबलतमसः कंसचैद्यादिदैत्यान् ।
पश्चाद्गोपीगणपरिवृतो यामुने सैकताङ्के
रेमे वृन्दावनपरिसरे राधिकाप्रेमनिघ्नः ॥४॥
विन्यस्यौष्ठाधरपुटयुगे वेणुमापूर्य नादं
नानारन्ध्रोत्थितमपि कलाव्यक्तसङ्केतवन्तम् ।
वाञ्छाकल्पद्रुम इह महान् भक्तवृन्दारकाणां
रेजे सर्वानपि खलु पशूनाभिमुख्येन कर्षन् ॥५॥
हित्वा गोपीनयनसलिलैराप्लुतं नष्टशोभं
वृन्दारण्यं भृशमशरणं खण्डितानन्दकन्दम् ।
राधाञ्चापि प्रणयविधुरां माथुरीमात्मलीलां
तेने मुग्धः किल हलधरस्यानुजः कुब्जया सः ॥६॥
द्वारावत्यां निजपरिजनैर्यादवैः सार्द्धमासी-
द्राष्ट्रस्यद्धेन नियतनिरतः कूटनीतिप्रवीणः ।
खिन्नश्चान्तः पुरयुवतिभीरुक्मिणीसत्यभामा-
मिश्राभिः स प्रणयरसिकः प्रेयसीभिर्विजह्रे ॥७॥
धर्मग्लानिं प्रतिदिशमहो ! जृम्भितां भारतेऽस्मिन्
वर्षे गीताप्रवरपुरुषो वीक्ष्य संविग्नचित्तः ।
कौरुक्षेत्रे महति समरे घातयित्वा स पापान्
नीत्वा धर्मं निजपदमथो सञ्जहार स्वलीलाम् ॥८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

छन्दोगक्रियासारः

[निबन्धकः—श्रीरमणीकान्तसिद्धान्तरत्नः]

(पूर्वानुवृत्तम्)

यथा पवित्रं, सम्मार्जनकुशाः षट्, आस्तरणार्थमुपस्कन्दलूनाः कुशा-बर्हिः षट्त्रिंशतः, उपयमनकुशास्त्रयोदश, समिधः, इध्माः (विंशति काष्ठिकाः (आज्यस्थाली, आज्यं, जलपूर्णपात्रं स्रुक् यथाकर्म अन्यानि द्रव्याणि। ततः सव्यहस्तप्रादेशं वह्निस्थापनपर्यन्तं भूमौ निधाय (*) कुशेन रेखां कुर्यात। यथा स्थण्डिलदक्षिणप्रान्ते दक्षिणहस्तानामिकाङ्गुष्ठेन गृहीतकुशेन यजमानस्याङ्गुष्ठपरिमितद्वादशाङ्गुलप्रमाणां (‡) प्राङ्मुखीं रेखामुल्लिख्य रेखेयं पृथ्वीदेवताका पीतवर्णा इति ध्यायेत्। (क)

(*) सव्यं भूमौ प्रतिष्ठाप्य प्रोल्लिखेद्दक्षिणेन तु।
तावन्नोहापयेत् पाणिं यावदग्निं निधापयेत्॥ इति गृह्यासंग्रहः।

(‡) मानक्रियायामुक्तायामनुक्ते मानकर्त्तरि।
मानकृद् यजमानः स्याद् विदुषामेष निर्णयः॥ कर्मप्रदीपः।

(क) "अनुगुप्ता अप आहृत्य प्रागुदक्प्लवनं देश ७समं वा परिसमूह्योपलिप्य, मध्यतः प्राचीं रेखामुल्लिख्योदीचीञ्च स७हर्ता पश्चात्. मध्ये प्राचीस्तिस्र उल्लिख्याभ्युक्षयेत्"॥ इति गृह्यसूत्रं प्राक् प्रदर्शितम्। कात्यायनोऽप्याह,—लक्षणे प्राग् गतायास्तु प्रमाणं द्वादशाङ्गुलम्। तन्मूललग्ना चोदीची तस्या एव नवोत्तरम्। उदग्-गतायाः संलग्नाः शेषाः प्रादेशमात्रिकाः। सप्तसप्ताङ्गुलं त्यक्त्वा कुशेनैव समुल्लिखेत्॥ इति प्रदीपः।

"पार्थिवी पीतवर्णा स्यादाग्नेयी लोहिता भवेत्।
प्राजापत्या भवेत् कृष्णा नीला चैन्द्री प्रकीर्त्तिता॥
श्वेतवर्णा च सौमी स्याद् रेखानां वर्णलक्षणम्।
एष लेखविधिः प्रोक्तो गृह्याकर्मसु सर्वसु (?)॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ष्मास्ता ऋजवः कार्या लेखास्ताः सुसमाहिताः ।

एतानि तत्त्वतो ज्ञात्वा गृह्या कर्माणि कारयेत् ॥ इति गृह्यसंग्रहोक्तः

प्रकार एव रेखादैवतवर्णयोर्ग्रहीतव्यस्तत्रैव तदभिधानात् । प्रकारान्तरमपि तत्राह,—"लक्षणं तत् प्रवक्ष्यामि प्रमाणं दैवतञ्च यत् ।"

इत्युपक्रम्य—प्राक्कृता पार्थिवी रेखा आग्नेयी चाप्युदक् स्मृता। प्राजापत्या च ऐन्द्री च सौमी च प्राक् कृता स्मृता। पार्थिवी चैव सौमी च रेखे द्वे द्वादशाङ्गुले। एकविंशतिराग्नेयी प्रादेशिन्या उभे स्मृते। षडङ्गुलान्तराः कार्या आग्नेयी संहितास्तु ताः। पार्थिवायास्तु रेखायास्तिस्रस्ता उत्तरोत्तराः। इति द्वयोरेव स्वशास्त्रत्वादनयोः प्रकारयोर्विकल्पो बोद्धव्यः।

(क्रमशः)

श्रीचैतन्यचरितामृतसंस्कृतानुवादः

(पूर्वतोऽनुवृत्तः)

अनुवादकः—श्रीभास्करानन्दस्वामी।

श्रीश्रीचैतन्यचरितामृत आदिलीलायां

षष्ठः परिच्छेदः

ज्येष्ठत्वेन प्रभुज्ञानमंशिनि स्यात् स्वभावतः ।
कनिष्ठत्वेन सर्वेषां तद्भक्तमान्यता भवेत ॥
श्रीकृष्णसमतालाभाच्छ्रेयो भक्तपदापनम् ।
कृष्णस्य स्वात्मनोऽपि स्याद्भक्तः प्रेमास्पदं परम् ॥
आत्मनो मन्यते कृष्णो निजभक्तं महत्तरम् ।
श्रूयन्ते शास्त्रवाक्यानि प्रमाणानीह भूरिशः ॥

"तथाहि श्रीमद्भागवत एकादशस्कन्धे चतुर्दशाध्याये चतुर्दशश्लोक उद्धवं प्रति श्रीकृष्णवाक्यम्—

न तथा मे प्रियतम आत्मयोनिर्न शङ्करः ।
न च सङ्कर्षणो न श्रीर्नैवात्मा च यथा भवान् ॥१३॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साम्यलाभेऽपि कृष्णस्य नास्वाद्या तस्य माधुरी ।
एकेन भक्तभावेन तन्माधुर्य्यं सुचर्व्यते ॥
अयं शास्त्रेषु सिद्धान्तोऽनुभवो महतां तथा ।
मूढ़ा नैव विजानन्ति भावानां वैभवं परम् ॥
स्वीकृत्य भक्तभावं स्वं बलरामश्च लक्ष्मणः ।
नित्यानन्दस्तथाद्वैतः शेषः सङ्कर्षणस्तथा ॥
कृष्णस्य रसमाधुर्यामृतधारां पपुश्च ते ।
सर्वे ते तत्सुखोन्मत्ता नाविदन् किञ्चनापरम् ॥
अस्त्वन्येषां कथा दूरे स्वयं कृष्णोऽपि तृष्णया ।
आत्ममाधुर्य्यपानार्थं वर्त्तते व्याकुलान्तरः ॥
यतते स स्वमाधुर्य्यास्वादनायैव सर्वदा ।
भक्तभावं विना तस्य तदास्वादस्तु नाभवत् ॥
भक्तभावमुरीकृत्य तत् स्वयं सोऽवतीर्णवान् ।
कृष्णचैतन्यरूपेण सर्वभावभृतान्तरः ॥
विविधैर्भक्तभावैश्च स्वमाधुर्य्यं स पीतवान् ।
व्याख्यात एष सिद्धान्तः पूर्वमेव मया बहु ॥
भक्तभावेऽवताराणामधिकारः स्वभावतः ।
विद्यते नापरं किञ्चिद् भक्तभावाधिकं सुखम् ॥
मूलं भक्तावताराणां श्रीमत्सङ्कर्षणः प्रभुः ।
अतो भक्तावतारोऽहमद्वैतः परिगण्यते ॥
अद्वैताचार्य्यगोस्वामी महामहिमसागरः ।
येन गम्भीरहुङ्कारैः श्रीचैतन्योऽवतारितः ॥
सङ्कीर्त्तनप्रचारेण कृतवान् विश्वतारणम् ।
अद्वैतस्य प्रसादेन प्राप्ताः प्रेमधनं जनाः ॥
अनन्तं तस्य माहात्म्यं को वा वर्णयितुं क्षमः ।
महाजनमुखाच्छ्रुत्वा तत्तथैव लिखाम्यहम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोटिः सन्तु नमस्कारा आचार्य्यस्य पदे मम ।
अनेन योऽपराधो मे जातस्तं क्षमतां प्रभुः ॥
कोटिसागरसङ्काश आचार्य महिमा तव ।
तस्य वर्णयतेयत्तामपराद्धं मया महत् ॥
श्रीमानद्वैत आचार्य्यो जयताज्जयतात्तमाम् ।
जयतां कृष्णचैतन्य-नित्यानन्दौ महाप्रभू ॥
श्लोकाभ्यां कृतमद्वैतस्वरूपस्य निरूपणम् ।
पञ्चतत्त्वविचारोऽयं भक्तैराकर्ण्यतामतः ॥
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स कृष्णदास आह श्रीचैतन्यचरितामृतम् ॥

इति श्रीचैतन्यचरितामृत आदिखण्डे श्रीमदद्वैततत्त्वनिरूपणं
नाम षष्ठः परिच्छेदः ।

श्रीचैतन्यचरितामृत आदिलीलायां

सप्तमः परिच्छेदः

"अगत्येकगतिं नत्वा हीनार्थाधिकसाधकम् ।
श्रीचैतन्यं लिख्यतेऽस्य भक्तिप्रेमवदान्यता" ॥१॥
जयतात् कृष्णचैतन्यो जयतात् स महाप्रभुः ।
त एव भुवने धन्या ये तच्चरणमाश्रिताः ॥
आदौ गुर्वादिषट्तत्त्वनमस्कारपुरःसरम् ।
मयोक्तं गुरुतत्त्वं तच्छ्रूयतां पञ्चकं परम् ॥
चैतन्येनावतीर्णानि पञ्चतत्त्वानि सर्वशः ।
मिलित्वा तानि सानन्दमकुर्वन्नामकीर्त्तनम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्तुतस्तु न भिन्नं तद् वस्त्वेकं पञ्चतत्त्वकम् ।
रसस्यास्वादनायैव यद्भेदा विविधाः किल ॥

"तथाहि श्रीरूपगोस्वामिकड़चायाम्—

पञ्चतत्त्वात्मकं कृष्णं भक्तरूपस्वरूपकम् ।
भक्तावतारं भक्ताख्यं नमामि भक्तशक्तिकम्" ॥२॥
एक एवेश्वरः कृष्णः स एव भगवान् स्वयम् ।
नन्दात्मजोऽद्वितीयोऽसौ रसिकानां शिरोमणिः ॥
रासादिकविलासो श्रीनागरो व्रजयोषिताम् ।
अपरे ये च दृश्यन्ते सर्वे परिकरा मताः ॥
कृष्ण एवावतीर्णोऽसौ कृष्णचैतन्यरूपतः ।
तैः कृतार्थात्मभिः सर्वैर्निजैः परिकरैः सह ॥
एकमेवेश्वरं तत्त्वं कृष्णचैतन्य ईश्वरः ।
भक्तभावमयं तस्य सुविशुद्धं कलेवरम् ॥
अहो कृष्णस्य माधुर्याः प्रकृतिर्वेत्तेतेऽद्भुता ।
आस्वादयितुमात्मानं भक्तभावं करोति सः ॥
भक्तभावं हि चैतन्यः स्वीकरोत्यत एव सः ।
नित्यानन्दोऽनुजस्तन्यस्तस्य भक्तस्वरूपता ॥१०॥
तस्य भक्तावतारोऽयमद्वैताचार्य एव च ।
एतत्तत्त्वत्रयं सर्वैर्गीयते प्रभुशब्दतः ॥
एको महाप्रभुर्ज्ञेयोऽपरौ द्वौ भवतः प्रभू ।
उभौ प्रभू च सेवेते चरणं श्रीमहाप्रभोः ॥
एतत्तत्त्वत्रयं सर्वैराराध्यमिति मन्यते ।
भक्ततत्त्वं चतुर्थं यज्ज्ञेयमाराधकं हि तत् ॥
श्रीवासाद्याश्च यावन्ता भक्ता ये कोटिकोटिशः ।
विशुद्धभक्ततत्त्वेषु गण्यन्ते सर्व एव ते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभोः शक्त्यवतारा ये श्रीमद् गदाधरादयः ।
तस्यान्तरङ्गभक्तास्ते गण्यन्ते सकला अपि ॥
यान् सर्वान् सममादाय नित्यं विहरति प्रभुः ।
प्रचारयति यैः सर्वैर्नामसङ्कीर्त्तनं महत् ॥
साहचर्येण येषां स प्रेमास्वादयति स्वयम् ।
यद्द्वारेणैव जीवेभ्यो दत्ते प्रेमधनं निजम् ॥
तैस्तस्य पञ्चभिस्तत्त्वैर्मिलित्वागत्य चावनिम् ।
प्राचीनप्रेमभाण्डारान्मुद्रामुत्पाटयन्नसौ ॥
मिलितैः पञ्चभिः सार्द्धं लुठन् प्रेमामृतं महत् ।
पिबत्यास्वादयन् यावत्तावती वर्द्धते तृषा ॥
ते भवन्ति महामत्ताः पायं पायं मदार्त्तवत् ।
कृष्णं गायन्ति नृत्यन्ति क्रन्दन्त्यथो हसन्ति च ॥२०॥
पात्रापात्रविचारं वा स्थानास्थानविवेचनम् ।
अकृत्वा ददति प्रेम यथा प्राप्ताय ते मुदा ॥
लुठित्वास्वाद्य दत्त्वा च भाण्डारं तैरुदच्यते ।
भाण्डारश्चाद्भुतं प्रेम शतशो वर्द्धतेऽनिशम् ॥
प्रेमवन्याकृतोच्छ्वासा परिभ्राम्यति सर्वशः ।
स्त्रीवृद्धयुवबालांश्च सर्वान्मज्जयति द्रुतम् ॥
दुर्जनान् सुजनान् पङ्गूञ्जडानन्धाञ्जगज्जनान् ।
प्रेमवन्या समस्तांस्तान् निमज्जयति सर्वदा ॥
दृष्ट्वा मग्नं जगज्जीववीजानाञ्च विनाशनम् ।
तान्येव पञ्चतत्त्वानि सोल्लासानि भवन्ति च ॥
यावन्ति प्रेमवारीणि वर्षन्ति पञ्च ते जनाः ।
तावत् प्रवर्द्धते वन्या जगद्व्याप्नुवती तदा ॥
मायावादिक्रियानिष्ठकुतार्किकजनास्तथा ।
पाषण्डिनोऽधमच्छात्रा निन्दुकाश्च तथाविधाः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेऽपि सर्वे महादक्षाः पलायन्ते च सत्वरम् ।
प्रेमवन्या न शक्नोति संस्प्रष्टुं तान् कथञ्चन ॥
महाप्रभुस्तदालोक्य विचारयति चेतसा ।
मया मज्जयितुं विश्वं चेष्टितं प्रेमवन्यया ॥
केचित् परिहृतास्तेन प्रतिज्ञा मे च्युतिं गता ।
सर्वेषां मज्जनायैव रचयिष्यामि कौशलम् ॥३०॥
इत्येवं बहुधान्यच्च ध्यात्वा निर्द्धारयन प्रभुः ।
ततोऽङ्गीकुरुते पूज्यं सन्न्यासाश्रममन्तिमम् ॥
चतुर्विंशतिमब्दान् स न्यधितिष्ठन् गृहाश्रमम् ।
पञ्चविंशतिवर्षीणो यतिधर्मं समाश्रितः ॥
एवं गृहीतसन्न्यासो हेलयाकृष्टवान प्रभुः ।
पूर्वं पलायितान सर्वांस्तार्किकादींश्च तावतः ॥
छात्राः पाषण्डिनः कर्ममार्गिणो निन्दकादयः ।
सर्वे स्वयं समागत्य प्रणेमुः प्रभुपादयोः ॥
संशोधितापराधास्ते मग्नास्ततप्रेमवारिणि ।
प्रभोः प्रेममहाजालं परिहर्त्तुं क ईशते ॥
प्रभुः कृपावतारोऽभूत सर्वनिस्तारणाय हि ।
सर्वानेव समुद्धर्त्तुं कृतवांश्चातुरीं पराम् ॥
मायावादिनमेकन्तु काशीस्थं पण्डितं विना ।
निजभक्तांश्चकारासौ सर्वान्म्लेच्छादिकानपि ॥
काश्यामासीत प्रभुर्जातु यास्यन वृन्दावनं प्रति ।
मायावादिगणाः सर्वे निनिन्दुस्तमनेकधा ॥
सन्न्यासी कुरुते गानं निर्लज्ज इव नृत्यति ।
अनधीत्य च वेदान्तान विधत्ते नामकीर्त्तनम् ।
स्वधर्मं मूर्खसन्न्यासी नायं जानाति कञ्चन ।
स्वयं भावभराविष्टः सार्द्धं भ्राम्यति भावकैः ४०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्येवं गर्हणं श्रुत्वा प्रभुर्हास्याकुलोऽभवत् ।
उपेक्षमाण एवैतान्न किञ्चित् समभाषत ॥
उपेक्ष्यैव स तान् सर्वान्मथुरानगरीं गतः ।
दृष्ट्वा माथुरसौन्दर्यं काशीं प्रत्यागतः पुनः ॥
तत्रासील्लेखकः शूद्रो नाम्ना श्रीचन्द्रशेखरः ।
काश्यां तद्गृहमध्यास्त स्वतन्त्रः प्रभुरीश्वरः ॥
गृहे तपनमिश्रस्य स भिक्षां निरवर्तयत् ।
सन्न्यासिगणभिक्षार्थमाहूतोऽपि न सोऽगमत् ॥
श्रीसनातनगोस्वामी तत्रैव मिलितस्तदा ।
प्रभुस्तस्यैव शिक्षार्थं द्वौ मासौ प्रत्यपालयत् ॥
यावन्ति गूढमर्माणि श्रीमद्भागवतादिषु ।
सर्वान् वैष्णवधर्मांश्च स तं सम्यगशिक्षयत् ॥
ततस्तपनमिश्रश्च चन्द्रशेखर एकदा ।
दुःखितौ प्रभुमादाय कृतवन्तौ निवेदनम् ॥
कियन्त्याकर्णयिष्यावो निन्दनानि प्रभो तव ।
पुनः सोढुं न शक्ष्यावस्त्यक्ष्यावो जीवितं खलु ॥
अत्र सन्न्यासिनः सर्वे त्वां विनिन्दन्ति सर्वदा ।
हृदयश्रवणच्छेदि वचः श्रोतुं न शक्नुवः ॥
इत्याकर्ण्य वचो देवे स्मयमान-मुखाम्बुजे ।
ब्राह्मणः कश्चिदागत्य प्रभुणा समगच्छत ॥५०॥
उपासीनः प्रभोः पादौ गृहीत्वासौ न्यवेदयत् ।
त्वामेकं प्रार्थये वस्तु प्रसन्नो देहि मे प्रभो ॥
मया सन्न्यासिनः सर्वे कृताह्वाना ममालयम् ।
आगमिष्यन्ति भिक्षार्थं सकामः स्यां गते त्वयि ॥
ज्ञाने सन्न्यासिगोष्ठीं त्वं कदाचिन्नैव गच्छसि ।
अनुकम्पस्व मे देव स्वीकुरुष्व निमन्त्रणम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदा स्वीकृतवान देवो हसन विप्र-निवेदनम् ।
सन्न्यासिनां दयां कर्त्तुमेषा भङ्गी महाप्रभोः ॥
विप्रोऽजानात् प्रभुर्गेहं न कस्यापि व्रजेदिति ।
तेनैव प्रेरितः सोऽन्तर्निर्बन्धाग्रहमाचरत ॥
दिने निरूपिते तस्मिन प्रभुर्विप्रालयं गतः ।
तत्रासीनमपश्यच्च महत् सन्न्यासिमण्डलम् ॥
विधिवत्तन्नमस्कृत्य प्रक्षाल्यैव निजं पदम् ।
पादावनेजनस्थान एव तूष्णीमुपाविशत ॥
आसीनः कृतवानीषदैश्वर्यस्य प्रकाशनम् ।
धृतवान् कोटिसूर्याभं महातेजोमयं वपुः ॥
ततप्रभावात समाकृष्टमनाः सन्न्यासिनां गणः ।
उदतिष्ठत सपद्येव सन्त्यज्य स्वं स्वमासनम् ॥
प्रकाशानन्दनामैकः सर्वसन्न्यासिसत्तमः ।
ससम्मानमुवाचैवमुपागत्य महाप्रभुम् ॥६०॥
एह्येहि स्वामिपादात्र शृणु स्वागतमस्तु ते ।
किं निषीदस्यमेध्यायां भुवि कस्माद्विषीदसि ॥
प्रत्युवाच प्रभुर्हीनगोष्ठीकोऽस्मि महत्तमाः ।
भवतां परिषन्मध्ये युज्यते न ममासनम् ॥
प्रकाशानन्द आकर्ण्य तदुक्तं प्रश्रयेण तम् ।
गृहीत्वाञ्जलिना हस्ते सभामध्ये न्यषादयत् ॥
सोऽपृच्छद् भगवन कृष्णचैतन्य इति नाम ते ।
भारती-केशवस्यासि शिष्यस्तद् धन्यता तव ॥
अस्माकं समगोष्ठीको वसस्यत्रैव पत्तने ।
न दृष्टिपथमस्माकमायासि केन हेतुना ॥
नृत्यं करोषि गीतञ्च सन्न्यासं श्रितवानपि ।
भावकान सममादाय विधतसे पथि कीर्त्तनम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ध्यानं वेदान्तपाठश्च धर्मं सन्न्यासिनां त्यजन ।
भावप्रवणतामेवं कस्मात्त्वमवलम्बसे ॥
साक्षान्नारायणोऽसीति प्रभावैस्तव बुध्यते ।
आचरस्यधमाचारं कथं तत्कारणं वद ॥
प्रभुः प्रोचे शृणु स्वामिन् भगवंस्तस्य कारणम् ।
मूर्ख इत्यवगत्यैव श्रीगुरुर्मामुपादिशत् ॥
मूर्खस्त्वं ह्यधिकारस्ते वेदान्तेषु न युज्यते ।
सदा श्रीकृष्णमन्त्रं त्वं मन्त्रसारमिमं जप ॥७०॥

(क्रमशः)

सुखदुःखयोः साङ्कर्यम्

कारणगौरवं विविच्यापि परमप्रेमास्पदानां महामान्यानां भारतीय-प्रधानन्यायालयान्यतमन्यायाधीशानां डक्टर-श्रीयुक्त-विजयकुमारमुखोपाध्याय एम, ए, डि, एल महोदयानां सभापतीनां तत्पदत्यागपत्रं दुःख-दुःखेन गृहीतं परिषदेति महान् विषादस्तथापि परममाननीया अशेषविज्ञान-ज्ञानानुशीलनपरिशुद्धमतयः कलिकाताविश्वविद्यालयोपाचार्यपदं सुतराम-लङ्कुर्वाणा महामनीषिणो विविधविरुदविमण्डिता डक्टर-श्रीयुक्तज्ञानचन्द्र-घोषमहोदयाः कृपया रिक्तं तत्पदमलङ्कृतवन्त इति परं प्रमोद-स्थानं परिषत्प्रणयिनां सुधियाम् । एतेषां शुभसङ्गत्या परिषदियं दीनतां जह्यादिति विश्वेश्वरसमीपे प्रार्थना ।

अपि चायमपि महान् प्रमोदो यत महामान्या राज्यपाला डक्टर-श्रीयुक्त-हरेन्द्रकुमारमुखोपाध्यायमहोदया यथाऽस्याः परिषदः पृष्ठपोषकाः सन्ति तथा परमसम्माननीया इमे डक्टर-श्रीयुक्तविजनकुमारमुखोपाध्याय-महोदयाः कारणविशेषेण सभापतिपदं पविहायाप्यस्याः परिषदः पृष्ठ-पोषकपदं समलङ्कुर्वन्तीति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

9. **Introduction to the Rigveda of Sayanacharya**—Edited by Dr. Pashupatinath Shastri, M.A. B.L. Ph. D. Re. 1-8 ; Re. 1-4- (for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. As.14;As. 10 (for members).

11. **Prabhakara-vijayam** of Nandishvara—Edited by Mahamahoadhyaya Anantakrishna Shastri Vedantavisharad and Pt. Ramanath Shastri. Rs. 2-8 ; Rs. 2 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya—Edited by Pt. Bamacharan Kavyatirtha. As 12 ; As 10. (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Prof. Chintaharan Chakravarti, M. A Re 1-8 ; Re. 1-4 (for members).

14. **Nala-damayantiyam** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2-8 ; Rs. 2 (for members).

15. **Prashastapada-bhashyam**—Edited by MM. Kalipada Tarkacharya. Rs. 4 ; Rs. 3. (for members).

16 **Yatratattvam** of Raghunandana Bhattacharya—Edited by Pt. Dwarikanath Nyayashastri. Rs. 2. ; Re. 1-8 (for members).

17. **Rik-pratishakhyam**—Ed. by Dr. Pashupatinath Shastri, M.A., B.L., Ph.D with the assistance of Prof. Chintaharan Chakravarti, M.A. Rs. 5 ; Rs. 4 (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Prof Akshayakumar Shastri. Re. 2 8 ; Rs. 2 (for members).

19. **Chhandogyamantrabhashyam** of Gunavishnu—Ed. by Prof. Durgamohan Bhattacharya, M. A. Rs. 7-8 ; Rs. 6 (for members). out of stock]

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by MM. Kalipada-Tarkacharya. Rs. 7. ; Rs. 6 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Prof. Chintaharan Chakravarti, M.A. Re. 1-4 ; Re. 1 (for members).

22. **Prasanta-ratnakaram** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2 ; Re. 1-8 (for members).

23. **Devisatakam** of Mahamahopadhyaya Krishnanath Sarvabhauma —Ed. by Pt. Janakinath Shastri. As. 12 ; As. 10 (for members).

24. **Sataranja Kutuhalam**:—Ed. by Prof Chintaharan Chakravarti Kavyatirtha M.A., As. 8

25. **Satyanubhavam**:—(a new MahaKavya) of MM. Kalipada Tarkacharya, Rs. 5 ; Rs. 4-8 (for members).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

একমাত্র ধর্ম্মই এই সংসার-সাগরে সমুদ্ধর্ত্তা
এবং তাঁরই মহনীয় বাণী প্রচার করিতেছে
গুপ্তপ্রেশ ডাইরেক্টরী পাঞ্জিকা

উত্তর কলিকাতায়

(দেশবন্ধু পার্কের দক্ষিণ পার্শ্বে)

নবনির্ম্মিত রঙ্গমঞ্চ

সংস্কৃত-সাহিত্য-পরিষদ্-ভবন

১৬৮।১, রাজা দীনেন্দ্র ষ্ট্রীট, কলিকাতা ৪

Printed by Bishnupada Bhattacharya M. A. Kabyatirtha. at Calcutta Oriental Press, Ltd., 9, Panchanan Ghose Lane, Calcutta and Published by the same from Sanskrit Sahitya Parishad, 168/1 Raja Dinendra Street, Shyambazar, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C 1073

Vol. XXXVII. October 1954

No. 6 १८७६-शकीये

३७श-वर्षस्य आश्विने

६ष्ठ संख्या मासे

भारतं भाव भारती

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकौ

श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः

श्रीरामधनशास्त्री काव्य-व्याकरण-पुराणतीर्थश्च

GURUKULA KANGRI 31 DEC 9

संस्कृत-साहित्य-परिषत्
श्यामबाजार, कलिकाता

वार्षिकमूल्यम्—रूप्यकषट्कम् ६।
Foreign price—1-4s

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्किञ्चिदावेदनम्

प्रियपाठकमहाभागाः !

जानन्त्येव भवन्तो यत् परिषदियं कियतः कालात् प्रागात्मप्रतिष्ठायै कलिकाता-पौरसभादत्तं किञ्चित् स्थानमधिगत्य तत्रात्मनो वासगृहं रचयितुमारभ्यापि किञ्चिन्मात्रं निर्मायैव महासमरसम्भूतदौर्मूल्यादिभिः कारणैरर्थाभावेन च महता नारब्धं समापयितुं समर्थेति ।

तत् प्रियतमामिमां परिषदं यदि श्रीमन्तः प्रतिष्ठावतीं प्राणवतीञ्च द्रष्टुमिच्छन्ति, तदा सदयं प्रेषयन्तु यथाशक्ति साहाय्यं वक्ष्यमाणसङ्केतेन परिषत्-प्रणयिन्याः कल्पितप्रासादनिर्माणपरिसमाप्त्यर्थमिति ।

सङ्केतः—संस्कृत-साहित्य-परिषत्-सम्पादकः,
१६८।१, राजा-दीनेन्द्रष्ट्रीट, कलिकाता-४

Sanskrit Sahitya Parishat Series

(Revised up to April, 1951)

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (out of Stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1-4 ; Re. I. (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshinacharan Bhattacharya. (out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kalipada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. 2 (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshinacharan Bhattacharya. Rs. 2-8 ; out of stock.

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satishchandra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinath Sahityashastri. As. 4.

(Cont. to Cover 3rd Page)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

Vol. XXXVII. No. 6. | १८७६-शकीये आश्विने ३७श-वर्षस्य ६ष्ठ-संख्या | October 1954.

मतिमञ्जरी

अकालबोधनम्

[निबन्धकः—श्रीयादवेन्द्रनाथ-राय-न्यायतर्कतीर्थः]

ऐँ रावणस्य वधार्थाय रामस्यानुग्रहाय च ।
अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा ॥

इति मन्त्रलिङ्गाद् दक्षिणायनस्य रात्रित्वेन देवौ सुप्तामाकलय्य सदैव सन्तानमङ्गलाय जागरूकाया अपि जगज्जनन्यास्तस्याः शरदि पूजायाः प्राग् बोधनं कर्तव्यमिति स्मृतीतिहासपुराणडिण्डिमः । सैषा जगज्जननी

"आमोदयुक्तं व्यसनासक्तं जन्तुं करोति या ।
महामायेति सा प्रोक्ता तेन सा जगदीश्वरी ॥
(कालिका पुः ६ष्ठ अः)

इति कदाचिद् महामाया सती,—कदाचिद्वा

"ततश्च सौरिर्भगवत्प्रचोदितः सुतं समादाय स सूतिकागृहात् ।
यदा बहिर्गन्तुमियेष तर्ह्यजा या योगमायाजनि नन्दजायया ॥ इति
(भागवतम् १०म स्कः ३य अः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योगमाया च सती जगत्प्रवृत्तेः कारणं भवति। अजापि जायते। अलं तावदनिर्वाच्याया दुरधिगम्याया वाच्यत्वादिनिरूपणप्रयासेन। यथा तथा वास्तु चैषा—तथाप्यानन्दमयी—जगज्जननी च। अकाले तस्या बोधनमावश्यकम्।

सम्भवति च दक्षिणायनादिक्रमेण विभागः कालस्य। महाकालस्वरूपाया अखण्डाया अजायाः कालादिपरिच्छेदानर्हायाः कथमकाले बोधनम्? कालादिपरिच्छेदे वा कथमनिर्वाच्यता? अतोऽकालोऽस्माकम्। यत्र खलु सा जगज्जनन्यपि जनन्याः स्वरूपं विहाय मायाप्रधाना क्रीड़त्यस्माकं भागधेयेन। कालश्च स एव सार्थको यः कालः "तस्यार्थे यः क्षणो नीत उत्तमश्लोकवार्तया" (श्रीमद्भागवतम्) इत्येवंरूपः कालः। क्षुद्रतमकालोऽपि व्यर्थो—यदि भगवच्चिन्ताभेदभिन्ना सच्चिन्ता न क्रियेतेति क्षणपदेन सूच्यते। अस्मान दुर्नयपरायणान—सद्विमुखानवलोक्य स्नेहमय्यपि सदा जाग्रत्यपि योगनिद्रां समधिगता। सुकरं प्रसुप्ताया अपि बोधनं—जाग्रत्-सुप्ताया बोधनं कथं भवितेति विभावनीयम्। यत आत्मानं देवीरूपं विभाव्यैवास्माभिरर्चना क्रियते,—अत आत्मसंबोधनेनैव तस्या अपि संबोधनं भविष्यतीति नास्ते सन्देहप्रसरः। आत्मसंबोधनञ्च चित्तवैशद्यं विना न सम्भवति। चित्तवैशद्यञ्च—भगवच्चिन्तनं विनानेति महती खल्वनर्थपरम्परा भगवत्पराङ्मुखानामस्माकम्। शरदि—निर्मला दिशः, प्रसन्नास्तरुगुल्मादयः, विशदा चन्द्रिका, सजीवानीव हरिद्वर्णधान्यादिशस्यानीत्येवमादीनि चित्तवैशद्यसामग्र्यन्तर्गतानि सहायकानि। वैदेशिकभावविड़म्बिता वयमधुना पूजायास्तत्त्वमुपहस्य केवलमार्यत्वं हिन्दुत्वं वा प्रकटय्य—सर्वजनसाध्याया अत एव सर्वजनीनाया अपि पूजायाः सार्वजनीनाख्यां विजातीयां शास्त्रविरुद्धां पूजां समाचरामः। न तत्र शान्तिः—समुत्कर्षो वा मनसः, न दैन्यापगमः आनन्दोत्फुल्लता वा शरीरस्य; न तत्त्वावबोधविवृद्धिरात्यन्तिकदुःखनिवृत्तिर्वात्मनः।

तत्त्वतः सुषुम्णाविल्वमूले चिन्मय्या देव्याः कुलकुण्डलिन्याः शास्त्र-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्दिष्टप्रकारेणान्तर्बोधनेनैव मृन्मय्या देव्या दुर्गाया दशभुजाया दशप्रहरणधारिण्या यद्बहिर्विजृम्भणं तदेव तस्या बोधनमित्यार्याणां सुपरिकलितः पन्थाः। आन्तरो भावो बहिः प्रकाशते कृत्यजातैः। इदानीमप्येवं योगिनः केचन सन्तीत्यस्माभिस्तत्प्रभावेण मातुर्बोधनं कृत्वा पूजनं क्रियते। यदि समधिका जना एवं मातुराराधनाय यतेरन् तदा सुतरां जगदिदं सदा सदानन्दमयं भविष्यतीति कः सन्देहः? न चैवमाध्यात्मिकदेवपूजनादिव्यापारेणैव भारतवर्षेण पुरा विनष्टा स्वाधीनतेति वाच्यमाध्यात्मिकबलेनैव भारतवर्षेण प्राक् समधिगतजगद्गुर्वासनत्वात्। न हि शक्तिहीना जातास्ते भारतीयाः। यया शक्त्या स्वर्गस्थिता अपि देवेन्द्रादयो भूतलस्थानां नलदुष्मन्तादीनां राजन्यानां साहाय्यप्रार्थिन आसन्। अधुनाप्यस्माभिरप्येवं लब्धव्या शक्तिर्यया परराष्ट्रतः स्वराष्ट्रस्य संरक्षणं—पृथिव्याः प्राकृतशान्तिस्थापनञ्च कर्त्तुं शक्येते। येषां दशसु दिक्षु दशप्रहरणधारिणी दुर्गा शक्तिसञ्चारिणी जागर्ति—त एवाधुना जागत्यां दुर्बलत्वेन परिगणिताः—करुणापात्रञ्चेति महाक्षोभकारणमस्माकम्।

तन्मिलत मातृभक्ताः! सन्ततं मातृचरणाश्रिताः शक्तेरुद्बोधनाय यतध्वम्। यस्यामुद्बोधितायां प्रसन्नायाञ्च मुक्तिरपि न दुर्लभा, तस्याः सम्यक् समाश्रयणेन न किं बहिर्जगति शक्तिं लब्धुं प्रभवामः? आवश्यकमुद्बोधनं तस्याः शक्तेः। अतः सम्मिलितकातरकण्ठैस्तस्या एव बोधनाय देवानामेव स्तुतिप्रकारेण पुनस्तामेव स्तुमः—

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥
सर्वस्वरूपे! सर्वेशे! सर्वशक्तिसमन्विते!
भयेभ्यस्त्राहि नो देवि! दुर्गे! देवि नमोऽस्तु ते॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषदो वार्षिक-महोत्सवः

[लेखक :—श्रीरामधनशास्त्री]

व्यतीतसौराश्विनस्य प्रथमदिवसे सायं षष्ठहोरायां समवर्त्तत परिषदोऽष्टत्रिंशवार्षिकमहोत्सवः प्रख्यातयशसां विविधभाषाविदुषां विपश्चिद्वर्य्याणां विधानसभासभापतीनां श्रीमतां सुनीतिकुमार-चट्टोपाध्यायमहाभागानामाध्यक्षेण। तत्र महामहोपाध्यायश्रीयुक्तकालीपद-तर्काचार्य्यमहोदयैरतिसुललितसरलसंस्कृतभाषामयभाषणमुखेन परिषदः कर्मपद्धतिमुद्देश्यमितिहासञ्च सामान्यतः समाकलय्य माल्यादिभिः सभापति-वरणे समनुष्ठिते श्रीमता बुद्धदेवचक्रवर्त्तिना स्वसम्प्रदायसहितेन गीतं मधुरमधुरमुद्बोधनसङ्गीतकमेकम्। ततः सभापतिमहाभागानामादेशेन परिषदोऽन्यतमसम्पादकैः श्रीयुक्तविष्णुपदभट्टाचार्य्यमहोदयैर्वाचितं गीर्व्वाण-वाण्यात्मकं परिषदो विगतवर्षीयं कार्य्यजातं संक्षेपतः। तदनन्तरं परिषदध्यापकप्रवरेण श्रीमता रामधनशास्त्रिमहाभागेनापि सभापतेराज्ञया समुद्घोषितानि परिषदो वर्त्तमानवर्षीयकार्य्यनिर्वाहकसमितेः सदस्यानां विभागीयकर्मपरिचालकानाञ्च नामानि। अथैवमवसिते कार्यविवरणादि-प्रकाशनकार्यं पण्डिप्रकाण्डैः श्रीयुक्तश्रीजीवन्न्यायतीर्थपादैः स्वर्गतानां नैयायिकचूडामणीनां धर्मैकपराणां चण्डीचरणतर्कतीर्थमहाभागानां चित्र-प्रतिष्ठापनमभिलक्ष्य महात्मनामेषां गुणावलीर्व्याख्याय चित्रस्यो-न्मोचनाय सादरमाहूताः सभापतिमहाभागाः। सभापतिपादाश्चापि एवमाहूताश्चित्रस्यावरणमुन्मोचितवन्तः। अनन्तरं समागतानां सामाजिक-वर्य्याणां पक्षतः कलिकाताविश्वविद्यालयाध्यापकश्रीमद्-आशुतोष-शास्त्रिभिः पण्डिवर्य्यैः श्रीयुक्तगाङ्गेयनरोत्तमशास्त्रिभिश्च संस्कृत-भाषारक्षणं संस्कृतसाहित्यपरिषदः समुन्नतिञ्चावलम्ब्य संस्कृतभाषया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नातिदीर्घं भाषणं दत्तम्। ततश्च सभापतिमहाभागैर्वङ्गभाषामयाभिभाषण-प्रदानमुखेन संस्कृतभाषां संस्कृतसाहित्यपरिषदं च प्रति गभीरमात्मनः श्रद्धातिशयं प्रकटीकृत्य संस्कृतभाषाया रक्षार्थं सर्व्वेषां प्राणातिपाती यत्नः प्रार्थितः। सभापतेरभिभाषणात् परमध्यापकवर्य्यैः श्रीयुक्तजानकीनाथ-शास्त्रिमहोदयैः सभापतिमहाभागेभ्यो भूयोभूयः साधुवादा वितीर्णाः। ततश्च ससम्प्रदायस्य श्रीमतो बुद्धदेवचक्रवर्त्तिनः समाप्तिसङ्गीतकेन सहैव सभाकार्य्यमवसितम्।

अथ सभावसाने परिषत्सदस्यैरभिनीतमार्य्यक्षेमीश्वरकृतं चण्ड-कौशिकं नाम नाटकम्। यस्याभिनयः सुतरां समतोषयन्मनांसि सामाजिकवर्य्याणाम्। अत्र हि अभिनयांशे विश्वामित्र-हरिश्चन्द्र-विदूषक-रोहिताश्व-शैव्योपाध्याय-वनेचर-चण्डालप्रभृतीनां भूमिकाः सवि-शेषमुल्लेखमर्हन्ति। एवञ्च नाट्यदक्षाणां परिषत्सदस्यानामभिनय-चातुर्य्यं कालेन परिपक्वं सर्वत्र विजयत इति यथार्थत एव गर्वितं नो हृदयम्।

विश्वकवि-रवीन्द्रनाथठाकुरमहोदय-विरचित-"पूजारिणी"-
कविताया अनुवादः

पूजार्थिनी

[अनुवादकः—श्रीधीरेन्द्रनाथकाव्यतीर्थः]

श्रीबिम्बिसारः क्षितिपालसारः
संसारसारं प्रणिपत्य बुद्धम्।
तदीयपादस्य नखाग्रलेशं
संप्रार्थ्य जग्राह स धर्मलिप्सुः ॥१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आरामभूमौ नखरत्नलेशं
सयत्नमाधाय स निर्ममे तत् ।
तस्योपरि स्तूपमनिन्द्यमेकं
शिलामयं शिल्पकलाप्रधानम् ॥२॥
आहृत्य पुष्पाणि नृपस्य बाला
वधूश्च नित्यं स्वयमेत्य तत्र ।
सायं प्रदत्ते शुचिहेमदीपान
प्रज्वाल्य तान काञ्चनभाजनस्थान् ॥३॥
अजातशत्रुः किल शक्तिमत्तः
पित्रासनं प्राप्य नृपो यदाभूत् ।
प्रक्षाल्य रक्तेन पितुः स्वधर्मं
जुहाव शास्त्राण्यपि यागवह्नौ ॥४॥
आकार्य मत्तः स च पौरयोषा
जगाद रोषान्नृपतिः "श्रुतीश्च ।
विप्रश्च भूपश्च विना न कोऽपि
स्तुत्योऽत्र विश्वे, विमतो विपत्तिः" ॥५॥
क्षीणे कदाचिच्छरदुष्णरश्मौ
सा श्रीमती नाम नृपस्य भूत्या ।
स्नात्वाथ तूष्णीं धृतपुष्पदीपा
स्थितैत्य राज्ञीपददत्तदृष्टिः ॥६॥
तां प्रेक्ष्य नम्रां समुवाच कम्प्रा
राज्ञी "स्मृता किं नृपघोषणा न ।
अर्घ्यं हि वेद्यां प्रददन म्रियेत
शूलेन निर्वासनतोऽथवे"ति ॥७॥
श्रुत्वेति वाचो नितरां निराशाः
प्रत्यागता सा महिषीसकाशात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विचिन्तयन्ती जिनपादपद्मं
स्तुषामितासद्म शनैरियाय ॥८॥
आसीत्तदा राजवधूः पुरस्तात्
सौवर्णमादर्शमसौ निधाय ।
सुदीर्घवेणीं विरचय्य यत्नात्
सिन्दूरबिन्दून् दधती निषण्णा ॥९॥
दास्यागमालोक-करप्रकम्पात्
सिन्दूररेखाऽनृजुतामवाप ।
ब्रूतेऽथ "मूढे कथमाश्रितैवं
धृष्टिर्व्रज द्राग् विपदन्यथा स्यात् ॥१०॥
अस्ताचलप्रान्तगतेन-भाता-
वुन्मुक्तवातायनपार्श्वसक्ताम् ।
भृशञ्च काव्याध्ययने निमग्नां
जगाम शुक्लां नृपजां भुजिष्या ॥११॥
श्रुत्वा क्षणं कङ्कणनिक्वणं सा
महीपबाला चकिता बभूव ।
द्वाराग्रभागे च निधाय दृष्टिं
तथाविधां तां सहसा ददर्श ॥१२॥
संस्थाप्य पुस्तीं भुवि चेत्य तूर्णं
तां गूढमूचे श्रुतिमूलगा सा ।
"राज्ञो निदेशं न हि वेद कोऽद्य,
श्लाघ्या गतिः किं प्रति नाशमेवम् ?" ॥१३॥
इत्येवमुक्तापि धृताघ्र्यपात्रा
सेवापरा सा प्रति-गेहमापत् ।
अवोचदाहूय च पौरवामाः
"प्रभोः सपर्या-समयोऽभ्युपेतः ॥१४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हस्तेन रेखाभ्युक्षणं कुर्यात्। (ख) ततः सन्निधापितकांस्यादिपात्रस्थाग्ने "ज्वलदिन्धनं गृहीत्वा (†) प्रजापतिर्ऋषिस्त्रिष्टुप् छन्दोऽग्निर्देवताऽग्नि-संस्कारे विनियोगः ॐ क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः" इत्यनेन दक्षिणस्यां दिशि क्षिपेत् इति स्मार्ताः। ततोऽग्निं गृहीत्वा प्रजापतिर्ऋषिर्बृहतीच्छन्दः प्रजापतिर्देवताऽग्निस्थापने विनियोगः ॐ भूर्भुवः स्वः' इत्यनेनात्माभिमुखं रेखोपरि स्थापयेत्। (ग) ततो वाम-हस्तमुत्तोल्य अञ्जलिं बद्ध्वा पठेत्, प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता-ऽग्निस्थापने विनियोगः ॐ इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् इति स्मार्ताः। यथाकर्म अग्ने त्वममुकनामासि इति अग्नेर्नाम कृत्वा अर्चयेत् (घ)। यत्र यन्नाम तत्र तदभिधीयते (ङ)। अग्नेः सर्वनामानि कीर्तयेत् (च)।

(ख) उत्तानेनैव हस्तेन प्रोक्षणं समुदाहृतम्। न्यञ्चताऽभ्युक्षणं प्रोक्तं तिरश्चावोक्षणं मतम्। इति स्मृतिः

उल्लिख्याभ्युक्षयेदिति शास्त्रम् उत्करग्रहणतन्निधानाभ्यां न बाध्यते, पूर्व-कालता मात्रमभिधत्ते 'क्त्वा' प्रत्यय इति शास्त्रतात्पर्यविदां समयः। शाब्दिका अपि "एककर्तृकयोः पूर्वकाले क्त्वा" इति स्मरन्ति न त्वानन्तर्यम्॥

(†) शुभं पात्रन्तु कांस्यं स्यात् तेनाग्निं प्रणयेद् बुधः।
तस्याभावे शरावेण नवेनाभिमुखञ्च तत्॥ इति गृह्यासंग्रहः।

(ग) भूर्भुवः स्वरित्यभिमुखमग्निं प्रणयन्ति इति गृह्यसूत्रम्।११।१।१

(घ) अग्न्यर्चनमर्थायातम् (ङ) "आहूय चैव होतव्यं यत्र यो विहितोऽ-नलः" इति गृह्यासंग्रहः।

(च) लौकिकः पावको ह्यग्निः प्रथमः परिकीर्तितः।
अग्निस्तु मारुतो नाम गर्भाधाने विधीयते॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीचैतन्यचरितामृतसंस्कृतानुवादः

(पूर्वतोऽनुवृत्तः)

अनुवादकः—श्रीभास्करानन्दस्वामी।

श्रीश्रीचैतन्यचरितामृत आदिलीलायां

सप्तमः परिच्छेदः

अनेन कृष्णमन्त्रेण संसारान्मोक्ष्यसे ध्रुवम्।
लप्स्यसे कृष्णपादाब्जं कृष्णनामप्रभावतः॥
कृष्णनाम विना धर्मोऽपरो नास्ति कलौ युगे।
सारं नामैव मन्त्राणां शास्त्रमर्मविदो विदुः॥
इत्युक्त्वा गुरुपादो मां श्लोकमेकमशिक्षयत।
हृदि सन्धार्य तं श्लोकं विचारयितुमादिशत्॥

"तथाहि बृहन्नारदीयवचनम्—

हरेर्नाम हरेर्नाम हरेर्नामैव केवलम्।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा॥३॥"
तामाज्ञां शिरसादाय नामागृह्णादनुक्षणम्।
तज्जपीगृह्यमाणस्य सञ्जातो मे मतिभ्रमः॥
अक्षमो रक्षितुं धैर्यमुन्मत्तोऽहं ततोऽभवम्।
करोमि क्रन्दनं हास्यं नृत्यं गीतञ्च मत्तवत्॥
कथञ्चिद्धैर्यमालम्ब्य मनसा निश्चितं मया।
कृष्णनाम्नैव नूनं मे सर्वज्ञानं तिरोहितम्॥
सम्प्रत्युन्मद एवास्मि धैर्यं मे नास्ति चेतसि।
इत्येवं चिन्तयन् श्रीमद्गुरवेऽहं न्यवेदयम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरो कमिव मन्त्रं मेऽददास्तस्य बलं कियत् ।
मन्त्रो जाजप्यमानो मां सोन्मादं कृतवानयम् ॥
हासयन् नर्तयत्येष ततोमां रोदयत्यपि ।
इत्याकर्ण्य गुरुर्मह्यं हसन्नेवमवोचत ॥
एवमेव स्वभावो हि कृष्णनाम-महामनोः ।
जपतामेव तन्मन्त्रं भावः कृष्णे प्रजायते ॥८०॥
श्रीकृष्णविषयः प्रेमा पुरुषार्थगणोत्तमः ।
पुरुषार्थाश्च चत्वारस्तृणायन्ते तदग्रतः ॥
पञ्चमः पुरुषार्थोऽयं प्रेमानन्दामृताम्बुधिः ।
मोक्षादिहेतुरानन्दस्तस्य बिन्दुसमोऽपि न ॥
कृष्णनाम्नः फलं प्रेमा सर्वशास्त्रैर्निगद्यते ।
सौभाग्येनैव स प्रेमा साक्षात् समुदितस्तव ॥
प्रेमा चित्ततनुक्षोभं जनयेत्तत्स्वभावतः ।
श्रीकृष्णचरणप्राप्तौ लोभः सञ्जायते ततः ॥
स्वभावेनैव तत्प्रेम्णो भक्तो हसति रोदिति ।
गायत्युन्मत्तवन्नृत्यन्नितश्चेतश्च धावति ॥
स्वेदः कम्पश्च रोमाञ्चा अश्रुवैवर्ण्यगद्गदाः ।
विषादोन्माद-धैर्याणि गर्वो हर्षश्च दीनता ॥
इति भावैश्च स प्रेमा भक्तान्नर्त्तयति ध्रुवम् ।
कृष्णानन्दामृताम्भोधौ तांश्च प्लावयतेऽनिशम् ॥
साधुवृत्तमहो प्राप्तः पुरुषार्थोत्तमस्त्वया ।
एतेनैव तव प्रेम्णा धन्योऽहमपि सर्वथा ॥
नृत्य गाय समं भक्तैः कुरु सङ्कीर्तनं सदा ।
कृष्णनाम्नोपदेशेन निस्तारय जगज्जनान् ॥
इत्येतावदुवदन्नेकं श्लोकं मां गुरुरादिशत् ।
भागवतस्य सारोऽयमित्यवोचत् पुनः पुनः ॥९०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथाहि श्रीमद्भागवते २।४७।३८

एवंव्रतः स्वप्रियनामकीर्त्या
जातानुरागो द्रुतचित्त उच्चैः।
हसत्यथो रोदिति रौति गाय-
त्युन्मादवन्नृत्यति लोकबाह्यः ॥४॥"

इति श्रीगुरुपादोक्तौ श्रद्धा दृढ़तमा मम।
भगवत्कृष्णनामानि कीर्तयामि निरन्तरम् ॥
तत्कृष्णनाम मां जातु गापयेदथ नर्तयेत्।
अहं गायामि नृत्यामि न कदाचिन्निजेच्छया ॥
कृष्णनाम्ना यदानन्द-सिन्धोरास्वादनं भवेत्।
ब्रह्मानन्दोऽपि तस्याग्रे गोस्पदायेत निश्चितम् ॥

"तथाहि हरिभक्तिसुधोदये—

तत्साक्षात्करणाह्लादविशुद्धाब्धिस्थितस्य मे।
सुखानि गोस्पदायन्ते ब्रह्मण्यपि जगद्गुरो ॥५॥"

प्रभोर्मधुरवाक्यानि श्रुत्वा सन्न्यासिनां गणः।
चित्तवृत्तिं परावर्त्य सान्त्ववाक्यमवोचत ॥
यत्किञ्चिद् भगवन्नुक्तं भवता सत्यमेव तत्।
कृष्णप्रेमाप्नुयात सोऽयं यस्य भाग्योदयो भवेत् ॥
कृष्णभक्तिं विधेहि त्वं तुष्टाः सर्वे वयं ततः।
नाकर्णयसि वेदान्तान् कथं किं तेषु दूषणम् ॥
इति तद्वच आकर्ण्य हसन् प्रत्यवदत् प्रभुः।
अप्रियं चेन्न मन्यध्वे तदा किञ्चिन्निवेद्यते ॥
इति श्रुत्वावदन् सर्वे तत्र सन्न्यासिनो मुदा।
त्वां निरीक्षामहे स्वामिन साक्षान्नारायणं यथा ॥
भवद्वचनमाकर्ण्य तृप्यन्ति श्रवणानि नः।
आलोक्य तव माधुर्यं प्रीयन्ते नयनानि च ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभावात्तव सर्वेषामस्माकं नन्दितं मनः ।
अतस्त्वद्वचनं जातु नैव सम्भव्यसङ्गतम् ॥१००॥
प्रभुस्तदाह वेदान्तसूत्रमीश्वरभाषितम् ।
उवाच व्यासरूपेण यच्छ्रीनारायणः स्वयम् ॥
विप्रलिप्सा प्रमादश्च करणापाटवं भ्रमः ।
एते दोषा न चार्हन्ति स्थातुमीश्वरभाषणे ॥
सूत्रैरुपनिषन्मानैर्यत्तत्त्वं सुप्रकाशितम् ।
मुख्यवृत्त्या तदर्थो हि समुत्कृष्टः प्रतीयते ॥
अकरोद् भाष्यमाचार्यो गौणवृत्त्या तु शङ्करः ।
तस्य श्रवणमात्रेण सर्वनाशो भवेद्ध्रुवम् ॥
आचार्यस्य न दोषोऽत्र तं तथेश्वर आदिशत् ।
तेन मुख्यार्थमाच्छाद्य गौणार्थं कृतवानसौ ॥
ब्रह्मशब्दस्य मुख्यार्थो भगवानिति कथ्यते ।
चिदैश्वर्येण सम्पूर्णः सोऽनूर्द्धसम उच्यते ॥
तस्य विभूतयो देहाः सकला एव चिन्मयाः ।
चिद्विभूतीरपह्नुत्य तन्निराकारमौच्यत ॥
चिदानन्दोऽयमेतस्य स्थानं परिकरादयः ।
प्राकृतस्य च सत्त्वस्य विकाराः कथिताः पुनः ॥
तथापि नास्ति दोषोऽस्य भृत्य आज्ञाकरो हि सः ।
यः शृणोति तु तद्वाक्यं तस्य सर्वं विनश्यति ॥
इतोऽधिकतरं किञ्चिन्नास्त्यन्यद् विष्णुनिन्दनम् ।
विष्णोः कलेवरं यत्र प्राकृतं ह्येव मन्यते ॥१०१॥
ईश्वरस्य स्वरूपं हि ज्वलितज्वलनो यथा ।
जीवस्वरूपं तस्यैव स्फुलिङ्गानां कणा इव ॥
जीवतत्त्वं हि शक्तिः स्यात् कृष्णतत्त्वं तु शक्तिमत् ।
गीता-विष्णुपुराणादौ प्रमाणं तस्य विद्यते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"तथाहि भगवद्गीतायाम्—

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥६॥

तथाहि विष्णुपुराणे—६।७।६०

विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथा परा ।
अविद्या कर्मसंज्ञान्या तृतीया शक्तिरुच्यते ॥७॥"

ईदृशं जीवतत्त्वं तद्ब्रह्मतत्त्वं न्यरूप्यत ।
श्रेष्ठं महत्त्वमीशस्य तेनाच्छाद्यत सुस्फुटम् ॥
परिणाम इति व्यासः सूत्रेणैवाश्रितो मतम् ।
तर्कमुत्थाप्य तं भ्रान्तं शङ्करः प्रत्यपादयत् ॥
परिणामस्वीकृतौ तु विकारी भवतोश्वरः ।
इत्युक्त्वा शङ्कराचार्यो विवर्त्तवादमाश्रितः ॥
वस्तुतः परिणामोऽत्र ग्राह्यो मुख्यप्रमाणतः ।
देहादिष्वात्मबुद्धिर्हि विवर्त्तस्थानमुच्यताम् ॥
अचिन्तनीयशक्तिर्यद् भगवान् स्वयमीश्वरः ।
स्वेच्छया विश्वरूपेण परिणामं स विन्दति ॥
तथाप्यचिन्त्यशक्तित्वादविकार्यैव तिष्ठति ।
तस्योदाहरणं चिन्तामणिः प्राकृत ईक्ष्यते ॥
नानारत्नानि जायन्ते यथा चिन्तामणेः स्वतः ।
अविकारी मणिः किन्तु स्वरूपेणैव वर्त्तते ॥
यद्येवं प्राकृतं वस्तु भवेदचिन्त्यशक्तिकम् ।
ईशस्याचिन्त्यशक्तित्वे विद्यते कोऽत्र विस्मयः ॥१०२॥
प्रणवो हि महावाक्यं वेदानां मूलमुच्यते ।
ईश्वरस्य स्वरूपं तत सर्वविश्वाश्रयो हि सः ॥
सर्वाश्रयेश्वरः साक्षात् प्रणवेनैव लक्ष्यते ।
तत्त्वमसीति वाक्यन्तु वेदैकदेशमात्रकम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महावाक्यत्वमाच्छाद्य प्रवणस्य प्रयत्नतः ।
तत्त्वमसीति वाक्यस्य तथात्वं प्रतिपादितम् ॥
वेदवेदान्तसूत्रेषु कृष्ण एवाभिधीयते ।
त्यक्त्वा तामभिधावृत्तिं गृहीता तेन लक्षणा ॥
वेदः स्वतः प्रमाणं स्यात् प्रमाणानां शिरोमणिः ।
लक्षणायां गृहीतायां स्वतः प्रामाण्यमाहतम् ॥
इत्येवं सर्वसूत्राणां सरलार्थं परित्यजन् ।
आचार्यः कल्पयित्वैव गौणमर्थमदर्शयत् ॥
प्रतिसूत्रीयभाष्यस्य दोषमित्थं प्रकाशयन् ।
श्रोतॄन् सन्न्यासिनः सर्वानकरोद् विस्मितान् प्रभुः ॥
प्राहुः सन्न्यासिनः श्रीमत्स्वामिपाद यथा त्वया ।
भाष्यार्थः खण्डितो युक्त्या विवादो नात्र कश्चन ॥
आचार्यकल्पितोऽर्थोऽयमस्माभिरपि बुध्यते ।
सम्प्रदायानुरोधेन तथापि बहु मन्यते ॥
इदानीं मुख्यया वृत्त्या कुरु व्याख्यां यथाबलम् ।
इत्युक्तः प्रभुपादो मे तथा कर्तुं समुद्यतः ॥१०३॥
वस्तु बृहत्तमं ब्रह्म भगवानिति कथ्यते ।
षड्विधैश्वर्यसम्पन्नं परतत्त्वस्य धाम तत् ॥
स्वरूपैश्वर्ययोस्तस्य मायागन्धो न विद्यते ।
वाच्यवाचकसम्बन्धो भगवद्वेदयोर्भवेत् ॥
अर्द्धस्वरूपचिच्छक्तिं न मत्वा ब्रह्मणीश्वरे ।
निर्विशेषे मते तस्य पूर्णता परिहीयते ॥
भगवत्प्राप्त्युपाया ये भक्त्याख्याः श्रवणादयः ।
त एव भगवत्-कृष्णप्राप्तये स्युः सहायकाः ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

9. **Introduction to the Rigveda of Sayanacharya**—Edited by Dr. Pashupatinath Shastri, M.A. B.L. Ph. D. Re. 1-8 ; Re. 1-4- (for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. As.14;As. 10 (for members).

11. **Prabhakara-vijayam** of Nandishvara—Edited by Mahamahoadhyaya Anantakrishna Shastri Vedantavisharad and Pt. Ramanath Shastri. Rs. 2-8 ; Rs. 2 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya—Edited by Pt. Bamacharan Kavyatirtha. As 12 ; As 10. (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Prof. Chintaharan Chakravarti, M. A Re 1-8 ; Re. 1-4 (for members).

14. **Nala-damayantiyam** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2-8 ; Rs. 2 (for members).

15. **Prashastapada-bhashyam**—Edited by MM. Kalipada Tarkacharya. Rs. 4 ; Rs. 3. (for members).

16 **Yatratattvam** of Raghunandana Bhattacharya—Edited by Pt. Dwarikanath Nyayashastri. Rs. 2. ; Re. 1-8 (for members).

17. **Rik-pratishakhyam**—Ed. by Dr. Pashupatinath Shastri, M.A., B.L., Ph.D with the assistance of Prof. Chintaharan Chakravarti, M.A. Rs. 5 ; Rs. 4 (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Prof Akshayakumar Shastri. Re. 2 8 ; Rs. 2 (for members).

19. **Chhandogyamantrabhashyam** of Gunavishnu—Ed. by Prof. Durgamohan Bhattacharya, M. A. Rs. 7-8 ; Rs. 6 (for members). out of stock]

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by MM. Kalipada-Tarkacharya. Rs. 7. ; Rs. 6 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Prof. Chintaharan Chakravarti, M.A. Re. 1-4 ; Re. 1 (for members).

22. **Prasanta-ratnakaram** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2 ; Re. 1-8 (for members).

23. **Devisatakam** of Mahamahopadhyaya Krishnanath Sarvabhauma —Ed. by Pt. Janakinath Shastri. As. 12 ; As. 10 (for members).

24. **Sataranja Kutuhalam**:—Ed. by Prof Chintaharan Chakravarti Kavyatirtha M.A., As. 8

25. **Satyanubhavam**:—(a new MahaKavya) of MM. Kalipada Tarkacharya, Rs. 5 ; Rs. 4-8 (for members).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



একমাত্র ধর্ম্মই এই সংসার-সাগরে সমুদ্ধর্ত্তা
এবং তাঁরই মহনীয় বাণী প্রচার করিতেছে
গুপ্তপ্রেশ ডাইরেক্টরী পাঞ্জিকা

উত্তর কলিকাতায়

(দেশবন্ধু পার্কের দক্ষিণ পার্শ্বে)

নবনির্মিত রঙ্গমঞ্চ

সংস্কৃত-সাহিত্য-পরিষদ্-ভবন

১৬৮।১, রাজা দীনেন্দ্র ষ্ট্রীট, কলিকাতা ৪

Printed by Bishnupada Bhattacharya M. A. Kabyatirtha. at Calcutta Oriental Press, Ltd., 9, Panchanan Ghose Lane, Calcutta and Published by the same from Sanskrit Sahitya Parishad, 168/1 Raja Dinendra Street, Shyambazar, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C 1073

Vol. XXXVII. November 1954

No. 7 १८७६-शकीये

३७श-वर्षस्य कार्तिके

७म संख्या मासे

संस्कृत-साहित्य-परिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकौ

श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः

श्रीरामधनशास्त्री काव्य-व्याकरण-पुराणतीर्थश्च

संस्कृत-साहित्य-परिषत्
श्यामबाजार, कलिकाता

वार्षिकमूल्यम्—रूप्यकषट्कम् ६।
Foreign price—1-4s

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्किञ्चिदावेदनम्

प्रियपाठकमहाभागाः !

जानन्त्येव भवन्तो यत् परिषदियं कियतः कालात् प्रागात्मप्रतिष्ठायै कलिकाता-पौरसभादत्तं किञ्चित् स्थानमधिगत्य तत्रात्मनो वासगृहं रचयितुमारभ्यापि किञ्चिन्मात्रं निर्मायैव महासमरसम्भूतदौर्मूल्यादिभिः कारणैरर्थाभावेन च महता नारब्धं समापयितुं समर्थेति ।

तत् प्रियतमामिमां परिषदं यदि श्रीमन्तः प्रतिष्ठावतीं प्राणवतीञ्च द्रष्टुमिच्छन्ति, तदा सदयं प्रेषयन्तु यथाशक्ति साहाय्यं वक्ष्यमाणसङ्केतेन परिषत्-प्रणयिन्याः कल्पितप्रासादनिर्माणपरिसमाप्त्यर्थमिति ।

सङ्केतः—संस्कृत-साहित्य-परिषत् सम्पादकः,

१६८।१, राजा-दीनेन्द्रष्ट्रीट्, कलिकाता-४

Sanskrit Sahitya Parishat Series

(Revised up to April, 1951)

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (out of Stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1-4 ; Re. I. (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshinacharan Bhattacharya. (out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kalipada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. 2 (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshinacharan Bhattacharya. Rs. 2-8 ; out of stock.

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinath Sahityashastri. As. 4.

(Cont. to Cover 3rd Page)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्य-परिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

Vol. XXXVII. No. 7. | १८७६-शकीये कार्तिके ३७श-वर्षस्य ७म-संख्या | November 1954.

मतिमञ्जरी

पण्डित-श्रीनेहेरुमहोदयाः

[निबन्धकः—श्रीयादवेन्द्रनाथ-राय-न्यायतर्कतीर्थः]

विश्वविश्रुतकीर्तयः स्वनामधन्याः पण्डितमहोदया एते साम्प्रतं भारतराष्ट्रस्य कर्णधाररूपप्रधानमन्त्रिपदं तथा जातीयकांग्रेसाख्यमहासमितेः सभापतिपदमलंकुर्वाणा विद्योतन्तेतराम्। अतिगुरुत्वपूर्णयोरनयोः पदयोरिमे एव योग्यतमा इत्युक्तिर्न संशयसामग्रीसङ्कुला। एतेषां कर्मकुशलता कर्तव्यनिष्ठा चारित्र्यदृढ़ता च भुवनविदिताः। तथापि पाञ्चभौतिकस्य कलेवरस्य विश्राम आवश्यक इति त एव मनसा विचारयन्ति गुरुत्वपूर्णपदद्वयादवसरं लब्धुम्। अस्माभिरप्येवं चिन्त्यतेऽधुना महात्मनः स्थानं रिक्तं वर्तते। ते खलु महात्मन आसन सांख्यीयपुरुषवदकर्तारोऽपीङ्गितमात्रेण सर्वपरिचालकाः, निर्लिप्ता अपि स्कन्धपञ्चकेषु सर्वत्रानुस्यूता, कूटस्था अपि सकलशुभशंसिनश्च नान्यथासिद्धकोटिप्रविष्टाश्च। अपि चास्माभिरापततो नान्यो राष्ट्रपरिचालननिपुणो दृश्यते। यदीमे महाभागा महात्मवद् वहिर्वर्तमाना अन्येनानुगामिना राष्ट्रं परिचालयन्तो योग्यान्तरं विदधति तदायतिकल्याणं स्याद् राष्ट्रस्य। दौर्भाग्याच्छयामाप्रसादविरहितेषु वङ्गेषु यथा वृद्धभिषक्छिरोमणेरन्यः कर्णधारो न समुपलभ्यतेऽस्माभिस्तथा भारतराष्ट्रेऽपि। अन्यच्च नैतन-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्तव्यं यत् स्वरूपयोग्यतापन्नं जनान्तरं नास्ते, किन्तु यदि परस्परं कलहायमाना वर्त्तेरन् नेतृस्थानीयास्तदा का गतिरस्माकमिति तु चिन्ता-विषय एव। यदि निरपेक्षप्रेक्षकपदमलङ्कृत्य पण्डितमहोदया अनन्य-साधारणेन नयनैपुण्येन विपरीतमार्गगान् संयतानेककार्यानुकूलान् सम्पा-दयन्ति तदा राष्ट्रं सुप्रतिष्ठितं भवेदित्यस्माकं मतम्। नयकुशला एते राष्ट्रधुरन्धरा विचारयन्तु विषयमिमम्। अस्माभिस्तु षट्षष्टितम-वर्षपदार्पणमहोत्सवे तेषां दीर्घायुष्ट्वं परमेशसमीपे काम्यते प्रार्थ्यते चेमे यथा लोककल्याणाय प्रागुदितवन्तस्तथा अधुनापि लोकचित्तजयाय प्रवर्त्तन्तामिति।

शोकसंदेशः

कलिकाताराष्ट्रीयसंस्कृतमहाविद्यालयवेदान्तशास्त्राध्यापकाः पण्डित-धुरन्धरा आणेपु-वेङ्कटरमणमूर्तिशर्म्मन्यायाचार्य्यतर्कवेदान्ततीर्थमहोदयाः शारदपूजावकाशे पवित्रे वाराणसीक्षेत्रे वर्तमानाः प्रातश्चिराभ्यस्तगङ्गास्नानाय गता न प्रतिनिवृत्ताः। इतस्ततो निपुणतयान्विष्यद्भिरपि परिजनैस्तेषां प्राणशून्यमपि कलेवरं न लब्धम्। गङ्गातीर्थे कमण्डलुवसनादिकं यथा-विन्यस्तमासीदिति तेषां गङ्गाप्राप्तिरेव निश्चीयते तत्परिजनैः।

स्वल्पकालमेव कलिकाताराष्ट्रीयमहाविद्यालये वर्तमाना इमे पण्डितमहो-दयाः पाण्डित्यप्रतिभया संस्कृतभाषणनिपुणतया व्यवहारसरलतया च जन-मनःसु तथा समासजन, यथा सर्वैरेव विज्ञातगुणैर्वङ्गवासिभिरपि तान् मान्द्राजप्रदेशवासिनो बुधानुद्दिश्य शोकसन्ततिर्वितन्यते।

पूजायाः प्रागेव पण्डितमहीदया एते संस्कृतसाहित्यपरिषदः सदस्यपदं स्वीकृतवन्तो निबन्धमेकं परिषत्पत्रिकायां प्रकाशितवन्तश्च।

सद्योविधवायाः सहधर्म्मचारिण्यास्तथा परिजनानां शोकप्रवाहे तुल्यशोकं विज्ञाप्यास्माभिस्तेषां शिशुपुत्रस्य कन्यायाश्च कल्याणं भगवत्-समीपे प्रार्थ्यत इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

छन्दोगक्रियासारः

[निबन्धकः—श्रीरमणीकान्तसिद्धान्तरत्नः]

(पूर्वानुवृत्तः)

ततो घृताक्तां समिधं तूष्णीमग्नौ हुत्वा (छ) दक्षिणहस्तोपरिभावेनाधो-

---

पुं सवने चान्द्रमसः शुङ्गाकर्मणि शोभनः ।
सीमन्ते मङ्गलो नाम प्रागल्भो जातकर्मणि ॥
नाम्नि स्यात् पार्थिवो ह्यग्निः प्राशने च शुचिस्तथा ।
सभ्यनामाथ चूडे तु (रघुनन्दनस्तु सत्यनामा) व्रतादेशे समुद्भवः ॥
गोदाने सूर्यनामा तु केशान्ते ह्यग्निरुच्यते ।
वैश्वानरो विसर्गे तु विवाहे योजकः स्मृतः ॥
चतुर्थ्यान्तु शिखी नाम धृतिरग्निस्तथापरे ।
आवसथ्ये भवोज्ञेयो वैश्वदेवे तु पावकः ॥
ब्रह्मा वै गार्हपत्ये स्यादीश्वरो दक्षिणे तथा ।
विष्णुराहवनीये तु अग्निहोत्रे त्रयोऽग्नयः ॥
लक्षहोमे वह्निर्नाम कोटिहोमे हुताशनः ।
प्रायश्चित्ते विधिश्चैव (विधुरिति रघुनन्दनः) पाकयज्ञे तु साहसः ॥
देवानां हव्यवाहन्तु पितॄणां कव्यवाहनः ।
पूर्णाहुत्यां मृडो नाम शान्तिके वरदस्तथा ॥
पौष्टिके बलदश्चैव क्रोधाग्निश्चाभिचारके ।
वैश्यार्थे कामदो नाम वनदाहे तु तूदकः ॥
कोष्ठे तु जठराग्निश्च कव्यादो मृतभक्षणे ।
समुद्रे वाड़वो ज्ञेयः क्षये संवर्त्तको भवेत् ॥
एतेऽग्नयः समाख्याताः श्रावयेद् ब्राह्मणः सदा ।
सप्तविंशतिर्विख्याता ज्ञातव्याश्च द्विजेन तु ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुखो हस्तौ भूमौ निधाय (ज) परमेष्ठि ऋषिरनुष्टुप् छन्दोऽग्निर्देवता भूमिजपे विनियोगः ॐ इदं भूमेर्भजामह इदं भद्रं सुमङ्गलं परा सपत्नान्

एतेन कर्मस्वविनियुक्तानामप्यग्निनाम्नां पूर्वं परिकीर्त्तनमिति द्रष्टव्यम् ॥

रघुनन्दनस्तु सर्वतः पाणिपादान्तः सर्वतोऽक्षिशिरोमुखः ।
विश्वरूपो महानग्निः प्रणीतः सर्वकर्मसु ॥ इति
गृह्यासंग्रहवचनं प्रमाणीकृत्य नाम्नामपरिज्ञाने
विश्वरूपं नाम कुर्य्यादित्युक्तं तच्चिन्त्यम् ।
अग्निस्वरूपज्ञानायैव तद्वचनं पर्य्यवसितम् ॥
वस्तुतो यत्राग्नेर्नामश्रावणविधिस्तत्रनाम्नोऽपरिज्ञानं न सम्भवेत् ।

(च) (क) "उत्तरतोऽपां पूर्णः स्रुवः प्रणीता" इति गोभिलः । १७।१।७
प्रणीताभिरुदकार्थः कार्य्य इति गृह्यान्तरम् ॥
"भावेन वा स्यादित्येके" इति १८।१।७

विहितप्रतिषिद्धमिदं प्रणीताप्रणयनं गृह्याकर्म्मसु नोपकल्पयेत् । तथाच गृह्यासंग्रहः,—"विहितप्रतिषिद्धान्तु प्रणीतां नोपकल्पयेत्" इति

(छ) समित्प्रमाणम्—"नाङ्गुष्ठादधिका ग्राह्या समित् स्थूलतया क्वचित् ।
न वियुक्ता त्वचा चैव न सकीटा न पाटिता ॥
प्रादेशान्नाधिका नोना न तथा स्याद्द्विशाखिका ।
न सपर्णा न निर्वीर्य्या होमेषु च विजानता ॥
१८ कर्मप्रदीपः ।

तथाच गृह्यासंग्रहः—"अकृशा चैव न स्थूला अशाखा चापलाशिनी ।
सक्षीरा नाधिका न्यूनाः समिधः सर्व्वकामदाः ॥

(ज) "पश्चादग्नेर्भूमौ न्यञ्चौ पाणी प्रतिष्ठाप्येदं भूमेर्भजामह इति" ३।१।२ख
गोभिलसूत्रम् ।

न्यक्कर्म्माह कर्म्मप्रदीपे—
दक्षिणं वामतो वाह्यमात्माभिमुखमेव च ।
करं करस्य कुर्व्वीत करणे न्यञ्च कर्म्मणि" इति ॥ कर्मप्रदीपः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बाधस्वान्येषां विन्दते धनम्" इति जपेत्। रात्रौ चेत् कर्म धनमितिस्थाने 'वसु' इति प्रयोक्तव्यम्। (ञ)

ततः परिसमूहनं कुर्यात्। (ट) अत्र परिसमूहनं नाम विक्षिप्तानामग्निकणानामेकत्र करणम्। अग्न्यभिमुखौ सुसंहतौ हस्तौ कृत्वा ताभ्यां कुशान् गृहीत्वा कौत्सस्य ऋषिर्जगती छन्दोऽग्निर्देवता पृष्ठस्य षड्हस्य षष्ठेऽहन्यग्निमारुते स्वस्ते परिसमूहने विनियोगः ॐ इमं स्तोममर्हते जातवेदसे रथमिव सन्महेमा मनीषया, भद्राहिनः प्रमतिरस्य संसद्यग्ने सख्ये मारिषामा वयं तव ॥ पूर्वोक्ता एव ऋष्यादयः, ॐ भरामेध्वं कृण-

---

(ञ) "वस्वन्तं रात्रौ धनमिति दिवा ॥ ४।१।२ गोभिलसूत्रम्।

लेखनाभ्युक्षणे कृत्वा निहितेऽग्नौ समिद्दत्।

ततो भूमिग्रहं कृत्वा कुर्यात् परिसमूहनम्।

ब्रह्माणमुपसंकल्प्य चरुश्रपणमारभेत् ॥ इति गृह्यासंग्रहोक्तः

क्रमोऽत्र ग्रहीतव्यः। "आधाय समिधश्चैव ब्रह्माणमुपवेशयेदिति कर्मप्रदीपोक्तः क्रमः आधानविषय एव न सर्वत्र तस्य प्रयोगः।

प्रागुक्तं भाविनोऽग्नेरुत्तरे प्रयोजनद्रव्याणि स्थापयेदिति। तत्र कर्मप्रदीपेऽप्याह,—प्राञ्चं प्राञ्चमुदगग्नेरुदगग्रं समीपतः।

तत्तथासादयेद् द्रव्यं यद्यथा विनियुज्यते ॥ इति

अत्र "पुरोडाशकपालेन तुषान् वपति" इत्यत्र यथा भविष्यता पुरोडाशेन कपालस्याभिसम्बन्धः, तथैव भविष्यताऽग्निना उत्तरस्याः सम्बन्धो बोद्धव्यः।

(ट) "इमं स्तोममिति तृचेन परिसमूहेत् ॥ इति गोभिलसूत्रम् ।५।४।५

तथाच कर्मप्रदीपः,—कृत्वाभिमुखौ हस्तौ स्वस्थानस्थौ सुसंहतौ।

प्रदक्षिणं तथासीनः कुर्यात् परिसमूहनम् ॥ इति

अनेन क्रमेण परिसमूहेत्। यत्र परिसमूहनं नास्ति तदाह कर्मप्रदीपः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वामा हवींषि ते चितयन्तः पर्वणा पर्वणा वयं, जीवातवे प्रतरां साधया धियोऽग्ने सख्ये सारिषा मा वयं तव॥ पूर्वोक्ता एव ऋष्यादयः, ॐ शकेम त्वा समिधं साधया धियस्ते देवा हविरदन्त्याहुतम्। त्वमादित्या॰ आवहता॰ ह्यु शमस्यग्ने सख्ये मारिषामा वयं तव। इति मन्त्रत्रयेण समूहेत्। सायंप्रातर्होमादिषु परिसमूहनं नास्ति। (ठ) ततः कर्त्ता पूर्वत आरभ्याग्निं प्रदक्षिणीकृत्य गत्वाऽग्नेर्दक्षिणस्यां दिशि ब्रह्मोपवेशनार्थमग्निमारभ्य विच्छिन्नां दक्षिणाग्रां वारिधारां दत्त्वा तत्र प्रागग्रान् दर्भानास्तीर्य्य ...(अन्यच्चेष्टेत्) (ड)

(ठ) न कुर्यात् क्षिप्रहोमेषु द्विजः परिसमूहनम्। विरूपाक्षञ्च न जपेत् प्रपदञ्च विवर्जयेत् ॥५॥

पर्युक्षणन्तु सर्वत्र कर्तव्यमदितेऽन्विति।

अन्ते च वामदेव्यस्य गानमित्यथवा त्रिधा" ॥६।१।६।

क्षिप्रहोमाः सायं प्रातर्होमाः।

(ड) "अथ पूर्वाह्ण एव प्रातराहुतिं हुत्वाऽग्रेणाग्निं परिक्रम्य दक्षिणतोऽग्नेः प्रागग्रान् दर्भानास्तीर्य्य" इति गोभिलं सूत्रम्।१३।१।६

तथाच गृह्यासंग्रहः—"उदग्धारामविच्छिन्नामग्रयमारभ्य दक्षिणाम्।

दद्याद् ब्रह्मासनस्थाने सर्वकर्मसु नित्यशः॥ इति

सूत्रोक्त आस्तीर्यपदे एककर्तृकत्वमपेक्षते चेद् "यद्युवा...प्रत्याव्रज्यान्यच्चेष्टेत् इति सूत्रोक्तस्य 'इष्टेत्' इत्यनेन सम्बन्धः।

अत्र व्यवहितान्वयो दोषावहः, पूर्वकालतामात्रमभिधत्ते क्त्वाप्रत्यय इति शास्त्रतात्पर्य्यविदां समयः।

गोभिलपुत्रोऽप्याह,—पुनरुक्तमतिक्रान्तं तथा सिंहावलोकितम्।

गोभिले ये न गृणन्ति न ते गृणन्ति गोभिलम्॥ इति

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थविमर्शः

[निबन्धकः—श्रीचारुकृष्णदर्शनाचार्यः]

पूर्वमस्माभिर्माण्डुक्यग्रन्थस्याप्रामाण्यमुक्तं, तत्र केनचित् कथितं माण्डुक्यस्य स्वतः प्रामाण्यात् नास्त्यपेक्षा प्रमाणान्तरस्य स्वप्रामाण्ये इति, अत्रोच्यते,—माण्डुक्यस्य श्रुतित्वे स्वतः प्रामाण्यादिचिन्ता, मूलत एव तु कुठारः प्राचामनुल्लेखात्, उपनिषदां वेदत्वनिर्णये वैदिकपरम्परैव प्रमाणमिति तेनैवोक्तं, तेनैव हेतुना माण्डुक्यस्याप्रामाण्यमुच्यते, पारम्पर्यव्याघातात्, नवीनैरेवादृतो वेदान्तसारकारादिभिर्माण्डुक्यग्रन्थः न तु ततः प्राक्तनैरदर्शनात्। गौडपादेनापि 'नेह नानेति चाम्नायादि'त्यादिना श्रुत्यन्तराण्युद्धृतानि, न तूद्धृता माण्डुक्यमात्रस्पर्शिवहिष्प्रज्ञादिवर्णने मुण्डुक्यश्रुतिरित्यध्येतृपारम्परीणत्वहानेर्न प्रामाण्यं माण्डुक्यस्येतिस्थितम्। दृष्ट्वैव गौडपादकारिकां स्वमतप्रतिष्ठार्थं प्रणीता केनचित् माण्डुक्यश्रुतिः पश्चादिव्येव युक्तम्।

गोपालतापनी च भक्तिशास्त्रं ज्ञानशास्त्रव्याख्यायामनुपयोगीति कृत्वा नोल्लिखिता शङ्करेणेति युज्यते, भागवतमात्रवर्णितश्रीकृष्णविश्वरूपदर्शनजनितयशोदाविस्मयवृत्तान्तश्च वर्णितो गोविन्दाष्टके शङ्करेण तस्य साक्षाच्छिष्येण चानन्तानन्देन भागवतीयशुकपरीक्षिद्वृत्तान्त उल्लिखितः शङ्करदिग्विजये। अतः शङ्करेण नोद्धृतं भागवतमिति रिक्तं वचः। यदि चोपनिषदामेव प्रामाण्यमिष्यतां अल्लोपनिषदपि प्रमाणीभवतु।

विध्यभावात् जैमिनिना सन्न्यासो न स्वीकृतः, बादरायणेन च धारणवत् विधिकल्पनेन सन्न्यासाश्रमः स्वीकृतः, "वनी भूत्वा प्रव्रजेत्" "यदहरेव विरजेत् तदहरेव प्रव्रजेदि"ति जाबालश्रुतिसत्त्वे नैतदुपपद्यते, द्वावेव च वेदाचार्यौ जैमिनिबादरायणौ जाबालश्रुतिं नापश्यता-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मिति तु नैव युक्तम्। अतश्चिन्त्यं तत्प्रामाण्यम्। उच्यते च मायावादिभिराचार्यशङ्करेण माण्डुक्यश्रुतिर्निरस्तां समादृतेति, अस्माभिस्तु दृश्यते शाङ्करग्रन्थेषु माण्डुक्यश्रुतेरुल्लेखो नास्तीति। किं बहुना स्वमतप्रतिष्ठार्थं गौडपादकारिकाग्रन्थोऽपि श्रुतित्वेन तैरुद्घोषितः अतः—

"न निरोधो नचोत्पत्तिर्न बन्धो न च साधकः।
न मुमुक्षुर्नवा मुक्त इत्येषा परमार्थता"॥
"भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमपि चापरे।
देवस्यैव स्वभावोऽयमाप्तकामस्य का स्पृहा॥"

(क्रमशः)

श्रीचैतन्यचरितामृतसंस्कृतानुवादः

(पूर्वतोऽनुवृत्तः)

अनुवादकः—श्रीभास्करानन्दस्वामी।

श्रीश्रीचैतन्यचरितामृत आदिलीलायां

सप्तमः परिच्छेदः

कथिताः सर्ववेदेष्वभिधेयत्वेन ते पुनः।
तत्साधनाख्यया भक्त्या भवेत् प्रेमसमुद्गमः॥
कथमप्यनुरागश्चेत् कृष्णस्य चरणे भवेत्।
तं विनान्यत्र कुत्रापि तस्य रागो न जायते॥
पञ्चमः पुरुषार्थो हि स प्रेमा परमं धनम्।
आस्वादयति भक्तान् स कृष्णस्य माधुरीरसम्॥
श्रीकृष्णो निजभक्तस्य प्रेम्णैकेन वशीभवेत्।
प्रेम्णैव लभ्यते भक्तैः कृष्णसेवासुखामृतम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्बन्धश्चाभिधेयश्च तृतीयञ्च प्रयोजनम् ।
एतानि त्रीणि सूत्रेषु पर्य्यवस्यन्ति निश्चितम् ॥
इत्येवं सर्वसूत्राणां व्याख्यानं प्रभुणा कृतम् ।
श्रुत्वा सन्न्यासिनः सर्वे विनयेनात्रुवंस्तदा ॥१०४॥
साक्षान्नारायणोऽसि त्वं मूर्त्तिर्वेदमयी तव ।
पूर्वं त्वं निन्दितोऽस्माभिरपराधं क्षमस्व नः ॥
ततः प्रभृति सन्न्यासिगणो व्यावृत्तमानसः ।
कृष्णकृष्णेति तन्नामग्रहणं कृतवान सदा ॥
प्रभुरेवं हि सर्वेषामपराधममर्षयत् ।
श्रीकृष्णनाम सर्वेभ्यः सप्रसादमुपादिशत् ॥
ततः सन्न्यासिनः सर्वे सहादाय महाप्रभुम् ।
पङ्क्तिमध्यं तमध्यास्यागृह्न भिक्षां द्विजालये ॥
ततो निवासमायातः कृतभिक्षो महाप्रभुः ।
एवं विचित्रलीलां सोऽकरोद् गौराङ्गसुन्दरः ॥
ततः सनातनश्चन्द्रशेखरस्तपनद्विजः ।
श्रुत्वा दृष्ट्वा च तत् सर्वं सानन्दचेतसोऽभवन ॥
ततः सन्न्यासिनः प्रायः प्रभुं द्रष्टुं समागमन ।
प्रभोः प्रशंसया पूर्णाभवद् वाराणसी तदा ॥
भगवत्कृष्णचैतन्ये वाराणस्यामुपस्थिते ।
सा पुरी सह वास्तव्यै-र्महाधन्यत्वमाययौ ॥
नरा लक्षश आगच्छन प्रभोर्दर्शनकाङ्क्षिणः ।
महती जनता द्वारं प्रवेष्टुं नाशकत्तदा ॥
प्रभौ विश्वेश्वरं द्रष्टुं मन्दिरं प्रति गच्छति ।
मिलिता युगपल्लोकाः पर्यवृण्वन समन्ततः ॥१०५॥
यदावगाहनं कर्त्तुं गङ्गातीरमुपेयिवान ।
तस्मिन्नप्यभवल्लोकसंघट्टः सुमहत्तमः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्यद्बाहौ ब्रुवत्येव हरे हर इति प्रभौ ।
रोदसी व्याप्य लोकानामभूदुच्चैर्हरिध्वनिः ॥
इत्थं निस्तारयन्मर्त्त्यांस्ततो गन्तुमनाः प्रभुः ।
श्रीमद् वृन्दावनं धाम प्रैरयच्छ्रीसनातनम् ॥
वीक्ष्य नक्तन्दिवं लोकान् कोलाहलसमाकुलान् ।
वाराणसीं परित्यज्य प्रभुर्लीलाचलं गतः ॥
सविस्तरमिमां लीलां वक्ष्याम्यहमग्रतः ।
प्राप्तप्रसङ्ग एवात्र ससंक्षेपमुदाहरम् ॥
एवं श्रीकृष्णचैतन्यः पञ्चतत्त्वात्मकः प्रभुः ।
नाम प्रेम च कृष्णस्य दत्त्वा विश्वमतारयत् ॥
प्रैरयन्मथुराधाम स श्रीरूपसनातनौ ।
सेनापतिद्वयं तच्च भक्तिं प्राचारयत्तदा ॥
श्रीनित्यानन्दगोस्वामी स गौड़ान् प्रापितोऽमुना ।
अशेषेण विशेषेण भक्तिं तत्राप्यचारयत् ॥
दाक्षिणात्ये स्वयं गत्वा ग्रामं ग्रामं परिव्रजन् ।
कृष्णनाम्नः प्रचारं स प्रभुर्विहितवान मुदा ॥
गच्छन्नासेतुबन्धं स भक्तिं प्राचारयत् स्वयम् ।
कृष्णप्रेमधनं दत्त्वा तत्रत्यानुदधारयत् ॥१०६॥
इत्येवं कृतवानस्मि पञ्चतत्त्वनिरूपणम् ।
ज्ञानं चैतन्यतत्त्वस्य श्रवणादस्य जायते ॥
श्रीचैतन्यप्रभुर्नित्यानन्दोऽद्वैतश्च ते त्रयः ।
श्रीवासाद्याश्च यावन्तो भक्ता गदाधरादयः ॥
सर्वेषां चरणे तेषां कृत्वा कोटिं नमस्कृतीः ।
किञ्चिद्वदामि चैतन्यविहारञ्च यथायथम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स कृष्णदास आह श्रीचैतन्यचरितामृतम् ॥११०॥

इति श्रीचैतन्यचरितामृत आदिखण्डे पञ्चतत्त्वार्थनिरूपणं
नाम सप्तमः परिच्छेदः ।

श्रीचैतन्यचरितामृत आदिलीलायां

अष्टमः परिच्छेदः

"वन्दे चैतन्यदेवं तं भगवन्तं यदिच्छया ।
प्रसभं नृत्यते चित्रं लेखरङ्गे जडोऽप्यहम् ॥१॥"
जयतात् कृष्णचैतन्यः श्रीमान् गौराङ्गचन्द्रमाः ।
जयतात् परमानन्दो नित्यानन्दः कृपानिधिः ॥
जयत्वद्वैत आचार्यः करुणासागरः प्रभुः ।
जयतात् सुमहाभागः श्रीगदाधरपण्डितः ॥
श्रीमद् गौराङ्गभक्ता ये श्रीवासाद्या जयन्तु ते ।
सर्वेषां पादपद्मानि वन्देऽहं प्रणतो भुवि ॥
येषां स्मरणमाहात्म्यान्मूको भवति सत्कविः ।
गिरिं लङ्घयते पङ्गुरन्धः पश्यति तारकाः ॥
इत्येवं ये न मन्यन्ते सर्वे पण्डितमानिनः ।
विद्यानां पठनं तेषां भेककोलाहलं यथा ॥
अमन्यमानस्तत सर्वं कृष्णभक्तिं करोति यः ।
तस्मिन् कृष्णकृपा न स्याद् गतिस्तस्य भवेन्न च ॥
जरासन्धादयः पूर्वं राजानोऽपूजयन् भृशम् ।
वेदधर्मानुसारेण विष्णुं नारायणं पुरा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृष्णं नाद्रियमाणास्ते दैत्या एव मता तथा ।
तं चैतन्यममन्वाना जना दैत्या मतास्तथा ॥
मयि भक्तिमकुर्वाणा विनश्यन्ति जना इति ।
मत्वा जग्राह सन्न्यासं कृपयासौ महाप्रभुः ॥
मां च सन्न्यासि-बुद्ध्यापि मानवानां नमस्यताम् ।
सर्वे दोषा विनश्यन्ति भवेच्च भवनिष्कृतिः ॥१०॥
इत्येवं करुणावन्तं प्रभुं नैव भजन्ति ये ।
असुरेष्वेव गण्यन्ते ते हि सर्वोत्तमा अपि ॥
अतोऽहमूर्द्ध्वबाहुः सन् कथयामि पुनः पुनः ।
श्रीनित्यानन्दचैतन्यौ भज तर्कं त्यजन्निति ॥
अपि चेत्तार्किको वक्ति तर्कः प्रमाणमित्यतः ।
यत्तर्कशास्त्रसिद्धं स्यात्तत् सेव्येतेति तं वद ॥
विचारं कृष्णचैतन्यकृपाया हृदये कुरु ।
विचारे विहिते चित्ते प्राप्स्यस्येव चमत्कृतिम् ॥
करोषि बहु जन्मानि यदि श्रवणकीर्त्तने ।
नैव कृष्णपदे प्रेमधनं तह्यपि लप्स्यसे ॥

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे—१।२२—

ज्ञानतः सुलभा मुक्तिर्भुक्तिर्यज्ञादिपुण्यतः ।
सेयं साधनसाहस्रैर्हरिभक्तिः सुदुर्लभा ॥२॥"
कृष्णोऽवकाशमाप्नोति भुक्तिमुक्ती यदार्पयन् ।
दत्ते तदा न भक्ताय प्रेमभक्तिं सुगूहिताम् ॥

तथाहि श्रीमद्भागवते ५।६।१८—

राजन् पतिर्गुरुरलं भवतां यदूनां
दैवं प्रियः कुलपतिः क्व च किङ्करो वः ।
अस्त्वेवमङ्ग भजतां भगवान् मुकुन्दो
मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगम् ॥३॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीनित्यानन्द चैतन्यावदत्तां यत्र तत्र च ।
तत्प्रेम का कथान्येषां तज्जगा-माधयोरपि ॥
स्वतन्त्र ईश्वरः सोऽयं तत्प्रेमगूढभाण्डकम् ।
पात्रापात्राविचारेण यस्मै कस्मैचिदार्पयत् ॥
पश्याद्यापीह गृह्णाति चैतन्य इति नाम यः ।
कृष्णप्रेमाश्रुरोमाञ्चविह्वलः स भवेत् सदा ॥
नित्यानन्द इति प्रोक्ते कृष्णप्रेमोदयो भवेत् ।
रोमाञ्चोऽङ्गेऽस्फुटा वाक् च प्रवहत्यश्रुजाह्नवी ॥२०॥
कृष्णनाम्नापराधानां विचारः क्रियते स्फुटम् ।
गृह्यमाणेऽपि तन्नाम्नि विकारो नापराधिनाम् ॥

"तथाहि श्रीमद्भागवते—२।३।२४—

तदश्मसारं हृदयं बतेदं
यद् गृह्यमाणैर्हरिनामधेयैः ।
न विक्रियेताथ यदा विकारो
नेत्रे जलं गात्ररूहेषु हर्षः ॥४॥"

कृष्णनाम्नि सकृत् प्रोक्ते सर्वपापं विनश्यति ।
जायते भावभक्तिश्च या प्रेमभक्तिकारणम् ॥
प्रेमोदयेन चित्तस्य द्रवीभावो भवेत्ततः ।
वेपथु-स्वेदरोमाञ्चनेत्राम्बु-गद्गदादयः ॥
भवक्षयो विनायासं भगवत्कृष्णसेवनम् ।
गृहीतस्य सकृत् कृष्णनाम्नः प्राप्यमियत् फलम् ॥
बहुकृत्वो गृहीतेऽपि तादृशे कृष्णनामनि ।
जायते यदि न प्रेमा न वा नेत्राम्बुनिर्गमः ॥
तदा तत्र विजानीयादपराधो महानिति ।
श्रीकृष्णनामबीजस्य नाङ्कुरस्तत्र जायते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नित्यानन्दे च चैतन्ये न तथास्ति विचारणा ।
तौ नामगृह्णते प्रेम दत्त्वा सेचयतोऽश्रुभिः ॥
अत्युदारस्तु चैतन्यः स्वतन्त्रः प्रभुरीश्वरः ।
नास्ति कस्यापि निस्तारो जातु तद्भजनं विना ॥
आकर्णयत हे मूढा जनश्चैतन्यमङ्गलम् ।
येन चैतन्यमाहात्म्यं सर्वमवगमिष्यथ ॥
श्रीमद्भागवते कृष्णलीला व्यासेन वर्णिता ।
चैतन्यचरिते व्यासः श्रीवृन्दावनदासकः ॥३०॥
श्रीवृन्दावनदासेन कृतं चैतन्यमङ्गलम् ।
यस्य श्रवणमात्रेण सर्वं नश्यत्यमङ्गलम् ॥
श्रीनित्यानन्द-चैतन्य-महिमा बुध्यते यतः ।
श्रीकृष्णभक्तिसिद्धान्तसीमा येनावगम्यते ॥
भक्तिसिद्धान्तसारो हि यावान् भागवते स्थितः ।
तस्मादुद्धृत्य तावन्तमलिखत् सर्वमत्र सः ॥
यवनोऽपि च पाषण्डी यदि चैतन्यमङ्गलम् ।
आकर्णयेत्तदा तावत् स महावैष्णवो भवेत् ॥
धन्यमेतादृशं ग्रन्थं न निर्मातुं नरः क्षमः ।
श्रीवृन्दावनदासस्य मुखेनाह स्वयं प्रभुः ॥
श्रीवृन्दावनदासाङ्घ्रौ कोटिः प्रणतयो मम ।
निर्मायैतादृशं ग्रन्थं स संसारमतारयत् ॥
यासौ नारायणी देवी चैतन्योच्छिष्टभोजिनी ।
श्रीवृन्दावनदासोऽयं तस्या गर्भादजायत ॥
तेन चैतन्यचारित्रं वर्णितं तत् किमद्भुतम् ।
यस्य श्रवणमात्रेण पूयते भुवनत्रयम् ॥
अतो भजत चैतन्यनित्यानन्दौ जगज्जनाः ।
संसारदुःखनाशेन प्रचुरानन्दमाप्स्यथ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीवृन्दावनदासेन कृतं चैतन्यमङ्गलम् ।
समग्रा तत्र चैतन्यलीला तेनास्ति वर्णिता ॥४०॥
प्रथमं ग्रथिता लीलामालिका तेन सूत्रवत् ।
ततः सविस्तरं पश्चाद्विवृती रचिता पुनः ॥
चैतन्यचन्द्रलीलाया न पारो नावधिः क्वचित् ।
लीलायां वर्ण्यमानायां ग्रन्थोऽसौ विस्तृतिं गतः ॥
तथा विस्तृतिमालोक्य तस्य सङ्कुचितं मनः ।
काश्चित् सूत्रधृता लीलास्तस्मात्तेन न वर्णिताः ॥
श्रीनित्यानन्दलीलाया वर्णनाविष्टमानसः ।
चैतन्यस्यान्तिमां लीलां लिखितुं सोऽक्षमोऽभवत् ॥
सर्वासां तस्य लीलानां विवृतिं श्रोतुमुत्सुकाः ।
वर्त्तन्ते वैष्णवाः सर्वे श्रीवृन्दावनवासिनः ॥
कल्पवृक्षतले वृन्दावने काञ्चनसद्मनि ।
सिंहासनं महायोगपीठेऽस्ति रत्ननिर्मितम् ॥
तत्र शोभत आसीनः सदा व्रजेन्द्रनन्दनः ।
गोविन्ददेवनामासौ मदनो मूर्त्तिमानिव ॥
राजोपकरणैस्तस्य सेवा भवति चित्रधा ।
दिव्यैश्च द्रव्यसम्भारैर्दिव्यैर्वसनभूषणैः ॥
सेवकानां सहस्राणि सेवन्ते तं प्रतिक्षणम् ।
सा सेवा-वर्णनाऽशक्या सहस्रेण मुखैरपि ॥
सेवाध्यक्षः प्रभोस्तत्र श्रीहरिदासपण्डितः ।
व्याप्तं सर्वं जगद् यस्य कीर्त्या च गुणसम्पदा ॥५०॥
सुशीलो मधुराचारः शान्तो गम्भीरधीरधीः ।
दाता सूनृतवादी च सहिष्णुः सोऽभवत् सुधीः ॥
सर्वेषां मानदाता च सर्वेषां हितकारकः ।
हिंसा-कौटिल्य-मात्सर्य्य-हीनचित्तः सदाशयः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आसन् कृष्णस्य पञ्चाशद् ये च साधारणा गुणाः ।
निखिलास्ते गुणास्तस्य देहे सन्ति प्रकाशिताः ॥

"तथाहि श्रीमद्भागवते—५।१८।१२—

यस्यास्ति भक्तिर्भगवत्यकिञ्चना
सर्वैर्गुणैस्तत्र समासते सुराः ।
हरावभक्तस्य कुतो महद्गुणा
मनोरथेनासति धावतो बहिः ॥५॥"

योऽनन्ताचार्य्य इत्याख्यः शिष्योऽभूत् पण्डितप्रभोः ।
कृष्णप्रेममयाकारो महार्य्योदारमानसः ॥
तस्यानन्तान् गुणान् को वा प्रकाशयितुमर्हति ।
तस्य प्रियतमः शिष्यः श्रीहरिदासपण्डितः ॥
विश्वासस्तस्य चैतन्ये नित्यानन्दे च सुस्थिरः ।
चैतन्यचरितं श्रोतुं सदोल्लसितमानसः ॥
वैष्णवानां गुणग्राही न तेषां दोषमीक्षते ।
कायेन मनसा वाचा तांस्तोषयति सर्वदा ॥
चैतन्यमङ्गलं ग्रन्थं स शृणोति निरन्तरम् ।
सर्व्वे तस्य प्रसादेन तत्र शृण्वन्ति वैष्णवाः ॥
गौराङ्गस्यान्त्यलीलाया वर्णनाय यथाक्रमम् ।
महत्या कृपयाविष्टः स आज्ञापयदेव माम् ॥
श्रीकाशीश्वरगोस्वामि-शिष्यो गोविन्दनामकः ।
अनन्यसदृशः प्रेष्ठः श्रीगोविन्दस्य सेवकः ॥६०॥
यादवाचार्य्यगोस्वामी श्रीरूपनित्यसङ्गतः ।
चैतन्यचरिते यस्य बलवान् सरसाग्रहः ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

9. **Introduction to the Rigveda of Sayanacharya**—Edited by Dr. Pashupatinath Shastri, M.A. B.L. Ph. D. Re. 1-8 ; Re. 1-4. (for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. As.14;As. 10 (for members).

11. **Prabhakara-vijayam** of Nandishvara—Edited by Mahamahopadhyaya Anantakrishna Shastri Vedantavisharad and Pt. Ramanath Shastri. Rs. 2-8 ; Rs. 2 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya—Edited by Pt. Bamacharan Kavyatirtha. As 12 ; As 10. (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Prof. Chintaharan Chakravarti, M. A Re 1-8 ; Re. 1-4 (for members).

14. **Nala-damayantiyam** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2-8 ; Rs. 2 (for members).

15. **Prashastapada-bhashyam**—Edited by MM. Kalipada Tarkacharya. Rs. 4 ; Rs. 3. (for members).

16 **Yatratattvam** of Raghunandana Bhattacharya—Edited by Pt. Dwarikanath Nyayashastri. Rs. 2. ; Re. 1-8 (for members).

17. **Rik-pratishakhyam**—Ed. by Dr. Pashupatinath Shastri, M.A., B.L., Ph.D with the assistance of Prof. Chintaharan Chakravarti, M.A. Rs. 5 ; Rs. 4 (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Prof Akshayakumar Shastri. Re. 2 8 ; Rs. 2 (for members).

19. **Chhandogyamantrabhashyam** of Gunavishnu—Ed. by Prof. Durgamohan Bhattacharya, M. A. Rs. 7-8 ; Rs. 6 (for members). out of stock]

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by MM. Kalipada-Tarkacharya. Rs. 7. ; Rs. 6 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Prof.Chintaharan Chakravarti, M.A. Re. 1-4 ; Re. 1 (for members).

22. **Prasanta-ratnakaram** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2 ; Re. 1-8 (for members).

23. **Devisatakam** of Mahamahopadhyaya Krishnanath Sarvabhauma —Ed. by Pt. Janakinath Shastri. As. 12 ; As. 10 (for members).

24. **Sataranja Kutuhalam**:—Ed. by Prof Chintaharan Chakravarti Kavyatirtha M.A., As. 8

25. **Satyanubhavam**:—(a new MahaKavya) of MM. Kalipada Tarkacharya, Rs. 5 ; Rs. 4-8 (for members).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

একমাত্র ধর্ম্মই এই সংসার-সাগরে সমুদ্ধর্ত্তা
এবং তাঁরই মহনীয় বাণী প্রচার করিতেছে
গুপ্তপ্রেশ ডাইরেক্টরী পাঞ্জিকা

উত্তর কলিকাতায়

(দেশবন্ধু পার্কের দক্ষিণ পার্শ্বে)

নবনির্ম্মিত রঙ্গমঞ্চ

সংস্কৃত-সাহিত্য-পরিষদ্-ভবন

১৬৮।১, রাজা দীনেন্দ্র ষ্ট্রীট, কলিকাতা ৪

Printed by Bishnupada Bhattacharya M. A. Kabyatirtha. at Calcutta Oriental Press, Ltd., 9, Panchanan Ghose Lane, Calcutta and Published by the same from Sanskrit Sahitya Parishad, 168/1 Raja Dinendra Street, Shyambazar, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C 1073

Vol. XXXVII. December 1954

No. 8 १८७६-शकीये

३७श-वर्षस्य अग्रहायणे

८म संख्या मासे

संस्कृत-साहित्य-परिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकौ

श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः

श्रीरामधनशास्त्री काव्य-व्याकरण-पुराणतीर्थश्च

संस्कृत-साहित्य परिषत्
श्यामबाजार, कलिकाता

वार्षिकमूल्यम्—रूप्यकषट्कम् ६।
Foreign price—1-4s

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्किञ्चिन्निवेदनम्

प्रियपाठकमहाभागाः !

जानन्त्येव भवन्तो यत् परिषदियं कियतः कालात् प्रागात्मप्रतिष्ठायै कलिकाता-पौरसभादत्तं किञ्चित् स्थानमधिगत्य तत्रात्मनो वासगृहं रचयितुमारभ्यापि किञ्चिन्मात्रं निर्मायैव महासमरसम्भूतदौर्मूल्यादिभिः कारणैरर्थाभावेन च महता नारब्धं समापयितुं समर्थेति ।

तत् प्रियतमामिमां परिषदं यदि श्रीमन्तः प्रतिष्ठावतीं प्राणवतीञ्च द्रष्टुमिच्छन्ति, तदा सदयं प्रेषयन्तु यथाशक्ति साहाय्यं वक्ष्यमाणसङ्केतेन परिषत्-प्रणयिन्याः कल्पितप्रासादनिर्माणपरिसमाप्त्यर्थमिति ।

सङ्केतः—संस्कृत-साहित्य-परिषत्-सम्पादकः,
१६८।१, राजा-दीनेन्द्रष्ट्रीट, कलिकाता-४

Sanskrit Sahitya Parishat Series

(Revised up to April, 1951)

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (out of Stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1-4 ; Re. I. (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshinacharan Bhattacharya. (out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kalipada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. 2 (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshinacharan Bhattacharya. Rs. 2-8 ; out of stock.

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinath Sahityashastri. As. 4.

(Cont. to Cover 3rd Page)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

Vol. XXXVII. No. 8. | १८७६-शकीये अग्रहायणे ३७श-वर्षस्य ८म-संख्या | December 1954.

मतिमञ्जरी

महासमरायोजनम्

[निबन्धकः—श्रीयादवेन्द्रनाथ-राय-न्यायतर्कतीर्थः]

विश्वव्यापितृतीयमहायुद्धस्य सूचना समुपलभ्यते दिशि दिशि रणोन्मत्तानामाकर्ण्य रणहुङ्कारम् । नवीनचीनसाम्राज्येन समधिगतराष्ट्राधिकारेण सार्द्धं युक्तराष्ट्रस्य नीतिगतं यन्महद्वैषम्यमस्ति तदेव "फारमोसाख्यभूखण्डं निमित्तीकृत्य युद्धारम्भ इत्यापाततो यद्यपि प्रेक्ष्यते निरीक्षकैस्तथापि धनसाम्यवाद-(Socialism) धनतन्त्रवादयो (Capitalism) यद् वैषम्यं समग्रायां धरण्यां चकास्ति तदेव निदानं समरसज्जायाः । यदा यदा महायुद्धविरतिर्जायते तदा तदैव शान्तिकामिनः शान्तिप्रतिष्ठार्थं प्रयतन्ते । प्रथममहासमरानन्तरमेतदर्थं राष्ट्रसंघनामा (League of Nations) कश्चन संघः प्रतिष्ठित आसीत् । ततश्च सबला महीपतयः "अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि सन्धिदूषणानी"ति कृत्वा शान्तिसंघं विघटितवन्तः ; द्वितीयमपि महायुद्धं संवृत्तम् । अधुनापि नीतिविरोधाद् बलदर्पितानां भुजकण्डूतिर्विवर्द्धते—अतश्च मात्स्यन्यायेन युद्धमवश्यमेव भवितेत्यस्माभिर्विविच्यते । प्रकृतिमुल्लङ्घ्य न कस्यापि शक्तिः कापि किञ्चित् कर्तुम् । दुर्बलाः प्रबलैः पीड्यन्त इति स्वाभाविकी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रीतिं शतशोऽपि यतमाना नीतिर्न पारयिष्यत्यन्यथा कर्तुं परिवर्तयितुं वा। आदर्शवादो वा नीतिर्वा प्रशान्तचित्तकलिता सा न रणोन्मत्तान् बाधितुं क्षमा। परराज्यलोलुपा आसन् पूर्वं राजानः—आधुनिकास्तु नीतिप्रतिष्ठाकामिनः। यदि धनसाम्यवादः स्वीक्रियते धनतन्त्रवादिभिरथवा धनतन्त्रवादोऽनुमन्यते धनसाम्यवादिभिस्तदा न प्रवर्तिष्यते युद्धं किन्तु जलानलवदनयोर्विरोधो न शान्तिकोटौ यातुमर्हतीति नवप्रतिष्ठितयुक्तराष्ट्रसंघनामा (United Nations Organisation) संघोऽपि कर्मसम्पादनाक्षमः; यः खलु विश्वव्यापितयात्मानं प्रबलबलसम्पन्नं मन्यमानो भृशं प्रयतते विश्वशान्तिप्रतिष्ठार्थम्। एवं वर्तमानायां विश्वपरिस्थितौ भारतवर्षमुदासीनं प्रेक्षकपदमधिकर्तुं प्रयतते; तदपि खपुष्पायिष्यत इत्यस्माभिरनुमीयते। नवलब्धस्वाधीनतापरिरक्षणाय भारतवर्षं सर्वे राष्ट्रैः सह मेलनं कामयत इति सत्यं साधु च; किन्तु भारतराष्ट्रस्य छिन्नकलेवरं पाकिस्तानाख्यं राष्ट्रं न भारतमुदासीनमवस्थातुं दास्यतीति महनीयं चिन्ता भारतराष्ट्रस्य। न ते राष्ट्रधुरीणाश्चिन्तयन्ति—"परेषु प्रतिपन्नेषु वयं पञ्च शतानि च। आत्मनि प्रतिपन्ने तु वयं पञ्च शतानि ते"। इति नीतेः सुमहतीं मर्यादाम्। आध्यात्मिके राष्ट्रे भारतवर्षे सर्वे प्रायशः शान्तिकामिनः परानुद्वेजकाश्च, किन्तु परपीड़नप्रतिरोधनमवश्यमेव कर्तव्यमन्यथा क्लीवता संसूच्येत। समायाते समये पुनरप्याक्रम्यैतद्वर्षं पराधीनताशृङ्खलं धारयिष्यतीति बलवृद्धिर्विधेयानुसर्तव्या च सर्वथा समुन्नततरा राजनीतिर्या लोकद्वयसाधनसमर्थेति।

अन्यच्चास्मिन् भारतेऽपि वर्षे यन्नीतिगतं वैषम्यं पदलोलुपता वा वर्तते तत् सर्वथा राष्ट्रकल्याणकामिभिः परिहरणीयम्—अन्यथा परस्परकलहेन पुनरपि महाननर्थ आगमिष्यतीति तत्रापि सावधाना दृष्टिर्देयाभियुक्तैरिति सर्वानुच्चावचान् भारतवासिन आगामिन्या आपदः प्रतिरोधार्थं समाह्वयामो यदिमे सर्वे समेत्य स्वदेशमङ्गलं चिन्तयन्तु विदधतु च तत्कल्याणमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थविमर्शः

(पूर्वानुवृत्तः)

[निबन्धकः—श्रीचारुकृष्णदर्शनाचार्यः]

शङ्करस्येतिहासकृत माधवाचार्यो न बुक्कनृपतेरमात्य आसीत, मन्त्री माधवः किष्किन्धाप्रदेशीय आसीत, तस्यानुजो भोगनाथस्तरुण एव वयसि तुर्य्याश्रममाश्रित्य नाम्ना भारतीतीर्थो भारतीमठाध्यक्षो बभूव। माधवाचार्यस्तु पञ्चाशीतितमवर्षादूर्द्ध्वं सन्न्यासाश्रममाश्रित्य नाम्ना विद्यारण्यो भारतीमठ एवोवास। सन्न्यासदशायामेव तेन श्रुतिभाष्याणां दीपिकाख्या व्याख्या रचिता इति ज्ञायते, चरमे च पञ्चदशीग्रन्थमासम्पूर्णमेव प्रणीय एकनवतितमे वर्षे मोक्षो लब्धः, पञ्चदशीग्रन्थस्यावशेषो भारतीतीर्थेनैव प्रणीतः। अतः पञ्चदशीटीकाकृता "प्रणम्य भारतीतीर्थविद्यारण्यमुनीश्वरौ" इति द्वयोरेव वन्दनं कृतम्। आनन्दगिरिरैतरेयभाष्यव्याख्यायां बहुत्र विद्यारण्यप्रणीतदीपिकाग्रन्थमुल्लिलेख। एतेन ज्ञायते माधवाचार्यादवरकालिक आनन्दगिरिरिति। स च शकीयचतुर्दशशतके आसीत्, सारदामठाधीशश्चासीत, इतिहासकारश्च माधवाचार्यः आनन्दगिरेर्नामोल्लिलेख शङ्करदिग्विजयग्रन्थे—

"विधिरास सुरेश्वरो गिरां निधिरानन्दगिरिर्व्यजायत" इति। अत ऐतिहासिकी माधवाचार्य आनन्दगिरेरप्युत्तरकालिक इति न वैमत्यम्। एष च शकीयषोडशशतकीय आसीदित्यैतिहासिका वदन्ति। अतो मन्त्रिमाधवादैतिहासिको माधवो भिन्न एवेति स्थितम्। अविदित्वैवैतिहासिकतत्त्वं प्रतिवादकर्त्रा वाक्प्रपञ्चः कल्पितः। एतेन ततकल्पिता हेत्वाभासादय आभासभूता वेदितव्याः।

भारतीमठ एवाद्यशङ्कराचार्येण स्थापित इत्यनन्तानन्देन तच्छिष्येणोक्तम्, सारदामठादयश्च त्रयस्तच्छिष्यैरेव स्थापिताः पश्चात्, अतः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनन्तानन्देन तेषां नामापि नोक्तम्। शङ्कराचार्यश्च वर्षशतादूर्द्ध्वं काञ्चीतीर्थे मोक्षमवाप महोत्साहेन च तत्समाधिः कृतस्तच्छिष्यैरित्युक्तमनन्तानन्देन। द्वात्रिंशवर्षे वयसि सशरीरं कैलासं प्रविवेशेति कुतः प्राप्तं माधवेन ? इत्यनैतिहासिकत्वं तस्य।

न्यायाचार्य उदयनश्च वाचस्पतिमिश्रादवरकालिक आसीदितितात्पर्यग्रन्थस्य तत्कृतपरिशुद्धिटीकारचनाद् बुध्यते, उदयनश्च षडधिक नवशततमे शाके लक्षणावलीं प्रणिनाय,

"एकाम्बराङ्कगणितेष्वतीतेषु शकान्ततः।
वर्षेषूदयनश्चक्रे सुबोधां लक्षणावलीम्" ॥ इति,

खण्डनकारः श्रीहर्षाचार्यश्च 'व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मत' इत्युदयनकारिकायाः 'तर्कः शङ्कावधिः कुतः' इति खण्डनकारिकया प्रतिवादं कृतवान्, एतेन उदयनादप्युत्तरकालिकः श्रीहर्ष इति स्पष्टं गम्यते। श्रीहर्षः शकस्यैकादशशतके आसीदित्यैतिहासिकाः। उदयनश्रीहर्षाभ्यामपि शङ्कर। चार्यस्य विचारमुक्तवान् माधवाचार्य इत्यनैतिहासिकत्वं तस्य स्पष्टम्, आचार्यशङ्करश्च एकोननवत्युत्तराष्टात्रिंशच्छततमे कल्यब्दे वैशाखस्य शुक्लदशम्यां जात इति भारतीमठस्थगुरुप्रणालीस्तोत्रवाक्यादवगम्यते।—

"निधिनागेभवह्न्यब्दे विभवे मासि वत्सरे।
शुक्ले तिथौ दशम्यां तु शङ्करार्योदयः स्मृतः" ॥ इति।

एवञ्च दशोत्तरसप्तशततमशकाब्दे शङ्कराचार्यस्य जन्मासीदिति निश्चीयते। स च शतवर्षाणि धरण्यामासीदिति तस्य साक्षाच्छिष्येण अनन्तानन्देनोक्तं, काश्यां व्यासस्याशीर्वचनं चोक्तम्—

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

छन्दोगक्रियासारः

[निबन्धकः—श्रीरमणीकान्तसिद्धान्तरत्नः]

(पूर्वानुवृत्तः)

ब्रह्मा तु आस्तीर्णदर्भाणां पूर्वदिग्भागे पश्चिमाभिमुखस्तिष्ठन् वामहस्तानामिकाङ्गुष्ठेन यजमानास्तृतकुशेभ्यः कुशपत्रमेकं गृहीत्वा प्रजापतिर्ऋषिरग्निर्देवता तृणनिरसने विनियोगः ॐ निरस्तः परावसुः इत्यनेन नैर्ऋतकोणे क्षिपेत्। (ढ) तत आचम्य जलं वा स्पृष्ट्वास्तृतकुशासने प्रजापतिर्ऋषिरग्निर्देवता ब्रह्मोपवेशने विनियोगः ॐ आवसोः सदने सीदामि" इत्युक्त्वोपविशेत। (ण) ततः कर्मसमाप्तिं यावत् प्राञ्जलिर्वाग्यतस्तिष्ठेत। (त) भाषेत यज्ञसंसिद्धम्। (थ) नायज्ञीयां क्वचिद् वदेत। (द) ब्रह्मत्वेनारोपितोब्राह्मणो यद्ययज्ञियवाचं वदेत तदा प्रजापतिर्ऋषिर्गायत्रीच्छन्दो विष्णुर्देवता अयज्ञीयवाग्वचननिमित्तजपे-विनियोगः ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुले" इति मन्त्रं जपेत्। (ध)

(ढ) "तेषां पुरस्तात् प्रत्यङ्मुखस्तिष्ठन् सव्यस्य पाणेरङ्गुष्ठेनोपकनिष्ठया चाङ्गुल्या ब्रह्मासनात्तृणमभिसंगृह्य दक्षिणापरमष्टमदेशं निरस्यति 'निरस्तः परावसु'रिति। इति गोभिलसूत्रम् १४।१।६

(ण) "अप उपस्पृश्याथ ब्रह्मासन उपविशत्यावसोः सदने सीदामीति। १५।१।६

(त) "अग्निमभिमुखो वाग्यतः प्राञ्जलिरास्त आकर्मपर्यवसानात्। इति १६।१।६

(थ) भाषेत यज्ञसंसिद्धिम्। इति ।७।१।६

(द) "नायज्ञियां क्वचिद् वदेत्। इति १८।१।६

(ध) "यद्ययज्ञियां वाचं वदेद वैष्णवीमृचं यजुर्वा जपेत् ॥१९।१।६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथवा ॐ विष्णो हव्यमिदं रक्षस्व इति यजुर्जपेत्। अथवा "नमो विष्णवे" इति वा ब्रुयात्। (न) ब्राह्मणाभावे कुशपत्ररचितं सार्द्ध-द्विर्दक्षिणावर्तमूर्द्ध्वमुखं दर्भवटुं छत्रमुत्तरासङ्गमुदकपूर्णकमण्डलुं वा ब्रह्मासने निधाय (प) तृणनिरसनादि अयज्ञीयवाग्वचननिमित्त-जपपर्यन्तं ब्रह्मकर्म कर्ता स्वयमेव कुर्यात्। ततः प्रत्यावृत्य प्राङ्मुख आसने उपविश्य उत्तरं कर्म कुर्यात्। यद्यत्र कर्मणि चरुहोमोऽस्ति तदाऽस्मि-न्नेव समये चरुं श्रपयित्वा चरो घृतस्रुवं दत्त्वाऽग्नेरुत्तरतः कुशोपरि स्थापयेत्। तदुपरि पुनरपि घृतस्रुवं दद्यात्॥ (फ)

(क्रमशः)

(न) "अपि वा नमो विष्णवे इति ब्रूयात्॥ २०।१।६

(प) "यद्युवा उभयं चिकीर्षेद्धोलञ्चैव ब्रह्मत्वञ्चैवेतेनैव कल्पेन छत्रं वोत्तरासङ्गं वोदककमण्डलुं दर्भवटुं वा ब्रह्मासने निधाय तेनैव प्रत्याव्रज्यान्य-च्चेष्टेत्। इति गोभिलः २१।१।६

ब्रह्मस्वरूपमाह गृह्यासंग्रहः "ऊर्द्ध्वकेशो भवेद् ब्रह्मा लम्बकेशस्तु विष्टरः॥ दक्षिणावर्तको ब्रह्मा वामावर्तस्तु विष्टरः"॥ पुराणे च दृश्यते,—

द्विरावृत्त्याथ मध्ये वै अर्द्धवृत्तान्तदेशतः। ग्रन्थिः प्रदक्षिणावर्तः स ब्रह्मग्रन्थिसंज्ञकः

"पञ्चाशद्भिः कुशैर्ब्रह्मा तदर्द्धेन च विष्टरः" इति गृह्यासंग्रहः। कर्म-प्रदीपे तु दर्भपरिमाणं नोक्तम्, —"यज्ञवास्तुनि मुष्ट्याञ्च स्तम्भे दर्भवटौ तथा। दर्भसंख्या न विहिता विष्टरास्तरणेष्वपि॥ इति। तदत्र भूमिदेवाः प्रमाणम्।

(फ) "श्रृतमभिघार्योदगुद्वास्य प्रत्यभिघारयेत्" इति गोभिलः ८।१।७

अभिघारणमिदं पवित्रान्तर्हितं कृत्वा करणीयम्। तथा च गृह्या-संग्रहः।

"पवित्रान्तर्हितां कृत्वा चरुं प्राज्ञोऽभिघारयेत्। उद्वास्य चैव विधिना एवं तन्त्रं न लुप्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीचैतन्यचरितामृतसंस्कृतानुवादः

(पूर्वतोऽनुवृत्तः)

अनुवादकः—श्रीभास्करानन्दस्वामी।

श्रीश्रीचैतन्यचरितामृत आदिलीलायम्

अष्टमः परिच्छेदः

श्रीमान भूगर्भगोस्वामी शिष्यः श्रीपण्डितप्रभोः।
वचो नान्यन्मुखे यस्य श्रीगौराङ्गकथां विना॥
तस्य शिष्यश्च चैतन्यदासो गोविन्दपूजकः।
चक्रवर्त्ती मुकुन्दश्च प्रेमिकः कृष्णदासकः॥
चक्रवर्त्ती शिवानन्दो महात्मासौ दिवानिशम्।
श्रीनित्यानन्द-चैतन्यचिन्तया वर्त्ततेऽनिशम्॥
लीलामृतं सदा राधाकृष्णयोः पिबतोऽसितम्।
नान्यं कञ्चन जानाति विना मदनमोहनम्॥
यावन्तश्चापरे भक्ताः श्रीवृन्दावनवासिनः।
गौराङ्गस्यान्तिमां लीलां श्रोतुं सर्वे समुत्सुकाः॥
अददुः कृपया मह्यमाज्ञां सर्वं तथैव ते।
अतो लिखामि निर्लज्जस्तेषामादेशगौरवात्॥
वैष्णवानां तथादेशं प्राप्य चिन्ताकुलान्तरः।
गत्वा मदनगोपालमाज्ञां याचितवानहम्॥
दृष्ट्वा श्रीभगवन्तं तं कृतवान् पादवन्दनम्।
तदा गोस्वामिदासाख्यः पूजकस्तमसेवत॥
पादपद्मे स देवस्य तथादेशमयाचत।
पुष्पमाला प्रभोः कण्ठात्तदैव प्रच्युतापतत्॥१०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्दृष्ट्वा वैष्णवाः सर्वे कृतवन्तो हरिध्वनिम् ।
गोस्वामिदास आनीय मत्कण्ठे तां समादधात् ॥
आज्ञामाल्यमहं प्राप्य परमानन्दितोऽभवम् ।
ग्रन्थस्यास्य समारम्भे तत्प्राप्तिर्हेयव कारणम् ॥
मया लेखयति ग्रन्थं देवो मदनमोहनः ।
मम लेखनमेतत्तु शुकस्य पठनं यथा ॥
मया मदनगोपालो यथा लेखयते तथा ।
अहं लिखामि पाञ्चाली नर्त्यते मायिना यथा ॥
सनातनेन रूपेण रघुनाथेन चार्चितः ।
मततकुलस्याधिदेवोऽसौ श्रीमन्मदनमोहनः ॥
श्रीवृंदावनदासस्य पादपद्मं विचिन्तयन् ।
तस्याज्ञां शिरसादाय लिखामोदं शुभङ्करम् ॥
व्यासश्चैतन्यलीलायां श्रीवृन्दावनदासकः ।
नान्यो वक्तुमलं किञ्चित्तस्यैवानुग्रहं विना ॥
मूर्खो नीचाधमः क्षुद्रो विषयामिषलोलुपः ।
वैष्णवाज्ञाबलेनैव कुर्य्यामेतद्धि साहसम् ॥
बलमेतच्च पादानां श्रीरूप-रघुनाथयोः ।
सिध्यन्ति स्मरणाद् येषां सकलानीप्सितानि च ॥
पादपद्मेषु यस्याशा श्रीरूपरघुनाथयोः ।
स ब्रुते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥८०॥

इति श्रीचैतन्यचरितामृत आदिलीलायां ग्रन्थकरणे
वैष्णवाज्ञारूपकथनं नामाष्टमः परिच्छेदः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीचैतन्यचरितामृत आदिलीलायां

नवमः परिच्छेदः ।

"तं श्रीमत्कृष्णचैतन्यदेवं वन्दे जगद्गुरुम् ।
यस्यानुकम्पया श्वापि महाब्धिं सन्तरेत् सुखम् ॥१॥"
जयतात् कृष्णचैतन्यो जयताद् गौरचन्द्रमाः ।
जयत्वद्वैत आचार्यो नित्यानन्दो जयत्वसौ ॥
श्रीनिवासादयः सर्वे गौरभक्ता जयन्त्यमी ।
येषां स्मरणसौभाग्यं सर्वाभीष्टं प्रपूरयेत् ॥
श्रीरघुनाथभट्टश्च श्रीरूपश्रीसनातनौ ।
श्रीजीवभट्टगोपालौ दासश्च रघुनाथकः ॥
इत्येतेषां प्रसादेन श्रीचैतन्यगुणावलीम् ।
अहं जानन्नजानन वा लिखाम्यात्मविशुद्धये ॥
"मालाकारः स्वयं कृष्णः प्रेमामरतरुः स्वयम् ।
दाता भोक्ता तत्फलानां यस्तं चैतन्यमाश्रये ॥२॥"
प्रभुणोक्तमहं विश्वम्भरेत्याख्यां गृहीतवान् ।
विश्वं बिभर्मि चेत् प्रेम्णा सार्थक्यं याति सा तदा ॥
इति ध्यात्वा स जग्राह मालाकारव्रतं प्रभुः ।
आरब्धवान्नवद्वीपे फलोद्यानविधिं ततः ॥
समानीय पृथिव्यां स कृष्णचैतन्यमालिकः ।
सिञ्चन्निच्छाम्बुना भक्तिकल्पवृक्षमरोपयत् ॥
श्रीमाधवपुरीस्वामी कृष्णप्रेममहाम्बुधिः ।
भक्तिकल्पतरोः सोऽयं जयतात् प्रथमोऽङ्कुरः ॥
तत्रेश्वरपुरीरूपः सुपुष्टः सोऽयमङ्कुरः ।
अजायत महास्कन्धः स्वयं चैतन्यमालिकः ॥
निजयाचिन्त्यशक्त्यैव स्कन्धोऽभून्मालिकः स्वयम् ।
शाखानां किल सर्वासां स्कन्धोऽसौ मूलमाश्रयः ॥१०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरीश्रीपरमानन्दस्तथा केशवभारती ।
ब्रह्मानन्दपुरी स्वामी श्रीब्रह्मानन्दभारती ॥
पुरीविष्णुः पुरीकृष्णानन्दश्च केशवः पुरी ।
तीर्थाख्यः श्रीनृसिंहश्च सुखानन्दपुरी तथा ॥
एतानि नव मूलानि निर्ययुर्वृक्षमूलतः ।
अष्टौ मूलानि वृक्षस्य स्थिरत्वं समपादयन् ॥
पुरी श्रीपरमानन्दो मध्यमूलं महादृढम् ।
मूलाष्टकेन तं वृक्षं दिक्ष्वष्टासु व्यधात् स्थिरम् ॥
ततः स्कन्धादचीयन्त बह्वयः शाखाः समन्ततः ।
उपर्य्युपरि चासंख्याः शाखास्ताभ्यो विनिर्गताः ॥
जातं विंशतिशः शाखागणैरेकैकमण्डलम् ।
ब्रह्माण्डगणमातन्वन्शाखा विपुलविस्तृताः ॥
एकैकस्याश्च शाखाया उपशाखाः सहस्रशः ।
उपाचीयन्त यावत्यस्ताः संख्यातुं क्षमेत कः ॥
प्रथमं मुख्यशाखानां नामानि गणयाम्यहम् ।
यूयं शृणुत सश्रद्धं करोमि वृक्षवर्णनम् ॥
वृक्षस्योपरिशाखातः स्कन्धद्वयमजायत ।
अद्वैतः प्रथमः स्कन्धो नित्यानन्दस्तथापरः ॥
तस्मात् स्कन्धद्वयाच्छाखा भूयिष्ठाश्च समुद्गताः ।
ताभ्यो जातोपशाखाभिर्व्याप्तश्च निखिलं जगत् ॥२०॥
महाशाखोपशाखाश्च तदुद्भिन्नाश्च शाखिकाः ।
व्याप्नुवन सकलं विश्वं कस्ता वर्णयितुं क्षमः ॥
शिष्य-प्रशिष्यवृन्देनोपशिष्याणां गणेन च ।
असंख्येयेन विश्वानि व्याप्तानि च निरन्तरम् ॥
यथा फलन्ति सर्वाङ्गं फलान्युडुम्बरद्रुमे ।
तथा फलानि जातानि सर्वतो भक्तिपादपम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रधानस्कन्धशाखाभ्यः प्रशाखाभ्यश्च सर्वतः ।
जितामृतानि जातानि नानाप्रेमफलानि च ॥
प्रेमफलानि पक्वानि पीयूषमधुराणि च ।
ददौ विनैव मूल्येन कृष्णचैतन्यमालिकः ॥
यावन्ति धनरत्नानि वर्त्तन्ते जगतीत्रये ।
तावन्त्येकफलस्यापि न मूल्यं गणयाम्यहम् ॥
योग्यं पात्रमपात्रं वा याचको वा न याचकः ।
नेत्थं चक्रे विचारं स ददामीत्येव बुद्धवान् ॥
चिक्षेपाञ्जलिपूर्णानि फलान्येष समन्ततः ।
उच्चित्याभक्षयन्दीना मालाकारो जहास च ॥
मालाकारोऽब्रवीदेवं भो भो वृक्षपरिग्रहाः ।
मूलशाखोपशाखाश्च यूयं शृणुत मद्वचः ॥
अलौकिको हि वृक्षोऽयं सकलेन्द्रियकर्मकृत ।
स्थावरोऽपि स्वयं धर्मान जङ्गमस्य वहत्यसौ ॥३०॥
सर्वाण्यङ्गानि वृक्षस्य चेतनानि भवन्ति हि ।
क्रमशो वर्द्धमानानि व्याप्नवन्त्यखिलं जगत् ॥
मालाकारोऽहमेकाकी गच्छेयं कुत्र कुत्र वा ।
फलानि कति वैकाकी पातयन वितराम्यहम् ॥
एकाकी स्वयमुच्चित्य ददच्छ्रान्तो भवाम्यहम् ।
कः प्राप्नोति नवाप्नोतीत्येष मे जायते भ्रमः ॥
आज्ञापयाम्यतः सर्वान युष्मानेव पृथक् पृथक् ।
यस्मै कस्मैचन प्रेमफलानि दत्त सर्वतः ॥
मालाकारोऽहमेकाकी कियद्भुञ्जीय वा फलम् ।
अप्रदत्तैः फलैरेभिः किमियद्भिः करोम्यहम् ॥
आत्मवाञ्छानुसारेण वृक्षं सिञ्चाम्यनारतम् ।
यस्मात् फलान्यसंख्यानि वर्त्तन्ते पादपोपरि ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ये ये पारिषदा आसन् श्रीचैतन्यमहाप्रभोः ।
तेषां शक्यं न निश्चेतुमन्योन्यं गुरुलाघवम् ॥
महान्तो ये च यावन्तस्तान् सर्वान् गणयाम्यहम् ।
कोऽपि कर्तुं न शक्नोति तेषां ज्येष्ठलघुक्रमम् ॥
अत एवास्मि सर्वेषां तेषां पादाम्बुजे नतः ।
तन्नामान्येव गृह्णामि दोषो मा गृह्यतां मम ॥

"तथाहि—

वन्दे श्रीकृष्णचैतन्य-प्रेमामरतरोः प्रियान् ।
शाखारूपान् भक्तगणान् कृष्णप्रेमफलप्रदान् ९२॥"
श्रीवासपण्डितो नाम नाम्ना श्रीरामपण्डितः ।
द्वे शाखे भ्रातरौ तौ द्वौ जगतीजनविश्रुतौ ॥
श्रीपति-श्रीनिधी नामापरौ द्वौ ततसहोदरौ ।
तस्य भ्रातृचतुष्कस्य दास्यो दासाः परिग्रहाः ॥
शाखाद्वयस्य ते सर्व उपशाखाश्च सम्मताः ।
सदा सङ्कीर्तनं तेषामालयेऽभून्महाप्रभोः ॥
चत्वारो भ्रातरो वंश्यैरसेवन्त महाप्रभुम् ।
गौरचन्द्रं विना देवं देवौ वा नैव तेऽविदुः ॥
अपरा महती शाखाचार्यरत्नोपनामिका ।
तस्याः शाखोपशाखाश्च ततपरीवारमण्डलम् ॥१०॥
आसीदाचार्यरत्नस्य नाम श्रीचन्द्रशेखरः ।
देवीभावेन यद्गेहेऽनृत्यच्चैतन्य ईश्वरः ॥
विद्यानिधिर्महाशाखा श्रीपुण्डरीकनामकः ।
यन्नाम व्याहरन्नुच्चैः स्वयं रुदितवान् प्रभुः ॥
महाशाखा च गोस्वामी श्रीगदाधरपण्डितः ।
स्वयं लक्ष्मीस्वरूपोऽसौ यत्तुल्यो नैव कश्चन ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्य शिष्योपशिष्यास्त उपशाखाः प्रकीर्तिताः ।
एवं सकलशाखानामुपशाखा उदाहृताः ॥
प्रभोः प्रेष्ठोऽभवद्भृत्यः श्रीवक्रेश्वरपण्डितः ।
चतुर्विंशतिकान् यामान् यो ननर्तैकभावतः ॥
यस्मिन्नृत्यति चैतन्यो गीतवांश्च स्वयं प्रभुः ।
वक्रेश्वर उवाचेदं गृहीत्वा चरणौ प्रभोः ॥
मह्यं दश सहस्राणि गन्धर्वान् देहि सुन्दर ।
तेषु नृत्यत्सु गायेयं यद्यहं स्यां सुखी तदा ॥
प्रभुणोक्तश्च पक्षोऽसि त्वमेको मम पक्षतौ ।
गच्छाम्याकाशमुत्प्लुत्य यदि पक्षान्तरं लभे ॥
पण्डितो जगदानन्दः प्रभोः प्राणस्वरूपकः ।
सत्यभामास्वरूपोऽसावित्येषा लोकविश्रुतिः ॥
कर्तुमैच्छत् स सम्प्रीत्या प्रभोर्लालनपालने ।
लोकभीत्या च वैराग्यात्तद्वचो नाशृणोत् प्रभुः ॥२०॥
उभौ विवदमानौ तौ कटूक्तिं चक्रतुः सदा ।
तस्य प्रीतिकथामग्रे वर्णयिष्यामि सर्वदा ॥
प्रभोरनुचरो मुख्यो नाम्ना राघवपण्डितः ।
मुख्या शाखा च तस्यैका करः श्रीमकरध्वजः ॥
तत्स्वसा दमयन्त्याख्या प्रियदासी महाप्रभोः ।
सा प्रभोर्भोज्यसम्भारांश्चक्रे द्वादशमासिकान् ॥
तैः सर्वैर्भोज्यसम्भारैः पूरयित्वा करण्डिकाम् ।
राघवस्तां समादाय सुगुप्तं प्रभुमानयत् ॥
प्रभुर्द्वादश मासांस्तानुपायुङ्क्त स्वयेच्छया ।
मञ्जूषा राघवस्येति यस्याः ख्यातिरभूत्तदा ॥
तां सर्वां भोज्यसामग्रीमग्रे वक्ष्ये सविस्तरम् ।
यां शृण्वतां हि भक्तानामश्रुधारा वहन्त्यहो ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभोरासीदतिप्रेष्ठः श्रीगङ्गाधरपण्डितः ।
यस्य स्मरणमात्रेण भवबन्धो विनश्यति ॥
श्रीमान् पुरन्दराचार्यः कृष्ण-चैतन्य-पार्षदः ।
यं पितेति स्वयं प्रोचे प्रभुर्गौराङ्गसुन्दरः ॥
प्रेमोदग्रा च शाखासौ श्रीदामोदरपण्डितः ।
श्रीमन्महाप्रभौ साक्षाद् वाक्यदण्डं व्यधत्त यः ॥
वाक्यदण्डकथामग्रे कथयिष्यामि विस्तृताम् ।
यं प्राहिणोन्नवद्वीपं तुष्टो दण्डेन स प्रभुः ॥३०॥
अथ शाखानुजस्तस्य श्रीमान् शङ्करपण्डितः ।
प्रभुपादोपधानाख्यः सर्वेषां विदितो हि यः ॥
यस्याशा प्रभुपादाब्जे स सदाशिवपण्डितः ।
अवसत् प्रथमं तावन्नित्यानन्दो यदालये ॥
उपासको नृसिंहस्य प्रद्युम्नब्रह्मचार्यसौ ।
नृसिंहानन्द इत्याख्यां ददौ यस्मै महाप्रभुः ॥
शाखान्या परमोदारश्रीनारायणपण्डितः ।
ज्ञातवान्न किमप्यन्यद् यश्चैतन्यपदं विना ॥
शाखा च पण्डितः श्रीमान् स प्रभोर्निजकिङ्करः ।
उदगृह्णात् प्रदीपं यो नृत्यति श्रीमहाप्रभौ ॥
शाखा शुक्लाम्बरो ब्रह्मचारी सौभाग्यवान् परम् ।
यस्यान्नं भगवान् याचन् प्रसह्याच्छिद्य भुक्तवान् ॥
आचार्यो नन्दनो नाम शाखा भुवनविश्रुता ।
प्रभुद्वयं गृहे यस्य सुगुप्तं समवस्थितम् ॥
शाखा मुकुन्ददत्तश्च सहाध्यायी महाप्रभोः ।
अनृत्यत प्रभुश्चैतन्यो यस्मिन् गायति कीर्तनम् ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

9. **Introduction to the Rigveda of Sayanacharya**—Edited by Dr. Pashupatinath Shastri, M.A. B.L. Ph. D. Re. 1-8 ; Re. 1-4- (for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. As.14;As. 10 (for members).

11. **Prabhakara-vijayam** of Nandishvara—Edited by Mahamahopadhyaya Anantakrishna Shastri Vedantavisharad and Pt. Ramanath Shastri. Rs. 2-8 ; Rs. 2 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya—Edited by Pt. Bamacharan Kavyatirtha. As 12 ; As 10. (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Prof. Chintaharan Chakravarti, M. A Re 1-8 ; Re. 1-4 (for members).

14. **Nala-damayantiyam** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2-8 ; Rs. 2 (for members).

15. **Prashastapada-bhashyam**—Edited by MM. Kalipada Tarkacharya. Rs. 4 ; Rs. 3. (for members).

16 **Yatratattvam** of Raghunandana Bhattacharya—Edited by Pt. Dwarikanath Nyayashastri. Rs. 2. ; Re. 1-8 (for members).

17. **Rik-pratishakhyam**—Ed. by Dr. Pashupatinath Shastri, M.A., B.L., Ph.D with the assistance of Prof. Chintaharan Chakravarti, M.A. Rs. 5 ; Rs. 4 (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Prof Akshayakumar Shastri. Re. 2 8 ; Rs. 2 (for members).

19. **Chhandogyamantrabhashyam** of Gunavishnu—Ed. by Prof. Durgamohan Bhattacharya, M. A. Rs. 7-8 ; Rs. 6 (for members). out of stock]

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by MM. Kalipada-Tarkacharya. Rs. 7. ; Rs. 6 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Prof.Chintaharan Chakravarti, M.A. Re. 1-4 ; Re. 1 (for members).

22. **Prasanta-ratnakaram** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2 ; Re. 1-8 (for members).

23. **Devisatakam** of Mahamahopadhyaya Krishnanath Sarvabhauma —Ed. by Pt. Janakinath Shastri. As. 12 ; As. 10 (for members).

24. **Sataranja Kutuhalam**:—Ed. by Prof Chintaharan Chakravarti Kavyatirtha M.A., As. 8

25. **Satyanubhavam**:—(a new MahaKavya) of MM. Kalipada Tarkacharya, Rs. 5 ; Rs. 4-8 (for members).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



একমাত্র ধর্ম্মই এই সংসার-সাগরে সমুদ্ধর্ত্তা এবং তাঁরই মহনীয় বাণী প্রচার করিতেছে গুপ্তপ্রেশ ডাইরেক্টরী পাঞ্জিকা

উত্তর কলিকাতায়

(দেশবন্ধু পার্কের দক্ষিণ পার্শ্বে)

নবনির্ম্মিত রঙ্গমঞ্চ

সংস্কৃত-সাহিত্য-পরিষদ্-ভবন

১৬৮।১, রাজা দীনেন্দ্র ষ্ট্রীট, কলিকাতা ৪

Printed by Bishnupada Bhattacharya M. A. Kabyatirtha. at Calcutta Oriental Press, Ltd., 9, Panchanan Ghose Lane, Calcutta and Published by the same from Sanskrit Sahitya Parishad, 168/1 Raja Dinendra Street, Shyambazar, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri